Barcode : 4990010095915
Title - Shabda Ratna Tatha Manorama Tika
Author - N. A.
Language - sanskrit
Pages - 816
Publication Year - 1874
Barcode EAN.UCC-13

ASBL/688 2468
Sabda kalpadrumá
শব্দকল্পদ্রুম তথা মনোরমা টীকা



S/C
431 25
B575 p

3751

SV. 25
c8 c73,

॥ श्रीविश्वेश्वरो जयति ॥

॥ मनोरमा शब्दरत्नसंवलिता ॥

॥ काश्यां विद्योदयनाम्नि यन्त्रालये मुद्रयितुमुपक्रान्ता ॥

॥ विद्योदयो निरकुर्यादविद्यातिमिरं सदा ॥

सं० १९३० ॥ सहस्रांशुरिवाशेषं मुद्राकिरणराजिभिः ॥ भाद्र० क० १० रवौ

श्रीगणेशायनमः॥श्रीमद्दाशरथिंप्रणौमि॥शेषविभूषणमीडेशेषाशेषार्थलाभाय॥दातुंसकलमभीष्टंफलमीशेयत्कृपादृष्टिः।१॥ध्यायमिति।ध्यात्वाध्यात्वेत्यर्थः।
णमुलन्तमेतत्।परं सर्वजगदुपादानम्।कार्यब्रह्महिरण्यगर्भव्यावृत्तयेदृष्टम्।ध्यानंचिन्तापरपर्यायंस्मृत्यनुकूलव्यापाररूपं।स्मरणंतुतज्जन्यमितिविशेषः।गुरोरि
त्येकवचनेनसर्वविद्यालाभएकस्मादेवगुरोरितिसूचितम्।प्रौढानांमनोरमयतीत्यर्थिकांमनोरमांप्रौढत्वंचसकलदर्शनार्थज्ञानपूर्वकमहाभाष्यगूढार्थज्ञानवत्त्वम्।
इणग्रहणेषिति।नन्विदंन्यूनमम्।ग्रहणेपिग्रहणात्।फलंतुबहुपुम्।हित्याहेत्यादौपुमःखय्यमितिरुत्वम्।गवित्ययमाहेत्यादिषदपदान्तत्वात्ककारादेर्नजश्त्वमिति

श्रीः॥ध्यायंध्यायंपरंब्रह्मस्मारंस्मारंगुरोर्गिरः।सिद्धान्तकौमुदीव्याख्यांकुर्मःप्रौढमनोरमाम्॥१॥हयवरट्।हकारोपदेशःअट्अण्हश्इण्ग्रहणेषु
हेकारग्रहणार्थः।अर्हेण।अड्व्यवायेपीतिणत्वम्।देवाहसन्तिभोभगोरितिरोर्यत्वम्।देवोंहसन्तिहस्तिचेत्युत्वम्।लिलिहिढ्वे।लिलिहिध्वे।विभाषेट्दृतिवाढः।
हल्।दृदंसूत्रंवल्लरल्फल्शल्षुहकारग्रहणार्थम्।रुदिहिस्वपिहि।रुदादिभ्यःसार्वधातुकइतिवलादिलक्षणइट्।लिहिल्यो।रलोव्युपधादितिवा
किल्वम्।अदाग्धाम्।झलोझलीतिसकारलोपः।अलिक्षत्।शलइगुपधादितिक्सः॥ लेहित्वा

चेन्न।सुट्तिथोरित्यादाविकारेणोच्चारणेनशल्त्वबोधितजव्यवहितहल्समुदायस्यासाधुत्वबोधनात्।अतएवोच्चैरुदात्तइतिसूत्रेभाष्यम्।नपुनरन्तरेणाचंव्यञ्जनस्योच्चार
णमपिभवतीति।स्कोरित्यादिसूत्रेसौत्रःप्रयोगः।अतएवाटिहकारप्रयोजनकथनावसरेभाष्येशश्छोटीत्युपन्यस्यतदुदाहरणंनोपन्यस्तम्।हकारपरशकारासम्भवेनशश्छोटीतिप्रस
क्तेरुच्चारितमितिचकैयटेनव्याख्यातम्।अभिहकारप्रयोजनमितिचभाष्येनोक्तमितिदिक्।दृदंसूत्रमिति।वलादिप्रत्याहारश्चरेफेणैवसन्तुहान्त्यमित्यत्रान्योन्याश्रयपरिहारस्तुरन्तंहरि रामः
तिन्यासेनावत्याहर्प्रत्याहारबोधकसूत्रसमुदायान्त्यमिदित्यर्थेनवासुकरदृतिभावः।ग्रहणार्थमितिशषसहरित्येवतुनोक्तम्।स्वरिहकारग्रहणापत्तौहरिर्हरतीत्यादौविसर्गापत्तेः॥ १

सप्तमीति। अधिकरणकारकस्यकर्त्रीद्यन्वयद्वाराक्रियान्वयादस्तिसामर्थ्यमितिभावः। अस्ययोगविभागस्यभाष्येऽदर्शनादाह। सुप्सुपेतीति। अनेनापिसाधनस्यागतिक
गतित्वादाह। यद्वेति। हलोहलितिसूत्रस्थान्त्यमितिविग्रहदृतिभावः। षष्ठीस्थानदृत्यस्यचोदुपधायागोहदृत्यादाविवगुणानांचपरार्थत्वादितिन्यायेनवाप्रवृत्तिरितिबो
ध्यम्। तन्नास्त्येकशेषान्यतममस्तिति। यद्यपीदृशेविषयेउच्चारयितुस्तत्रैकशेषान्यतरेणोच्चारणंबोद्धुस्त्वास्त्यबोधदृत्येवानुभवसिद्धंतथापित्ववस्थितैवान्यत
मप्रत्ययेनबोध्यतदृतिनदोषः। एकशेषश्चप्रत्याख्यातोऽसहविवक्षायामपिशब्दस्यमात्रप्रक्रियोपयोगीत्याशयेनदृष्टगुप्तः॥ सामीप्यंषष्ठ्यर्थदृति। षष्ठीस्थानदृ
त्यस्यगुणानाञ्चपरार्थत्वादितिन्यायेनाप्रवृत्तिः। नचैकोगुणवृद्धीदृतिसूत्रेतच्छेषशब्देनपरिभाषयोरपिगुणगुणिभावउक्तदृतिवाच्यम्। सार्वधातुकार्धधातुकयो

हलन्त्यम्। सूत्रेन्त्यमिति। हलिअन्त्यमितिविग्रहेसप्तमीतियोगविभागात्सुप्सुपेतिवासमासदृतिभावः। यद्वा। षष्ठीतत्पुरुषेयम्। स्यादेतत्। हलि
त्येकदेशस्यैवतन्त्रात्स्येकशेषान्यतममस्तु । हस्यलृदृतिचव्याख्यास्यते। सामीप्यंषष्ठ्यर्थः। यद्वा। मास्तुतन्त्रादि। अस्तुसमाहारद्वन्द्वोहलच्च
चेति। लकारस्यसंयोगान्तलोपदृतिचेन्नैवम्। आद्येसमासस्यक्लिष्टत्वात्। नहिब्राह्मणस्यकम्बलदृत्यादौब्राह्मणसमीपवर्तीअन्यदीयःकम्बलःप्रतीयते॥

रलोन्त्यस्यैकोगुणवृद्धीतिसूत्रत्रयस्थलक्ष्यसंस्कारकमहावाक्येविशेष्यविशेषणभावमादायैवतद्धेषव्यवहारोनतुगुणगुणिभावेवपरस्परापेक्षत्वेनवेतिकैयटेन
स्पष्टमुक्तेरेतन्मूलकतयैवतत्पक्षासंभवस्यतेनोक्तेश्चेतिभावः। क्लिष्टत्वादिति। ब्राह्मणस्यकम्बलदृत्यादावसत्यपिप्रकरणादौस्वस्वामिभावादिप्रतीतिवदनन्तरस
मीपादिशब्दप्रयोगमन्तरेणसामीप्याद्यप्रतीतेः तस्यषष्ठ्यर्थत्वाभावात्तत्प्रयोगेत्वसामर्थ्यात्षष्ठीसमासाप्राप्तिरिति। मध्यमपदलोपिसमासेसौत्रेवातत्रसमासस्य
क्लिष्टत्वमितिभाव स्तदेतदाह। नहीत्यादिनातत्रानिष्टदृत्यन्तेन ॥

चित्रगवीणामिति। कुमतिचेतिणत्वमदन्यपाठस्तुतेस्वकप्रमादात्। एवंस्त्रीगवीणामित्येकशेषप्रकरणान्तस्कुकैयट प्रयोगोपिबोध्यम्। अस्तेरनन्तरेसमीपेवेत्यादि भाष्यंत्वनन्तरादिपदाध्याहारेणतन्निरूपितसंबन्धार्थिकास्तानपदाध्याहारेणतन्निरूपितसंबन्धार्थिकावाषष्ठीत्यभिप्रायकम्। अतएवमतुप्सूत्रेकैयटेनगावोस्य सन्त्यनन्तरादित्यर्थेमतुपृष्ठङ्गापरभाष्यव्याख्यावसरेआनन्तर्यमस्यर्थवत्त्वैकृत्यर्थोपाधिरित्युक्तम्। नतुतस्यषष्ठ्यर्थत्वेनप्रत्ययार्थत्वमुक्तम्। भाष्यकृताचासामर्थ्यान्न त्रस्यभावउक्तः। षष्ठ्यर्थत्वेतुप्रत्ययार्थत्वात्कासामर्थ्यम्। तस्माद्यत्रषष्ठ्यन्तमात्रप्रयोगेआनन्तर्यादिप्रतीतिस्तत्रानन्तरादिपदाध्याहार एवबोध्यः। तत्रास्तिग्रहणाभावेत स्यान्यफलकत्वेवासूत्रानुपात्तास्त्यर्थान्तर्भावेणमत्वर्थीयवद्बहुव्रीहिवच्चतथाभूतानन्तर्यद्यर्थान्तर्भावेणचित्रागावोस्यसत्यनन्तरादित्याद्यर्थेबहुव्रीहिमत्वर्थीयोनभ

नवाचित्रगुशब्दाच्चित्रगवीणांसमीपवर्त्तीरथादिः प्रतीयते। अतएवानन्तरादिष्वनसमासोनभिधानादिविस्पष्टमा करे। किंबहुनाब्राह्मणस्यकम्बलश्चित्रागावोस्येतिव्यस्तप्रयोगोपितत्रानिष्टः। द्वितीयेपिसंयोगान्तलोपोदुर्लभो यणःप्रतिषेधा रंभात्। तत्त्वत्यारव्यानपक्षेपिझलोझलीत्यतोझलग्रहणमपकृष्यसंयोगान्तस्यझलोलोपविधानाच्च . ॥

वस्तोनभिधानादितिमतुप्सूत्रेभाष्येस्पष्टम्। अनन्तरादेरिदमर्थत्वेतस्येदमितिशैषिकोप्यनभिधानान्नेवि तस्येदमित्यत्रभाष्येतदुक्तमनन्तरादिष्वनसमासोनभिधा नादितिस्पष्टमाकरदृति। तत्रसमासग्रहणंतद्धितरत्तेरप्युपलक्षणम्। अनन्तरादिशब्दैः षष्ठीतत्पुरुषादिस्तुभवत्येव। ग्रामकूपोगङ्गातीरमित्यादौसमीपएवाव यवत्वारोपेणसमासः। स्पष्टाचेयंरीतिर्मपर्यन्तस्येतिसूत्रेकैयटे। किंचहस्यलित्यर्थेहलिलेखनदृतिधातोर्लस्येत्वापत्तिः। नचफलाभावोदेवदत्तहलित्यादौडित्व सामर्थ्यादभस्यापिटेर्लोपवल्लिलसामर्थ्यात्प्रत्ययात्पूर्वत्वाभावेपिलित्वस्यैवफलत्वंवक्तुंशक्यमित्यपिबोध्यम्। यद्यपिहलसीरादितिनिर्देशेनतस्यनेत्वमितिक त्यायितुंशक्यम्। तथापिज्ञापकस्वीकारापेक्षयासूत्रंवृत्तिरेवलघीयसीतिदिक्। झलोलोपेति। सौत्रलोपाश्रयणेतुमूलोक्तमेवलघु ॥

असंभवादिति। नचाद्यन्तौटकितावित्यादौयथासंख्यमन्वयेऽपिप्रथमतः साहित्यावच्छिन्नेसाहित्यावच्छिन्नान्वयमात्रेणसहविवक्षामाश्रित्ययथाद्वन्द्वसाधुत्वंतथेहापि
प्रथमतोलकारोहल्यदवाच्यश्चेदितिसामान्यतोबोधंकल्पितमादायद्वन्द्वसाधुत्वंततोविशेषजिज्ञासायामादिरन्त्येनेत्येकवाक्यतयाविशेषतोवाक्यार्थोलक्ष्यसंस्कारकःकिं
चसहविवक्षासहवक्तुंवक्तुरिच्छासाचसूत्रप्रणयनानुपपत्त्यापाणिनेस्तत: पूर्वमपिहल्पदार्थज्ञानादस्तैवबोद्धबोधसुक्रमेणेवेतिवाच्यम्।आद्यन्तावित्यादौयथासंख्यसू
त्रारम्भसामर्थ्येननथासाधुत्वाङ्गीकारेऽन्यप्रकारेणतस्यधुसौत्वकल्पनेमानाभावात्।किंचश्रोतृणांसहबोधोभवतितीच्छ यासहवक्तुमिच्छायाएवसहविवक्षात्वेनश्रोतृणा
मपिसहबोधएवोचितः।तादृशेच्छयातेषांतादृशबोधाजनकशब्दप्रयोगेतुपाणिनेर्भ्रान्तत्वापत्तिः।मुखनयनंपश्येत्यादौतुनदोषः।उभयज्ञत्वेनज्ञातंप्रत्येवतादृशशब्दप्रयोगात्
तेनरूपेणज्ञानंभ्रमःप्रमावेत्यन्यदेतत्।किंचपाणिनेःपूर्वंहल्पदार्थज्ञानेपितद्भिप्रायेणप्रयोगः।अन्यथाव्याख्यातृपरम्परावगतवक्तृतात्पर्यानुपपत्त्यालृस्मृदृतिसूत्रस्थकैयटोक्तरी
तिरपिदुर्लभा।किंचपदार्थबोधंविनावाक्यार्थबोधासंभवेनहल्प्रत्याहारसिद्धेःप्रागेतत्सूत्रार्थावबोधेप्रसक्तेतदुद्धारार्थंयत्नःअस्यांचावस्थायांहल्शब्दार्थाप्रसिद्धेर्द्वन्द्वस्यदुर्ल
भ।सहविवक्षायाअसंभवात्।तस्मादाद्योक्तमेवन्याय्यम्॥ ७ स्यालक्षणयातत्रान्तरीयप्रथमादिव्यवहारेणप्रथमादिपदानामिवशब्दानुमानाद्वातत: श्रोतृणांबोधसंभवेनेतरेतरा
श्रयस्येवाभावेनदाढ्यंलभेतिवक्तव्यमित्यादिसमाधानपरभाष्यासङ्गत्यापत्तेः।नचैवमजादिव्यवहारस्यापिलक्षणादिनैवोपपत्तावादिरन्त्येनेतिसूत्रवैयर्थ्यम्।कचिल्लक्षणादिनाबोधदर्शितसर्व
त्रलक्षणाद्याश्रयणमेवेतिनियमाभावात्।नासूयाकर्तव्यायत्रानुगमःक्रियतदृतिपङ्क्तिविंशतीतिसूत्रेभाष्योक्तेः।तस्मात्करिष्यमाणशक्तिग्रहोपायकपदस्यतदभिप्रायेणाचार्यस्यपूर्वमप्रयोगइत्येव
कल्पनान्याय्या।धनिनश्चायमर्थोनाऽऽङ्लावितिसूत्रेऽष्टदशानांग्रहणाभावायवर्णानामुपदेशावत्उपदेशोत्तरकालेत्संज्ञादत्तसंज्ञोत्तरकालःप्रत्याहारःप्रत्याहारोत्तरकालासवर्णसंज्ञातदुत्तरका
लनणुदिदृतिसवर्णग्राहकमित्येतेनसमुदितेनान्यत्रसवर्णानांग्रहणंभवतिनस्मिन्पिस्वाङ्ङ्त्येवंवाक्यपरिसमाप्तिप्रतिपादकभाष्येणापिअन्यथातत्तच्छास्त्रप्रणयनानुपपत्त्यापाणिनेस्तथाज्ञा
नस्यपूर्वमपिसत्त्वेनाचार्येणतथाप्रयोगेबोधृणामपिक्रमेणतथाबोधेउपपन्नेकिंतेनकृतंस्यात्।कथंवानाऽऽङ्लावित्यत्राष्टदशादीनांग्रहणकारणंभाष्योक्तंसङ्गतंस्यादितिविभाव्यनान्तदाह।तस्मा

आद्यन्ताभ्यामिति।अवयवत्वेनबोधकाद्यन्तशब्दाभ्यामित्यर्थः।तस्यासमुदायस्य।तयोःपारार्थ्येति।सञ्ज्ञास्वरूपबोधकतयाशक्तिग्रहकालएवतयोःपारार्थ्यनिर्णयादित्यर्थः।परामर्शीत्यादिति।वस्तुतोज्ञापकादिनाःख्यापिनसञ्ज्ञाकार्यमाद्यन्तशब्दाभ्यामाद्यन्तघटितसमुदायस्यास्तेपेणान्येषामिवतयोःप्राप्तायाःसञ्ज्ञायाःप्रकारान्तरेणाशक्यवारणत्वात्।स्वशब्दानुवृत्तेश्चनफलम्।भाष्येपिएतत्फलितार्थकथनमेव।स्वस्यचरूपस्येति।सञ्ज्ञास्वरूपत्वंविशिष्टस्यास्तुप्रत्येकंस्वबोद्धत्वंचास्तुकोविरोधः।यथाच्चेरित्यादौगुणदर्शनेनविशब्दस्यापिधिसञ्ज्ञाबोद्धत्वंतद्वदेवमजादिसञ्ज्ञास्वसञ्ज्ञिघटकेकारादिषिवाकारचकारयोरपिप्राप्तेत्येव।किंचस्वशब्देनकेवलान्त्यपरामर्शासंभवेपिविशिष्टपरामर्शेनबाधंकृत्वात्रसमुदायेफलाभावादवयवयोर्विश्रान्तिप्राप्स्यति।तस्मात्ज्ञापकादिनैवान्त्यस्यतत्कार्यवारणीयमित्यलम्।भाष्येति।तत्रहिउपदेशदृतिकिमभ्रऔअपः मद्भगानामिति।आद्यन्ताभ्यामवयवाभ्यामवयवीसमुदायआक्षिप्यते।तस्यचयुगपल्लक्ष्येप्रयोगाभावात्तदवयवेअवतरन्तीसञ्ज्ञामद्भमेषुविश्राम्यति।नवाद्यन्तयोःसंज्ञास्वरूपान्तर्भावेणतयोःपरार्थ्यनिर्णयादितिभावः।स्वस्यचेति।स्वंरूपमित्यनुवृत्तेःस्वरूपंचादेरेवगृह्यतेनान्त्यस्यअन्येनेत्यप्रधानत्वात्तीयादिदेशात्।सर्वनाम्नामुत्सर्गतःप्रधानपरामर्शित्वात्।आद्योच्चारणमितिायद्यप्युपदिश्यतेःनेनेतिकरणव्युत्पत्त्याशास्त्रमुपदेशदृतिभाष्यसूत्रादिषुव्याख्यातंतथापितत्प्रौढिवादमात्रम्।करणेघञोदुर्लभत्वात्।ल्युटाबाधात् ॥ ७ प्रत्यसमाख्यानमुपदेशोगुणेःप्रापणमुद्देशदृतिनासावुपदेशदृत्युत्कोपदेशोदेशयोर्लोकव्यवहारेणसंकीर्णत्वमाशङ्क्योपदेशनेजनुनासिकदृतिवार्तिकरूढ्याश्रितन्यासस्यखण्डनायोपदेशदृतिकरणेघञुपदिश्यतेनेनेत्युक्तंतच्चशास्त्रंशासनकरणंप्रत्यासस्यैतच्छास्त्रीयधात्वागमप्रातिपदिकप्रत्याहारसूत्रप्रत्ययादेशरूपम्।प्रौढिवादमात्रमिति।वार्तिककृदुक्तन्यासीयार्थस्यकथंचित्सूत्रतोपिलाभसंभवात्न्यासान्तरप्रवृत्तिस्तेवृथेवेतिप्रौढ्यावोधयितुमेवंवादइतिभावः।घञदृति।अकर्तरिचेत्यत्रसञ्ज्ञायामित्यस्यप्रायिकत्वात्तत्प्राप्तिरितिभावः।बाधादिति।वासरूपविधिस्तुक्तल्युट्तुमुन्खलर्थेषुप्रतिषिद्धःनचतत्रसाहचर्येणभावस्यैवग्रहणमितिवाच्यम्।दृषत्यानःसोमोभवतेत्यत्रकर्मणिरक्तेनेतिभाष्यादिप्रामाण्येनात्रसाहचर्यानाश्रयणादितिभावः ॥

क्लिष्टत्वादिति। गुणप्रधानसंचिपीप्रधानस्यविशेषणेसाकाङ्क्षत्वेदृतरान्वयस्तस्ययुक्तइतिक्लेशदूनिभावस्तदाह। नहीत्यादिना।भाष्यकृतेति।अस्यार्थस्येतिशेषः।एवंचोभय
प्राप्तौकर्मणीतिनियमान्नकर्त्तरिषष्ठीतिबोद्धव्यम्।अवहेलनाच्चेति।चोहेतौयतौवहेलनमतः क्लिष्टत्वमित्यर्थः।घापवादइतिल्युडपवादइत्यपिबोद्धव्यम्।तत्रापिसञ्ज्ञायामि
त्यनुवृत्तेरितिभावः।अगतिकगतिरिति॥नचखनोघञ्चेतिघविधानमन्यतोपीत्यर्थमित्याकरेस्पष्टंनेनात्रघेसिद्धौतीतिवाच्यम्।तस्यापिअगतिकगतित्वात्।भगःपद्मित्यादौ
यत्रघित्वफलंतत्रैवतत्प्रवृत्तेश्च॥पद्स्यघञर्थैकेनसिद्धेर्नैतदुदाहरणंकिंतुक्वाचित्कंवाक्यंतत्।किंचोच्चार्यवर्णानाहोघदिष्टद्मेवर्णाद्स्यादिभाष्यादुपदेशशब्दस्योच्चारणार्थ
त्वस्यनिर्णयेनसंकीर्णलोकव्यवहारस्यलक्षणयाप्युपपत्तौनावघञिबाधकाभावः।किंचोघदेशशब्दस्यप्रत्ययादिपरत्वेतस्यैवहलन्तमित्यत्रान्वयेनयत्किंचित्समुदा

नचघः।असञ्ज्ञात्वात्।प्रायेणसञ्ज्ञायामितिव्याख्यानस्यक्लिष्टत्वात्।नह्युपाधेरुपाधिर्भवतीत्यादिनाभाष्यकृतावहेलनाच्च।अतएवघापवादोहल श्चेतिघञपी
हनाबाहुलकात्वगतिकगतिः।अतएवप्रक्रियन्तेशब्दाभिरितिकरणव्युत्पत्तिरपिपरास्ता।तथाचवार्तिकम्।अजबभ्योस्त्रीखलनाः स्त्रियाःखलनौविप्रतिषेधेने
ति।अतोभावेएवप्रत्ययोन्याय्यइतिभावः।यत्तुधातुसूत्रेत्यादिपठन्ति।यच्चव्याचक्षतेकरणव्युत्पत्त्यापूर्वार्धेपात्तानामुपदेशत्वम्।कर्मव्युत्पत्त्यौत्वागमादीनाम्।
वर्णादिलिङ्गानुशासनयोरपिसूत्रत्वात्सिद्धेष्वपादानंगोवलीवर्दन्यायेना।एवंगणत्वादेवसिद्धौधातोरपीत्यादि।अत्रेदंवक्तव्यम्।किमेषामुपदेशसञ्ज्ञाउतयोगमात्रम्।

यान्यस्यवारणसंभवेतदर्थमन्यग्रहणसामर्थ्यादिवर्णनक्लेशोभाष्यकृतोव्यर्थस्यादितिबोद्धव्यम्।उदेशश्चप्रातिपदिकानांनोपदेशदित्यादेचउपदेशेदितिसूत्रेचभाष्येभावघञन्तस्यैवतस्या
ङ्गीकाराच्चेतिदिक्। धातुसूत्रेत्यादीति। धातुसूत्रगणोणादिवाक्यलिङ्गानुशासनम्।आगमप्रत्ययादेशाउपदेशाःप्रकीर्तितादृतीत्यर्थः॥उपदेशत्वमितिउपदेशशब्दव्यवहार
दृत्यर्थः।यतोरपीतिप्रत्ययेभ्यउणादेरपीत्यपिशब्दार्थः।वाक्यशब्देनवार्तिकंशीङ्-लण्चोरट्उण्आचारेःक्वगल्यपुट्अणञनङित्युदाहरणानि।उपदेशसञ्ज्ञेति।उपदेशपदंयोगरूढमेवेतिभाव

ननुसंज्ञाशब्देनव्यवहारएवाभिमतोऽतआह।आमद्त्यादि॥नचाकारोच्चारणंव्यर्थम्।तेनास्मत्यसंज्ञापनस्यैवौचित्यादितिभावः।आदिनायकारादीचुञ्चुपूचणपावित्यादिसंग्रहः॥उपदेशभावादिति॥आदेशस्योपदेशभावादित्यर्थः॥ततोधातुसञ्ज्ञेति॥लूशब्दएवधातुसञ्ज्ञःकेवलमसौञिकार्यलभतद्तिभावः॥नन्वत्रसूत्रसाहचर्याद्धेत्वागश्चैत्यादिशब्देनतद्बोधकपाणिन्यादिपठितानुपूर्वीकाणांग्रहणम्॥तेषांधात्वादिव्यवहारस्तुभाविसञ्ज्ञाविषयघटितत्वेनधातुपाठद्त्यादिव्यवहारवदितिचेन्नाद्योच्चारणविषयाणामित्येवसिद्धेएतस्यानुपयोगात्॥अतएवचारुचेराह॥अपिचेति॥अलोन्त्यात्सूत्रेति।उपधासञ्ज्ञासूत्रेत्यर्थः।विरुद्धेतेति॥तत्रहिलोपे

नाथः।संज्ञा याःशास्त्रकारैरनुक्ताः।असञ्ज्ञात्वात्घप्रत्ययेनेतिभाष्योक्तेश्च।अस्मदादिकृतसञ्ज्ञायाःशास्त्रव्यवस्थापकत्वेऽतिप्रसङ्गाच्च।आमोमित्वमदन्तत्वादितिसूपरग्रन्थविरोधाच्च।नह्युत्सृष्टानुबन्धस्यामोनप्रत्ययत्वंयेनमित्त्वंनभवेत्। किंचैवंप्रत्ययविधौपञ्चम्याःप्रकल्पकत्वेसनःसनेवआदेशोस्त्वित्याशङ्क्योपपदीदेशाभावादित्यज्ञानस्यादितिभाष्यकैयटोक्तंव्याकुप्येत।किंचनधातुलोपइतिसूत्रेधातुग्रहणंकिंलूञ्लविपूञ्पवितेतिभाष्यमुपदेशेएवानुबन्धलोपेकृतेततोधातुसञ्ज्ञेत्येवंपरःकैयटग्रन्थश्चविरुद्धेत।अपिचघ्वसोरेद्धावितिसूत्रेलोपशब्देनिर्दिष्टकारकोनिर्देशःद्वितीयःशकारद्दितिअलोन्त्यसूत्रस्थभाष्यकैयटादिकमपिविरुद्धेत।नद्वितीयःयोगस्यैवपुरस्कारेपरिगणनस्यव्यर्थत्वात्।धात्वादिषुकरणव्युत्पत्तिरागमादिषुनेतिवैषम्यस्यदुरुपपादत्वाच्च ॥

शितिभिन्नेपदंशितिच॥पूर्वस्यशुत्वेनशः।असंदेहायझल्परसंयोगादित्वेपिस्कोरित्यस्यनप्रवृत्तिः।झलांजशित्यादौजश्त्वस्यैव॥शकारस्यधात्वाघन्तत्वाभावःस्पष्टएवेतिभावः।किंचनमोवरिवश्चित्रङीत्यस्यासंग्रहोत्रपसेद्त्यपिबोद्धव्यःएतस्ययोगरूढिरित्युक्तेःपरिगणनतायाएवलाभात्॥योगस्यैवेति।ननुरूढेरित्यर्थः।परिगणनस्येति।धात्वादिगणनस्येत्यर्थः।वैषम्येति।भाष्यरीत्याकरणव्युत्पत्तेरेवसर्वसंग्रहादितिभावः ॥

उपदेशताप्रयोजकेति।योगमात्रस्वीकारेउपदेशताउपदेशकरणतानहितत्प्रयोजकंधातुत्वादिभवतीतिनदोषः।सञ्ज्ञात्वेतुउपदेशताउपदेशशब्दत्वम्।उपदेशशब्दस्यशब्दपरत्वा
नोतदवच्छिन्नस्यप्रयोजकंतुरूढ्यर्थतावच्छेदकतयाधातुत्वादिवक्तुंशक्यमितिभावः॥शकारस्येति॥नह्यनेनकिंचिदुपदिश्यतदृतिभावः॥ननूपदिश्यनेज्ञाप्यतेःनेनेतितदर्थः।धात्वा
दिभिर्हिप्रयोगोज्ञाप्यतेनेदृदनेनापिशकारेणसर्वादेशत्वंज्ञाप्यतेदृत्यरुचेराह॥आदेचदृति॥सर्वेति।भाष्यकारादीत्यर्थः॥यत्रतुकरणव्युत्पत्त्यैवार्थसंगतिस्तत्रागत्यास्तुकृत्यल्युटदृति
बाहुलकात्ल्युडभावः।यथायन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तावित्यादाविति दिक्॥नासिकामनुगतदृति।नासिकामभिहत्यवायुनाऽभिव्यज्जितदृत्यर्थः॥प्रातिशाख्यशिक्षादौलोवे
वृतद्यवहारस्यतथैवोपपादनमावश्यकमितितात्पर्यम्।अतएवमुखग्रहणप्रत्याख्यानभाष्यध्वनितोयमानुस्वारयोरनुनासिकव्यवहारःसूत्रमतेसंगच्छते॥यरोनुनासिकदृत्यादौस्वरूप
उपदेशताप्रयोजकधातुत्वादिरूपोपाद्यवच्छिन्नसमुदायान्त्यहलिदित्यर्थदृतिस्वग्रन्थविरोधाच्चापक्षद्वयेपिलिङ्गानुशासनस्यप्रकृतानुपयोगात्।लोपश्चेतिश
कारस्यासंग्रहाच्च।आदेचउपदेशेउपदेशेत्वतदृत्यादावाद्योच्चारणस्यैवउपदेशपदार्थतायाःसर्वसंमतत्वाच्चेतिदिक्।उपदेशेजनुनासिकदृत्॥यद्यप्यत्रोपजीव्यत्वा
दनुनासिकसञ्ज्ञाप्रथमंवक्तुमुचितातथापिनासिकामनुगतदृतियोगाश्रयणेनैवगतार्थत्वादनुनासिकसञ्ज्ञासूत्रंमन्दप्रयोजनमितिध्वनयितुंनेहोपन्यस्तम्।
उपदेशेकिमर्थमभ्रऔंअपः।यद्यपीहउञ्ऋऊंदृत्यत्रैवविधानसामर्थ्यान्नेत्वमितिसुवचम्।तथाप्युत्तरार्थमवश्यंकर्त्तव्यमुपदेशग्रहणंस्पष्टप्रतिपत्तयेदृहैवकृतम्।अच्
निमित्तानिनोमकारस्यमाभूत॥ ॐ ग्रहणाभावस्तुपशुरपत्यमित्यादिवदितिद्वेयम्।मन्दप्रयोजनमिति॥मन्देषुप्रयोजनमस्येतिबहुव्रीहिः।एवंविधयोगलोकप्रातिशाख्याद्यनभि
ज्ञंप्रतिप्रयोजनमित्यर्थः॥अभ्रऔंअपदृति।अत्रेत्सञ्ज्ञायांलोपःस्यादिति भावः।विधानेति॥इदितिवक्तव्येअनुनासिकविधानसामर्थ्यादित्यर्थः।नेत्वमिति॥तत्फललोपस्यसामर्थ्यादभावे
दृत्वमपिफलाभावान्नेत्यर्थः॥ननुभ्रऔंअदितदृत्यत्रानेकान्तानुबन्धादृतिपक्षेआदितश्चेनीदृप्रतिषेधःफलम्।नचलोपाभावेदृदितिमहासञ्ज्ञाकरणात्सञ्ज्ञापिनेतिवाच्यम्।महास
ञ्ज्ञयैवलोपसिद्धातस्यलोपदृत्यस्यवैयर्थ्यापत्तेः।इकदृत्यादौककारादिश्रवणानापत्तेश्चेतिचेन्न।अनुबन्धानामेकान्तत्वमेवेतिमुख्यपक्षेदोषाभावदृत्याशयात्तदाहिमुख्येवयविन्यन्यपदार्थे

प्रतिज्ञेति।प्रतिज्ञानविषयदूस्यर्थः।प्रातिज्ञाशब्दस्येति।।भावाङ्न्तस्येत्यर्थः।।क्लिष्टेति।।शक्तिग्राहकव्याकरणसत्वाच्चक्त्यैवतदर्थबोधसंभवेलक्षणाश्रयणंक्लेशदृतिभावः।।लक्षणंवि
नैवदृ।।अत्रलक्षणयाव्याख्यानंकुर्वतापितत्रलक्षणांविनामदुक्तरीत्यैवव्याख्यातमेवंचपूर्वापरविरोधस्तस्येतिभावः।नचोभयोर्विधानेपिलाघवाद्धावेशक्तिःकर्मणिलक्षणाअनुशास
नमपिलाक्षणिकार्थानुशासनमेवेतिवाच्यम्।लःकर्मणीत्यादौनामपितथात्वापत्तेःतिङंकर्त्रादौशक्तिरितिसिद्धान्तासङ्गत्यापत्तेः।व्याकरणस्याभियुक्तोक्तशक्तिग्राहकत्वस्यभङ्गापत्तेश्च॥
प्रतिज्ञापनदृतिप्रतिज्ञा।आतश्चोपसर्गदृतिकर्मण्यङ्।प्रतिज्ञाआनुनासिक्यंयेषामितिविग्रहः।एवचप्रतिज्ञासमधिगम्येप्रतिज्ञाशब्दस्यलक्षणेतिक्लिष्टंव्याख्या
नं[illegible]यणीयम्।पाणिन्युपज्ञंव्याकरणमित्यादिवित्वलक्षणांविनैवनिर्वाहात्।यद्यपिसूत्रकारकृतेनुनासिकपाठदृदानींपरिभ्रष्टस्तथापिवृत्तिकारादिव्यवहा
रबलेनतत्कार्यंप्राक्स्थितदृत्यनुमीयतदृतिभावः।ननुरलयोरितिन्यूनम्।टकारस्यापिमद्ध्यगत्वादित्यतआह।प्रत्याहारेणेति।व्यवह्रीयन्तइति।प्रत्याह्रीयन्तेसं
क्षिप्यन्तेवर्णायत्रेतिबाहुलकादधिकरणेघञ्।यद्यपियोगमात्रमकारादिसञ्ज्ञा स्वतिप्रसक्तंतथापियोगरूढिरितिभावः।प्रत्याहाराश्चैकचत्वारिंशदितिप्राच्यः।च
तुर्दशसूत्रीस्थैर्हलभिरिदृकृताअष्टाध्याय्यांव्यवहृताएकचत्वारिंशदितितस्यार्थः।तेनसुप्तिङादीनांरप्रत्याहारस्यचयोद्वितीयादृतिवार्तिकस्य[illegible]चयप्रत्या हारस्य
चाधिक्येप्यदोषः।यत्तुयमन्ताङ्दृतियमिर्यमन्नेषनिडेकदृष्यतदृतिचयम्वार्तिककृताव्यवहृतदृत्याहु;तद्भसाभिधानम्।आघसोर्णादिसूत्रत्वात्द्वितीयस्यव्याघ्र
भूतिकारिकास्थत्वाद्दित्सतीतावत्।एषचसंख्यानियमोनातीवोपयुज्यतदृत्युपेक्षितः।ऊकालोच्।ह्रस्वदीर्घप्लुतदृतिसमाहारद्वन्द्वः।सौत्रंपुंस्त्वम्॥
टकारस्यापीति।अत्रग्रहणंव्यर्थतदन्यत्रोक्तम्।बाहुलकादितिभावघञन्तादर्शआद्यजित्यपिबाहुलकाद्विशिष्टमितिभावः।एकचत्वारिंशदिति।।एकस्मान्ङ्णवटाद्ध्यांष
ष्ठिभ्यसवक्तव्यमाःस्युः।।ङेयौचयौचतुर्भ्योरःपञ्चभ्यःशलौषड्भ्यदृतितदुक्तेरितिभावः।।सौत्रंपुंस्त्वमिति।यद्यपिदृतरेतरयोगेपिसौत्रमेकवचनंवक्तुंशक्यंतथापिलिङ्गमशिष्यं
लोकाश्रयत्वाल्लिङ्गस्येतितत्रतत्रवार्त्तिकोक्तेर्लिङ्गस्यलौकिकत्वात्तद्व्यत्ययकल्पनमेवोचितंननुशास्त्रीयवचनव्यत्ययकल्पनमितिभावः ॥

फलितार्थीति।ऊपदेवस्योच्चारणकालसदृशप्रक्षेपणकालशब्देनसमानाधिकरणबहुव्रीहेरुत्तरपदलोपीतिभावः॥वाकालदृतिनविग्रहेत्यधिकरणात्तदाह।विग्रहस्त्विति।कालदृतिजात्याख्यायामेकवचनम्।स्वोच्चारणकालइति।स्वोच्चारणकालसदृशदृत्यर्थः।सादृश्यमूलकेकालयोरभेदाद्वाक्यसायेतुयथाश्रुतमेवसाधुरित्फिट्स्वरेणेति।अन्तोदात्तदृत्यर्थः॥ उपदेवस्यसुप्त्वादनुदात्तत्वम्।एकादेशउदात्तेनेत्येकारउदात्तदृतिभावः॥अनुदात्तदृति।फिट्स्वरेणान्तस्योदात्तत्वेशेषनिघातेनेतिभावः।अग्निमुखवाच्यसुत्पन्नंप्रातिपदिकमर्वाडिति विवक्षितमित्यर्थदृति॥वृद्धत्वस्यमाणंप्रातिशाख्यंयत्कात्स्न्यात्तत्कात्स्न्यतस्तैपदिकोदाहरणविषयम्।ननूनपाच्छब्दोयंपतिशब्दयोरितिअस्ययद्यपीत्यादिःशेषनिघातदृति॥ वाकालदृतीति।फलितार्थस्तुनेदमाविग्रहस्तुवःकालेयस्येतिबोद्धः।ऊशब्देनस्वोच्चारणकालोलक्ष्यतेऽयदृति।निपातआद्युदात्तादृतिआकारउदात्तः।यच्छब्दस्तुफिट्सूत्रेणअर्वाड्।अकारोनुदात्तः।तस्मादितः।अतन्त्रमितिउपेयिवाननित्यत्रउपसर्गादवाविवक्षितमित्यर्थः।ननुतत्रईयिवांसमितिस्त्रिधदृत्यादिप्रयोगदर्शनादविवक्षा सुःदृहलविवक्षाप्रमाणंकिमितिचेल्लक्ष्यदर्शनंप्रातिशाख्यादिकंचेतियद्दाणातथाहि।येरादित्यत्रएकारः।ननूनपाच्छब्दोपतिमित्यत्रपदपाठेऽरीतौचार्थोदात्तोदृतिसकलबहुमतमितिदिक्।ननूनपाच्छब्दोपतिशब्दयोरुभयवनस्पत्यादिषुयुगपदितिपूर्वोत्तरपदयोरनुदात्तत्वेकृतेअनुदात्तपदमेकवर्जमितिशेषनिघातः।पूर्वपदभूतयोस्तनूशचीरेतयोर्यः।ऊयपार्श्वेकिंस्वरितत्वंप्रातिशाख्येउक्तम्।जात्यवदानथावान्तौतनूशचीतिपूर्वयोरिति।तथास्वरितार्द्धस्योदात्तत्वेप्रातिशाख्यमपि।एकाक्षरसमावेशेपूर्वयोःस्वरितःस्वरःतदर्धमात्रार्द्धमेववा१अनुदात्तपरःशेषःसउदात्तश्रुतिर्नचेत्।उदात्तंवोच्यतेकिंचित्स्वरितंवाक्षरंपरमिति॥ अस्यतथापीतिशेषः।तेनोदीतौअनुदात्तौप्रयुंक्तेदृतिभावः॥जात्यवदेति॥पूर्वपदभूतयोस्तनूशचीशब्दयोरन्तोजात्यवदिति।अतोऽन्यत्स्वरितंस्वारंजात्यमाचक्षतेपदेदृतिलक्षितोजात्यः॥उदात्तस्वरितपूर्वस्वरितादेकपदेस्थितःस्वरितोजात्यदृतिनदर्थः।तेनतुल्यंतद्भवतुअस्यान्तउदात्तश्रुतिकदृत्यर्थः॥तथावाअसंहितवद्भवासंहितवद्भवेत्यर्थः।पद्यादींस्तुद्युदात्तानामसंहितवद्भवणनिर्देशान्तरमस्यपाठात्असंहितवदित्यनेनकेवलमनुदात्तत्वम्।संहितवदित्यनेनार्धानुदात्तस्वरितत्वमितिनद्राष्येस्पष्टम्।तथेति।लक्ष्यदर्शनवत्प्रातिशाख्यमपिप्रमाणमस्तीत्य

स्वरूपेवानपेक्षयेति।श्लोकेऽउदात्तादितिस्वतन्त्रोदात्तादित्यर्थकमितिभावः।एवकारइति॥तच्छ्रवार्थंदीर्घादिष्वपिसमांशेदात्तकस्वरितस्यैवपाठादितिभावः।एतेनैतेन।
पूर्णमित्यकावित्यपास्तंवाशब्दस्तुपादपूरणायेतिबोध्यम्।अप्राकृतइति।स्वरितविशेषइत्यर्थः।स्वारइति॥स्वरएवस्वारःस्वार्थेण्।स्वरितोदात्ताभ्यांपूर्ववर्णगइत्यर्थः।
तस्यतत्रैव॥तदुक्तंभाष्ये।अर्द्धह्रस्वशब्दोर्द्धमात्रायांइति।हरिरप्याह।प्रमाणमेवह्रस्वादावनुपात्तंप्रतीयइति।अनुपात्तमपिअर्द्धमात्रारूपंप्रमाणमेवोपलस्यतद्

अर्द्धमात्रः।पूर्वयोरुदात्तानुदात्तयोरेकत्रसमावेशेसतिस्वरितोबोद्धव्यः।तस्यस्वरितस्यस्वतन्त्रोदात्तापेक्षयोदात्ततरार्द्धमात्राबोद्धेति।क्वचोश्चादित्यादिह्रस्वापिश्रुत्यर्थम्।अर्द्धवेतिदीर्घाभिप्रायम्।अनेनैवह्रस्वस्यापिसंग्रहाद्व्यापकत्वादिदमेवादर्तव्यमितिसूचयितुमेवकारः।अनुदात्तइत्यादिपरिशेषसिद्ध्यर्थं
कथनम्।शेषेऽनुदात्तश्रुतिःस्यात्।किमविशेषेणेत्याह।नचेत्यादि।उदात्तस्वरितपरंविहायेत्यर्थः।शाकल्योप्याह।अप्राकृतस्तुयःस्वारःस्वरितोदात्तपूर्व
गः।उदाहार्यार्द्धमस्याधिष्ठेनिघ्नन्तिकम्पितमिति।उदाहार्यउदात्तरूपःअर्द्धह्रस्वशब्देनअर्द्धमात्रालस्यतइतिहरदत्तादिग्रन्थास्तुमतान्तरपरतयाकथं
चिन्नेयाः।क्वेति।किमेतत्तित्वरितम्।वइति।अनुदात्तंसर्वमपादादावित्यधिकारादनुदात्तम्।अग्न्याइति।अशेःक्वनिनिनित्स्वरेणाद्युदात्तंसंहितायांत्वे
कादेशउदात्तेनोदात्तइत्योकारउदात्तः।येअराइति।हयवपिफिट्सूत्रेणान्तोदात्तम्।एकादेशस्तुपक्षेस्वरितः।स्वरितोवानुदात्तेपदादावित्युक्तेः।मुखंचना
सिकाचेतिविग्रहेप्राण्यङ्गत्वादेकवद्भावेमुखनासिकमितिस्यादतआह।मुखसहितेति॥तुल्यास्य॥आस्येभवमास्यंशरीरावयवाद्यतइत्यभिप्रेत्याह।तान्त्वादीति ॥

तथैतत्स्थेलाराजआह।एवंचलोकेन्यशरवासुचदीर्घादिष्वर्थमात्रैवोदात्तेतिभावः।मतान्तरेति।प्रातिशाख्योक्तमतापेक्षयेतरवेदलोकसाधारणमतान्तरेत्यर्थः।कथंचि
दितिलस्यतेदर्थंशपरमिदंभाष्यतेरुढिशक्तेरेवप्रतीतेरितिभावः।दत्युक्तेरिति।नोदात्तस्वरितोदयमितिनिषेधस्तुउदात्तादनुदात्तस्येत्यस्यैवानन्तरस्येतिन्यायादितिभावः॥आस्यश

प्रश्लेषबलादिति॥प्रकृष्टोयत्नःप्रयत्नःप्रकर्षश्चवर्णोत्पत्त्यव्यवहितप्राक्कालिकत्वरूपइतिभावः॥चकारेणेति॥अत्रयथानासिकायाःस्थानत्वंतथान्यत्रनिरूपितम्॥
मुतत्कालेति॥एषांपिसात्युक्तार्थानुवादत्वेनात्रशास्त्रप्रवृत्त्यभावादितिभावः॥नासिद्धंस्यादिति॥तत्रश्चगोधुड्भ्यामित्यादौपत्वजश्त्वानुनासिकेषुअष्भावोनस्यात्॥न
मातिदेशान्तरवदत्रापित्रिपाद्यांप्रवृत्तौनदोषः।सपादसप्ताध्याय्यामपिपूर्वंप्रतिपरासिद्धत्वापत्तेः॥मध्येपाठस्त्वविप्रतिषेधसूत्रस्यचसामर्थ्याश्रयणेतुविनिगमनावि

आभ्यन्तरेति॥एतच्चप्रश्लेषबलाल्लभ्यतेतुल्यास्यंकिमितर्हि॥अत्रपकारस्यतकारेपरेभरोभरीतिलोपोमाभूत्प्रयत्नग्रहणंकिम्।यांकृश्नोतीति।शस्य
लोपेनाऽमड्भ्यामिति।नासिकाचेतिचकारेणस्वस्ववर्गानुकूलंतात्वादिसमुच्चीयते।अनुनासिकादृतिनैतिरीयाणांप्रातिशाख्यम्॥य
मनुस्वारनासिक्यानासिकाअनुनासिकाश्चेतमादृतिकात्यायनप्रातिशाख्यम्।वर्गोऽमाऽमड्भ्यामाअनुनासिकाभवन्तिचशब्दात्स्वस्यानाद्यपरित्यागेन
नासिक्यश्चनहीतीयमेषामित्यर्थादृतितद्ग्राह्यंच।एदैतोरित्यादौतपरत्वमसंदेहार्थंनतुतत्कालग्रहणार्थम्।तेनप्लुतस्यापिसंग्रहः॥पूर्वत्रासिद्धं
मित्येवंसतत्रोविधिःस्यात्तर्हित्रिपादीपूर्वंप्रत्यसिद्धइत्येवलभ्येतत्रेपादिकंतुपूर्वंप्रतिपरंनासिद्धंस्यादतआह।अधिकारोयमिति।यद्यत्र
कार्येसिद्धत्वमिष्येततर्हिपूर्वत्रासिद्धमितिसूत्रेरथदत्यादौउत्वंनस्यात्।परत्वाद्रोरित्यस्यप्रसङ्गात्॥

प्रकृ
त्याऽपिअप्रवृत्त्यापत्तिरितिभावः॥रोरीत्यस्यप्रसङ्गादिति॥सिद्धेसिद्धत्वारोपात्सूत्रोदाहरणसंपत्त्यैपरत्वाल्लुग्येकार्यप्रवृत्तेरावश्यकतयापरत्वा
त्रिपादिकेकार्येजातेतत्राभावप्रतियोगित्वारोपेपिदेवदत्तहन्तहतन्यायेनस्थानिभूतरोरभावाद्रुत्वापत्तिरितिभावः॥स्पष्टंचेदंप्रकृतसूत्रेअवःपरस्मि
न्नित्यत्रपल्वतुकोरित्यत्रचभाष्ये॥

तयोर्वर्णयोरिति।पूरणगुणेतिनिषेधस्तुषष्ठीसमासस्यनतुकर्मधारयस्यबहुलग्रहणेनतदभावेभाष्योदाहृतविषयएवनान्यत्रेतिभावः।प्रथमान्तेनेति।प्रथमोपस्थितत्वादितिभावः।अयंपञ्चानेकमन्यपदार्थेतिसूत्रेभाष्येपरिनिष्ठितेति।अत्रचैकविभक्तिचापूर्वनिपातदृतिज्ञापकम्।अन्यथामालामतिक्रान्तदृतिविग्रहेऽतिपदस्यापिनियतविभक्त्यन्तत्वेनैकविभक्तीत्यस्यवैयर्थ्यालाभः।एकस्थानियतविभक्तिरेहितद्ग्रहणायैकविभक्तीतिसार्थकंपरिनिष्ठितविभक्त्यासमासेत्वतिक्रान्तमतिक्रान्तेनेत्यादिक्रमेणतस्यानियतविभक्तिकत्वंस्यादेवेतिभावः।अतएवतत्पुरुषेतुल्यार्थेतिसूत्रेभाष्येपरमेकारकेपरमेणकारकेणेत्यादावतिप्रसङ्गमाशङ्क्यप्रतिपदोक्तपरिभाषयासमाहितमितिभावः॥अत्रचेतिसूत्रेदृत्यर्थः।प्रश्लेषेआकारप्रश्लेषेनिर्देशःलिङ्गमित्यन्वयः।निर्देशेनाकारहकारयोःसवर्णभावबोधकेनमानिकवचनकल्पनापेक्षयाप्रश्लेषेणैवतात्पर्यकल्पनेलघीयदृतिभावः॥व्याख्यानादिति।एकंमारव्यानेमानंनुप्रयत्नभेदेननाऽऽस्यविवेनतत्प्रत्यारव्यानपरंभाष्यंतत्श्वनघच्चरयेतिसूत्रेमाखेतिभाष्येस्थितमिति॥शीतलशब्देदृति॥शस्यर्दकारेपरेदधीतीकारस्यशकारेपरेचेत्यर्थः।नचशऽःषाकारोच्चारणेनतच्छकारस्यैकारेनदीर्घदृतिवाच्यम्।शीतलशतयोर्वर्णयोरितिव्याख्यानात्।प्रथमान्तेनपरिनिष्ठितविभक्त्यावाविग्रहदृतिसिद्धान्तात्।क्रत्यकदृतिप्रकृतिभावः।नाऽऽकलौ।आकारसहितदृति।अत्रचकालसमयवेलास्वित्यादिनिर्देशःप्रश्लेषेलिङ्गमानंवैमपिदृश्यतेदृत्यादौगुरोरनृतश्चदृतिप्लुताकारात्परस्यसनःसस्यषत्वंस्यादेवेतिवाच्यम्।आश्रवआश्रेतिहूदृसवर्णदीर्घेणदीर्घात्परत्रप्लुतोपिप्रश्लिष्यतदृतिव्याख्यानात्।यणादिशीतलशब्देसवर्णदीर्घआदिशब्दार्थः।अत्रेति।अत्रैवेत्यर्थः॥ॐहेशीऽइोभावात्।किंतुश्याधातोःकेऽवमूर्निस्पर्शयोःश्यदृत्यनेनसंप्रसारणेश्योऽस्पर्शदृसुनेनैत्वाभावेचनिष्पन्नाच्छीतपदात्प्रातिपदिकात्सुपिशीतलशब्दस्यदीर्घात्शीतशब्दोदिविगादिषुगणस्यैवदर्शनेचपठ्यतेकिंचनेनापूर्ववचनकल्पनापेक्षयासूत्रोदाहरणत्वमेवतस्ययुक्तमितिभावः।अत्रैवेति।ग्राहकसूत्रस्थेत्यर्थः।तीतिसूत्रेतपरस्यमानमानदिचुरादिण्यन्तात्कृतेपौर्वापर्यालुड्यचीकृतदित्यत्रदीर्घऋकारस्यस्थानेह्रस्वएवयथास्यादित्यर्थम्।पूर्वेणाऽग्रहणेतूद्देश्येनविधेयेनचऋकारेणानन्यत्वाद्दीर्घग्रहणेननतस्यस्थानित्वंनवाआदेशत्वंप्रसक्तमितिनार्थतत्यात्।नचतपरसूत्रेणलकारग्रहणार्थंतत्।स्थानेन्तरतमपरिभाषयाऋकारस्थानेतस्यवारणेनतद्ग्रहणेफलाभावात्।नचैवमपितेपिभाष्येमानत्वात्सवर्णग्रहणप्रसक्तेस्तदैयर्थ्यम्।नपरत्वाभावेआदेशान्तरनिरस्यर्थत्वेनस्वरूपाभ्यनुज्ञानार्थतयाःपूर्वबोद्धत्वाभावेनाविधेयत्वात्।कृतेतुतपरत्वेभाष्यमानतापीत्यन्यदेतत्॥

हिरुगित्यादि। एषांक्रियासमानाधिकरणत्वाल्लिङ्गाद्यनन्वयित्वाच्चतदर्थस्यक्रियात्वमित्यभिमानः। एषामन्वयेषु पाठस्तुअप्रातिपदिकत्वेप्यकर्मकार्थः स्यात्। एतेनतेषु पाठसामर्थ्यात्
तुल्याभावदित्यपास्तम्। नन्वेषांक्रियाकाङ्क्षादर्शनेननक्रियावाचकत्वमतआह॥शिष्येदृति॥कालोपिधात्वर्थएवेतिनक्रियावाचकत्वहानिस्तस्यचधातुत्वेआदेचउपदेशेइत्यात्वं
स्यात्तद्भिन्नेमितिकंधातुत्वनिमित्तकंचेतिस्पष्टमेव। अत्रप्रत्ययस्यैवधातुत्वापत्तिर्बोद्धातिङन्तस्तूपदेशभावान्नात्वप्रसक्तिरित्याहुः॥ननुषष्ठप्रकृतसूत्रेधातुग्रहणासंभव
त्युक्तोभाष्येदृतिनतद्धातुत्वनिमित्तकम्। किंचाशितीतिप्रसज्यप्रतिषेधोपिशित्स्वरत्वयोग्यस्यैवात्वविधानान्नात्रत्वप्रसक्तिरपिचवासादृश्यमन्यानभिहितक्रियावाचकत्वे
नेतिनदोषोतआह॥चेति॥सूत्रशेषभाष्योक्तेषाणवयतिवृयतीत्यादिषुचधातुत्वेशास्त्रविषयतयासाधुत्वापत्तिरितितद्व्यावृत्तयेतदितिभावः॥उदिकरणेनेति॥इदमुपलक्षणम्।
भ्वादयःकिम्। हरुक्ष्टथगित्याद्यव्ययानांशिष्येदृतिभावार्थंनिङन्तस्यचमाभूत्। स्तंभ्वादीनामुदिकरणेनसौत्रांधातुत्वंज्ञाप्यते। चुलुंपादीनांतुबहुलमे
नन्विदंभ्वादिगणसूत्रेणसंग्रहःचादयः। अद्रव्यार्थाःकिम्। पशुः। लिङ्गसंख्यान्वितंद्रव्यम्। दृहतुस्यादेव। लोधंनयन्तिपशुमन्यमामाः। पशुदृतिसम्यग्
उपसर्गः। निसदुसदृतिसान्तो। निसस्तपतावितिनिर्देशात्। अयोगवाहानामविशेषेणेतिप्रकरणेनिष्कृतंदुष्कृतमित्युदाहृत्यदृडदुपधस्यसकारस्ययोविसर्ज
नंदृतिनाथकारोक्तेश्च। उपसर्गस्यामतावितिसूत्रेणामनोप्येवम्। निरःकुषःसुदुरोरधिकरणेदृतिनिर्देशाद्रेफान्तावपीतितत्रैवसूत्रेहरदत्तः॥दृतिसंज्ञाप्रकरणम्॥ *
तत्प्रकृतेकचित्यनुवादेनाङ्गिधानेनसार्वधातुकेपिउत्वकरणविधानेनचधातुत्वम्। जुचंक्रम्येत्यत्रपठितजोः जपजमेत्यत्रपठितपसः ऋतिप्रभृतीनांचकेषांचिद्धात्वधिका
रविहितकार्यादेश्यत्वाद्दोद्यम्। एतेष्वस्थितस्यतेषांपाठस्थभंशेनुमीमतेदृतिभावः। मैत्रेयाद्यन्यसंमतंसमाधिमाह॥बहुलमिति। सम्यगर्थेदृति॥नचलुब्धमृषिंनयन्तिपशुंमन्य
मानाइतिनिरुक्तेपशुमितिसानुस्वारपाठात्तत्रपञ्चितिलुप्तविभक्तिकंसत्ववाचीतिवाच्यम्। लोपमित्यनवगतमितिहाष्योक्त्यातन्मात्रनिर्णायकेनिरुक्तेपशुशब्दंशेन्यथापाठेसा
नाभावात्। स्पष्टंचेदंप्रकृतसूत्रेहरदत्तग्रन्थेदशधातोमाधवग्रन्थेचेतिदिक्। वामनोप्येवमिति। तन्नहिदुःसान्तदृतितेनोक्तम्॥ दृतिसञ्ज्ञाप्रकरणम्॥

योजनमेति॥यद्यपितदनुवृत्तेरेवसिद्धेसामर्थ्याच्छब्दव्यापारेणश्रमणेनलभ्यतेमूलोक्तार्थस्तथापिमन्दबुद्धिसाधारण्येनस्फुटत्वायैवमेवोक्तम्।सदृति॥अत्रनेवस्यादितिभावः॥द्यु
मिति॥अत्रेकारस्यैवस्यान्नत्वन्यस्येतिभावः।सोर्लुगिति॥अतएवदीर्घोनेतिभावः॥तच्चेति॥दृक्दृतिपदंचेत्यर्थः॥अनेनात्रसूत्रेपदोपस्थितिपक्षदृतिसूचयति॥अचोञ्णितिअौ
णृत्यादितुलिङ्गस्मृत्यपेक्षयादुर्बलत्वेनप्रथमतोनित्यदार्थादिघटितवाक्यार्थबोधेवृत्तेर्निर्दिष्टस्यानिकलेनोपस्थितस्यापिदृक्पदस्यवाक्यार्थेऽनन्वयः।सार्व
धातुकेत्यादितुतदुपस्थितिंविनास्यान्यकाङ्क्षाशान्यभागेबोधएवनेतिविशेषः।एवंचपदश्रुतिनिमित्तेषापदैकवाक्यतयान्वयवत्यन्तरङ्गा॥स्थानषष्ठीत्वनिर्णयेउपस्थिता
लोन्त्यविशेषणा अनन्त्यस्यगुणाव्यावृत्तयेवाक्यैकवाक्यतयान्वयदृतिबहिरङ्गसातदाह॥दृशन्नाङ्गस्येत्यादि॥मृज्योरवयवस्येति॥एवंचस्थानषष्ठीत्वाभावनिर्णयेना
दृक्कोगुणवृद्धी॥गुणवृद्धिशब्दाभ्यामिति।एतच्चपूर्वसूत्राभ्यांगुणवृद्धिपदेअनुवर्त्यगुणोवृद्धिरितियेगुणवृद्धीदृतियोजनयालभ्यते।तेनेहन।दिव
औत्।द्यौः।त्यदादीनामःसदममाषष्ठ्यन्तप्रतिसूत्रेषष्ठ्यन्तस्यानुकरणात्कब्दस्वरूपपरतयानपुंसकात्सोर्लुगितिभावः।पदमिति।तच्चसंभवतिसामाना
धिकरण्येदृग्नस्याङ्गस्येत्यादिक्रमेणसंबध्यते।मिदेर्गुणःमृजेर्वृद्धिरित्यादौतुसामानाधिकरण्यासंभवान्मृदिमृज्योरवयवस्यैकदृतिसंबध्यते।यत्तुदृक्एवस्या
नेस्तदृतिप्रत्ययास्यातेऽपि च्छतृशीकाकृतोक्तमनियमप्रसङ्गेनियमार्थमिदमित्यादितत्सर्वंभाष्यविरोधादुपेक्ष्यम्।तच्छेषपक्षंदूषयित्वापदोपस्थितिपक्षस्यैवभाष्येस
मर्थितत्वादित्याहुः॥ओ लोन्त्यस्येत्यस्यप्रवृत्तिरेवनेतिभावः॥नियमार्थमिदमिति॥तत्तद्विधायकैर्विहितयोर्गुणवृद्धोरलोन्त्यस्येतिवदिदमपिस्यानिनियमार्थमितितदाशयः॥त
त्सर्वंभाष्येति॥द्वयोर्नियमयोःसार्वधातुकेत्यादावविरोधेनेगूरूपस्यान्त्यस्येत्यर्थोवाच्यः॥अन्त्यस्येकदृतिवा।उभयथापिद्वयोर्विशेषणविशेष्यभावसत्त्वान्तच्छेषपक्षेपर्यव
सानम्।सःअलोन्त्यस्येतिनियमःशेषोविशेषणमस्येतितदर्थः।तस्यालोन्त्यस्येत्यस्यविशेषणमितिवा।एवंचमिदेर्गुणदृत्यादौपरस्परविरोधादनवकाशत्वेनसर्वादेशगु
णापवादत्वादविरोधदृतिभावस्तदाह॥तच्छेषपक्षमिति॥

दूषणोद्धारस्त्विति॥मिदेरित्यत्रमिदर्मिदिस्तस्येतिव्याख्यानान्नदोषः॥पुगन्तेत्यत्रपुक्यन्तोलघ्वीउपधेतिव्याख्येयमित्यादिभाष्योक्तदूषणोद्धारस्त्वित्यर्थः।नन्वत्रयण्निष्ठापयतीत्यादौदोषः॥गुणेकृतेऽङ्गद्वारूपसिद्धेः।अतएवसमयाच्चयापनायामितिनिर्देशःसंगच्छतेनतदाह॥कौस्तुभेस्यष्टीकृतमिति॥नन्वेवंतर्हिकिमर्थंप्राचांपक्षउपेक्षितदृतिचेच्छुण।स्नूपधांशेदृक्परिभाषानुपस्थितावनिग्लक्षणत्वाद्विनमित्यादौगुणनिषेधानापत्तिर्भियासउपेक्षितदृति।क्ङितिचेतिनिग्लक्षणत्वेपिगुणनिषेधप्रवृत्तिज्ञापकत्वाश्रयणेतुनस्यपदोपस्थितिपक्षज्ञापकत्वमेवोचितमितिदिक्॥दृत्वादाविति॥आदिनाऽकलन्तलक्षणोनुमृदितोनुमित्यादिच॥अचोःसंभवादिति॥नुमोमित्वेतुज्ञानाच्चेत्यादौचरितार्थमितिमुचादावन्त्यस्यैवस्यादितिभावः॥दीर्घःसिद्धइति॥तच्छब्देनयस्यविहितस्यसमुदायःपरामृश्यतेइतिभावः।यद्यपितस्यान्त्यादृतिर्व्यञ्जनेपिभवितेत्या

तच्छपक्षेपिदूषणोद्धारस्तुशब्दकौस्तुभेस्यष्टीकृतोस्माभिः।अचांमध्यदृतियत्तुप्राचोक्तमस्यादचःपरदृति।तन्न।श्नुसुवादीनामित्यादवन्त्यस्याचोसंभवात्।तस्यैवान्तावयवदृति।तेनत्रपुणीत्यादौअङ्गस्यनान्तत्वेनदीर्घःसिद्धः।परादित्वेसतिसिद्धेत्।अभक्तत्वेतुवहंलिहदृत्यत्रवहाभ्रेलिहदृतिग्रहणंव्यर्थंपरिभाषामुमिमीनुस्वारोनस्यात्।अपदान्तत्वात्।यत्त्वभक्तत्वेत्रपुणीतिदीर्घोनस्यादितितन्नादादिग्रहणंस्यादिनुमर्थमित्यङ्गसञ्ज्ञात्रस्थवर्तिकेनैवदूषितप्रायम्।स्थानेयोगेति।स्थानेनयोगोस्यादृतिविग्रहः।निपातनादेत्वम्।अनेकविधमिति ॥

द्वैतासत्ययवेटोलघूपधाङ्गावयवत्वेनप्राप्तस्यगुणस्यदीधीवेवीटामितिनिषेधारम्भेपालोकव्यवहारेणचावयवावस्यसमुदायावयवत्वाङ्गीकाराद्दत्वनदोषः।तथापितथात्रस्यात्वंनपञ्चारत्नीनीत्यादौपदस्यविभज्यान्वाख्यानेउत्तरपदस्यापिनान्तत्वापत्तावगन्तेतिस्वरानापत्तेरितिस्पष्टंभाष्यादौ॥त्रपूणीत्युपलक्षणंतातापिण्डानामितिनलोपसिद्धेः।तानितानीत्यर्थेछःछन्दसीतिशेर्लोपेनदुदाहरणम्॥स्थानेनेति।स्थानशब्दार्थेनेत्यर्थः।तन्निरूपितसंबन्धःषष्ठ्यर्थोनतुतद्रूपःसंबन्धस्तदर्थदृतिअनेनध्वनयति॥एत्वमिति॥व्यधिकरणबहुव्रीहिरप्यतएवेतिबोद्धव्यम् ॥

गुणप्रमाणेति॥प्रमाणस्य दुस्त्वादेर्गुणत्वेपि ब्राह्मणवसिष्ठन्यायेन दृष्यगुक्तिः। गुणशब्देनोक्तत्रितयातिरिक्तधर्ममात्रंतेनानान्तर्यमेवेतयोरान्तर्यमित्यादिस्थानेन्मरतमसूत्रस्य भाष्येणनविरोधः। अन्तरतमाभावएवगुणविधौऋकारोकारयोःसादृश्यमितितदर्थः॥बाह्यानांविवारादीनांसाक्षादूर्णावृतिलेप्यौपचारिकंगुणत्वंबोद्धम्। अनुकरणमिति॥अचीत्यादिसप्तम्यन्तार्थकस्यस्वतन्त्रतच्छब्दस्यनिर्देशेनस्वरूपस्मरंव्याख्यानाद्दुलस्यसंस्कारानुरोधाच्च। सप्तमीतुसप्तम्यन्तानामेवतच्छब्दार्थत्वमितिबोधनाय। तद्बोद्धार्थस्यनिर्दिष्टेदृत्यनेनसामानाधिकरण्यायचेतिभावः। शब्दार्थकत्वेनत्वनुकरणत्वव्यवहारदितिबोद्धम्। दिशिरुच्चारणेति॥अतएवजनपदेलुबित्यादौनदोषः। नह्यर्थउच्चारितोनापिशब्दस्यनिरन्तरदृतिभावः॥अचियणित्युक्तेदृति॥अचिउपश्लिष्टस्ययणित्युक्तेदृत्यर्थः। दृदंवसंहितायामितिसूत्रेभाष्येस्पष्टमाफलितेति॥सप्तम्यन्तार्थेऽव्यवहितेषष्ठ्यन्तार्थोप्यव्यवहितएवेतिभावः॥नसूत्रितमिति॥स्वरूपमित्यतःप्रागिति स्थानार्थगुणप्रमाणकृतमित्यर्थः। बलीयदृतितेनचेतास्तोतेत्यत्रप्रमाणतआन्तर्यवानकारेणेतिभावः। तस्मिन्निति॥सप्तम्यन्तानामनुकरणम्॥निःशब्देनेर्स्तयेपेक्षादिशिरुच्चारणक्रियः। अचियणित्युक्तेव्यवहितेऽव्यवहितेचसतिप्राप्तमव्यहितेएवेतिपूर्वस्यपरस्यचप्राप्तंपूर्वस्यैवेतिचनियम्यते। अव्यवहितस्येतितुफलितार्थकथनम्॥परस्यपदिति। तस्मादित्युत्तरस्यादेरितितुनसूत्रितम्। आदेरित्यंशस्यसर्वादेशबाधकत्वापत्तेः। सिद्धान्तेतुपरत्वात्सर्वादेशत्वंबाधकमित्यनुपदमेववक्ष्यति। अनेकाल्शित्सर्वस्येतिसूत्रेकृताजश्शसोःशिरित्युदाहृतंतन्न। सर्वादेशतायाःप्राक्शित्वस्यैवलाभात्। तन्नहिडाणलोरिवानुपूर्व्यादनेकाल्त्वेनैवसर्वादेशत्वमितिसिद्धान्तः॥ शेषः। तत्रादेरितिषष्ठ्यर्थवाक्यंतत्रोत्तरस्येत्यनुवर्तनेस्थानषष्ठीचेयंपञ्चमीनिर्देशेनयत्कार्यंतदुत्तरसंबन्धिउत्तरस्यस्थानेविधीयमानंचादेर्बोद्धमितिवाक्यार्थःयंवाक्यभेदसामर्थ्याच्चादेरित्यंशंविनापिक्वचिदंशान्तरप्रवृत्तिः। आदेरित्यंशस्यानुवृत्तौनत्रेत्यस्यास्यपरत्वबोधकशब्देनयत्रविधानंतत्रेवेतिनित्यंङितदृत्यादौनप्रवर्त्तनदृतिभावः॥वक्ष्यतीति॥नचानेकालित्यतःपूर्वमेवतस्मिन्निनिर्दिष्टपूर्वस्यतस्मादित्युत्तरस्यादेरितिसूत्रेकृतानपठितेदृतिवाच्यम्। आदेरित्यंशेषष्ठीस्थानेदृत्यस्यासंबन्धेआजसेस्सुगित्यादावपितस्यप्रवृत्त्यापत्तेः। संबन्धेमध्येतस्मिन्निनितस्मादित्यनयोरपितत्संबन्धेतयोरप्यागमविषयेऽप्रवृत्त्यापत्तेरितिदिक्॥डाणलोरिवेति॥ आदेशानांप्रत्ययाधिकारेषठेपिवाक्यार्थबोधोत्तरमेवप्रत्ययस्यज्ञानेनोपदेशेणकारेदृत्वाप्रवृत्ते स्तदुत्तरंलस्येप्रवृत्तिकालेदृत्वेप्यनेकाल्त्वात्तेरितिभावः॥

प्रवर्तनएवेति॥उपपादितमेतत्॥शब्दान्तरप्राप्तेति॥मद्यक्ति संबन्धितयापूर्वं प्रवृत्तिस्तद्यक्तिसंबन्धितयैवपुनःप्रवृत्तेःकृताकृतप्रसङ्गित्वंप्रसिद्धमितिभावः॥कृताकृतेति॥व्यक्तिविशे
षानाश्रयणेनेत्यर्थः॥वृद्धौतत्त्वदुषेत्यस्यतत्त्वनप्राप्तिः॥साहचर्येणविभक्तिनिमित्तानामेववृद्धादीनान्तत्रग्रहणात्।नित्यत्वेनैवसिद्धेवाचनिकपूर्वविप्रतिषेधाश्रयणेफलाभावाच्चेतिदि
क्॥अन्तरङ्गत्वादितिभाष्येलयन्त्रत्ययान्तरंनतुतयवादेशः।उभयीत्यत्रद्विमात्रजितिप्रत्याहाराश्रयणेनसाधितः।एवंचोभयशब्देविकल्पस्यप्राप्तिरेवनेतिउक्तम्॥अन्तरङ्गत्वंबलवत्त्वेना
दृत्यादाविति।आदिशब्देनातोभिसऐसूदितिगृह्यते।परत्वादिति।अतएवादेःपरस्येतिएथकूक्रियतेदृत्युक्तम्।उत्तरस्येत्यशस्तुऔशेसोरपिप्रवर्तनएवायत्तुप्राचाआदेरितिसूत्रंविवृण्वता
प्रज्ञमीनिर्देशेनेत्ययुक्तंतदसंबद्धमितिस्पष्टमेव।परनित्येति।परान्नित्ययथातुदति।रुणद्धिपरमपिलघूपधगुणंबाधित्वाशप्रभो।तथाराधेर्णिच्।रन्धयति।राम्यपधावृद्धिंबा
धित्वाधिजभोरित्यत्रमनचसोपिशब्दान्तरप्राप्त्यानित्यदृतिवाच्यम्।कृताकृतप्रसङ्गमात्रेणापिक्वचिन्नित्यताभ्युपगमात्।अन्तरङ्गंप्रथा।उभयेदेवमन्वृषाः।दृहप्रथमचरमेति
परमपिविकल्पंबाधित्वासर्वादीनीतिसर्वनामसञ्ज्ञाविभक्तिरनपेक्षत्वेनान्तरङ्गत्वात्।अपवादोपियद्यन्यत्रचरितार्थस्तद्यन्तरङ्गेणगुणेनबाद्यतएव।तद्यथा।अग्नेदृंह
ग्रामेदृहसर्वेदृत्यत्रान्तरङ्गेणगुणेनसवर्णदीर्घोबाद्यते।सचयद्यपियणगुणयोरपवादस्तथापिसमानाश्रयेचरितार्थः।तथाचवार्तिकम्।दृणद्धिशीनामादृणःसवर्णदीर्घ
त्वादिति।असिद्धमिति।तेनपचावेदमित्यादावेतेस्त्वन।अकृतव्यूहादृतियद्यपिकृतमपिवानिवर्तयन्तीतिपरिभाषान्तरंपठ्यतेफलंचतुल्यम्।तथापिअकृतेत्येवलघुप्रक्षा
लनाद्धिपङ्कस्यदूरादस्पर्शनंवरमितिन्यायादितिभावः।नकुर्वन्तीति।यथानिषेदुषीमित्यादौक्वसोरिटमन्तरङ्गत्वात्प्राप्तमपिभाविनासंप्रसारणेनवलादित्वंनङ्कृतीत्यत्रोच्यनकुर्वन्तीत्यर्थः॥इति
परिभाषाप्रकरणम्॥एकमन्यत्रप्रपञ्चितम्।बाद्यतएवेति॥निरवकाशत्वरूपस्यबलवत्त्वबीजस्याभावात्॥तेनेति॥पूर्वानुअन्तरङ्गबहिरङ्गयोर्युगपत्प्राप्तावेवेतिभावः॥नकुर्वन्तीत्यर्थदृति॥यदि
त्वसेदुषदृत्यादौपदावधिकेन्नाख्यानेसेदुस्असितिस्थितेदृत्संप्रसारणयोःप्राप्तौप्रतिपदविधित्वेनशीघ्रोपस्थितिकत्वात्पूर्वंसंप्रसारणेवलादित्वाभावादितःप्राप्तिरेवनलक्ष्यानुरोधाद्धलप
रत्वाधिक्येवान्वाख्यानमितितत्सिद्धिरित्युच्यतेतदेषापरिभाषानिष्फलेतिबोद्धम्।अतएवभाष्येनकापिव्यवहृतेत्यन्यत्रविस्तरेणनिरूपितम्॥दृतिपरिभाषाप्रकरणम्॥

नन्वक्तिप्रसङ्गेऽकृतदोषस्याप्योकारादिभिर्दीर्घादिग्रहणंनस्यात्।उच्चरितएवशब्दः प्रत्यायकोनानुच्चारितइत्यणुदित्सूत्रेभाष्योक्तेः।नचोच्चारितस्यैवप्रत्यायकत्वेरहसिपुस्तकमीक्षमाणस्यबोधा
नुपपत्तिरितिवाच्यम्।तत्रापिपुस्तकदृष्टेःस्वीयसङ्केतोच्चारणसत्त्वादित्यतआह॥प्रत्याहारग्रहणेषिति॥एतेनदीर्घकारादेर्ग्राहकशास्त्रबलेनऽकारादिभिर्बोधितेषांमिकूपदेवत्त्वानुपस्थितत्वेनत
दुत्तरप्रत्ययार्थान्वयानुपपत्तिरित्यपास्तम्।इत्तिप्रयोज्योपस्थितिसत्त्वेनादोषाद्वानचणुदित्सूत्रंव्यर्थम्।नचप्रत्याहारेणमाद्यवर्णेषुचरितार्थम्।अन्यवर्णानामिवतत्सवर्णानामपिलक्षणयैवग्रह
णसिद्धेः।नचास्यचाविस्पष्टोच्चारितार्थम्।व्यक्तिपक्षेस्यप्रत्याहारसूत्रस्थतोभेदेनाणल्लाभादितिस्पष्टमणुदित्सूत्रेभाष्येदृत्तिचेन्नालस्यतावच्छेदकज्ञानार्थमेवतच्चारितार्थ्यात्।प्रत्याहारेत्युपलक्ष
णंतद्वाच्यवाचेतिचाअस्यचाविस्पष्टत्वपिसदृशाज्ञेयुलक्षणावश्यकत्वात्।अणुदित्सूत्रगृहीतलस्यतावच्छेदकीकृतलक्षणाविधीयमानातिरिक्तविषयेएवाप्रत्यवदृत्युक्तेः।अतएवयदादी
नामदृत्यादीनत्वसदृशवाज्ञेयुलक्षण॥नाजकलोअणुदित्यत्रतुनलक्षणातद्बोधकालेलस्यतावच्छेदकाग्रहादितिभावः॥तत्रप्रमाणमाह।दीर्घादिति॥अकृपदीर्घकारेणस्वसवर्णग्र
दकोयणचिप्रत्याहारग्रहणेषुतद्वाच्यवाच्येनिरूढालक्षणा।दीर्घाज्जसिचेतिज्ञापकात् त्वादिभ्यदृतिनिर्देशाच्चातेनेकूशब्देनषट्षष्टिगृह्यतेयणशब्देनसप्ता
भाव्यमानत्वेनसवर्णाग्राहकत्वेपिगुणानामभेदकत्वेनानुनासिकानामपियत्वानांग्रहणात्।अतोनास्तियथासंख्यम्।नचलस्यार्थबोधात्पूर्वमाविर्भावेणकार्यबोध
मादायययथासंख्यमस्त्विति।वाच्यम् ॥ ॐ हणेषितत्रनादिचीत्येवसिद्धमितिभावः।तेनलक्षणाङ्गीकारेण।भाव्यमानत्वेनेति॥विधीयमानविषयेलक्षणाभावस्यानुपदमुक्त
त्वादितिभावः॥अभेदकत्वेनेति॥स्वरूपेउच्चारितगुणानांभेदकत्वाभावेपिस्वरूपकृतभेदमादायसप्तत्वसंख्यानविरुद्ध्यते।यदितुअणुदित्सूत्रेणग्रहणाद्गुणविषयेगुणानां
भेदकतैवोचितेतिविभाव्यतेतदापिचत्वारोयणदृतियथासंख्यमसंगतमेवातदूधनयन्नाह॥अतोनास्तीति॥तत्खण्डनेएवाग्रहोनतुसप्तत्वसंख्यानमितिभावः॥अन्या
र्थबोधमादायेति॥त्वादिभ्यदृत्यादिनिर्देशोहितनात्पर्यानुपपत्तिग्रहस्यतत्सत्त्वएवसंभवेनसबोधआवश्यकस्तत्रचयथासंख्यसहायेनवाक्यार्थेनिष्पन्नेत्वादिभ्यदृत्यादि
निर्देशाल्लक्षणमाजायमानेपुनर्वाक्यार्थबोधेलक्षितदीर्घादीनांस्ववाचकान्वयिन्येवान्वयदृतिभावः ॥

स्थानेन्तरतमसूत्रेणैवेति॥व्यक्तिपक्षेव्यक्तीनामनन्त्येनसंख्याज्ञानाभावाद्यथासंख्यासंभवाल्लृस्यासिद्धेश्चेतिभावः। परेतुव्यक्तिपक्षेऽकलादिप्रत्याहारसूत्रेषुसर्वेऽकारादीनांग्रहणंदुरुपपादमनहितत्रलक्षणावर्तुंशक्यालक्ष्यतावच्छेदकाग्रहात्।एवंचतत्रप्रत्याहारसूत्रेषुजातिनिर्देशेनैवनिर्वाहोनान्यथा।एवंचाद्उपित्सादावपिजातिनिर्देशएवोचितः। अर्द्धर्जरतीयस्यानैचित्यात्।अतएवाणुदित्सूत्रेभाष्येप्रत्याहारेषुस्वज्ञावित्यादौचउक्तामनुपपत्तिमाशङ्क्यजात्याश्रयणमेवकृतम्।यथासंख्यसूत्रेचव्यक्तिसाम्यादवधर्मेऽपिप्रवर्ततेस्वतासीलूनःरित्यादौयथानाप्यत्रपक्षेऽकारादीलकासंख्यापतिः।लृत्वादिजातेर्ऋकारादावभावात्।नचजातिपक्षेऽणुदित्सूत्रेणग्रहणप्रत्याख्यानेऽप्रसंगादृदित्यादौऋकारेणलकारग्रहणायसावर्ण्यवचनस्थानेलृवर्णसदृक्षवदतिदेशाल्लकारेरेफापत्तिरितिवाच्यम्।कृञ्चानुप्रवाद्यर्थंतस्यातिदेशस्यानित्यत्वावश्यकत्वात्।तस्मात्तेनग्रहणप्रत्या

. एवमपितृतीयचतुर्थाभ्यामकारलकाराभ्यांप्रत्येकंत्रिषट्पञ्चाशदुपस्थितौलृवर्णानांरेफादेशस्यऋवर्णानांलादेशस्यचप्रसङ्गात्।तस्मादिहस्थानेन्तरतमसूत्रेणैवेष्टसिद्धिरित्यभिप्रेत्याहस्थानतआन्तर्यादिति।अनचिचेतिसूत्राट्टूवाग्रहणमनुवर्ततइतिनाञ्झलावितिसूत्रेकेयटः।एवंचसर्वत्रैशाकल्यस्येतिसूत्रंतत्पञ्चमभूतपूर्वोत्तरसूत्रद्वयंचनारभणीयमितिभावः ॥ ॐ स्थानेप्यप्रत्ययद्वयंशेषवाक्यभेदेनविधीयमानेजातिग्रहणप्राप्तसवर्णग्रहणनिषेधकस्तपरसूत्रेवदित्यादीनामदृश्यत्वादौनदोषः।एवंचात्रयणपदेनजात्याश्रयणेनापिनसवर्णबोधनमितिसौनक्तिकत्वादौअनुनासिकस्थानेपिनिरनुनासिकएव।अतएवस्थानेन्तरतमसूत्रेभाष्येऽस्यतदुदाहरणत्वमाशङ्क्ययथासंख्यमित्यनेनापिसिद्धमित्युक्तंतेनात्रतयोःफलाविशेषउक्तः।उञ्इतिसूत्रेनव्यानांप्रमादएवानचकलादिषुऋकारादिभीरूपसादृश्येनसर्वऋकारादिप्रतीतिरितिवाच्यम्॥अगादिष्वपिकिंचित्सादृश्यमाश्रित्यदीर्घादीनामपिग्रहणोपपत्तेः।ल्वादिभ्यइतिनिर्देशानामीषत्सादृश्येनापिग्रहणमित्यर्थज्ञापकतायायुक्तत्वात्।तदयुक्तमदुरुणसूत्रेभाष्येरूपसामान्याद्यासिद्धमिति।अणुदित्सूत्रेऽणग्रहणंतुप्रत्याहारार्थंवर्णेषुणकारादिभिश्चिह्नैःप्रत्याहारसूत्रस्थोयमितिप्रत्यभिज्ञासत्त्वादुपायान्तरपरमाचार्याःकृत्वाननिवर्तन्तदितिन्यायादिदमेवाभिप्रेत्यतत्रत्यमणग्रहणंप्रत्याख्यातंभाष्येइत्याहुरितिदिक् ॥

क्रियमेदिति॥अनचीत्यनुवर्त्यपर्युदासपरतयाहलिपरएवनित्यनिषेधइतिव्याख्यानेनेतिभावः॥विकल्पउक्तइति॥एवंचसर्वत्रशाकल्यस्येतिवदिदमपिप्रपञ्चार्थमितिभावः॥
असतीतियतुनादिनीत्यादिवृत्तावनचीतिप्राप्तिमुद्भाव्यत्रिप्रभृतिषुसर्वत्रेत्यनयोःप्राप्तिमनुद्भाव्यपुनर्दीर्घादित्यत्रानचीतिप्राप्तिरुद्भावितेहरदत्तेन।तस्यायमाशयः।निषेधेविकल्पेप्राप्तेरुद्भावनंनावश्यकंतद्विकल्पेविधिविकल्पस्यकालितत्वेनविधेरेवअप्राप्तविषयविकल्पसंभवादनित्यनिषेधेतुतदुद्भावनमावश्यकमितितन्न।विकल्पेपिनिषेधप्रकरणान्नञुल्लेखस्यावश्यकत्वेनप्राप्तेरुद्भावनस्यावश्यकत्वात्।मद्धेनञोसंबन्धोमण्डूकानुवृत्तिरग्रेदित्यत्रमानाभावाच्चासर्वत्रेतिसूत्रेस्थद्वित्वमात्रनिषेधकतेतिबोधयितुंतदनुल्लेखाच्च।
त्रिप्रभृतिषिचिस्थेनद्विषयेनकारषकारयोर्हिर्वचनाभावदतिमिश्रग्रन्थेनप्राप्तेरुल्लेखस्यकृतप्रायत्वाच्च।वृतिहरदत्तयोर्नादिन्याशरेचीत्यनयोरपिप्राप्तेरुल्लेखस्यबहुषुपुस्तकेष्वनुपलम्भाच्चेयतुदीर्घादाचार्याणामितिसूत्रेआचार्यग्रहणंपूजार्थमित्यभिप्रेत्यवाक्यकृदितिभाष्योदाहृतेविकल्पेउपपत्तिचिन्तार्थंक्रियतेतन्मुधैव।पूजार्थतायाःप्रामाणिकैरनुक्तेः।
त्रिप्रभृतिषिचिसूत्रेणकरायनग्रहणस्यापितथात्वापत्तेःनचेष्टापत्तिः।संस्कर्तेतित्रिसकारत्वपरकैयटहरदत्तादिग्रन्थविरोधात्।स्वग्रन्थविरोधाच्चअतएवप्रातिशाख्यभाष्येपिआत्वारश्चमितिमन्त्रेतत्कारस्यद्वित्वविकल्पउदाहृतः।माधवेनचास्तेदित्यत्रसकारस्यद्वित्वविकल्पउक्तः।एवंचधात्रंशदित्यत्रतकारस्यद्वित्वंसदिस्थितिरेवासतीतिदिक्।स्थानिवदादेशः।धात्वङ्कृतद्विताव्ययसुप्तिङन्तपदादेशइतिप्राचोक्तमतत्परिगणनमुदाहरणमात्रंवा।नाद्यः।सिच्वक्सचङ्ङादीनामादेशस्यणानचश्रवणसंग्रहापत्तेः॥
तिदिक्॥चङ्ङादीनामिति।आदिनाचिणनकेवलङ्यादेशानामेवासंग्रहदित्याह॥स्नादेशस्येति॥तदभावेह्यवादिषातामित्यत्रेट्नस्यात्।क्त्वादेःकादीनामित्वंनस्यात्॥शानेचःशेषत्वंनस्यान्नाहिदर्शदित्यादौअडिगुणोनस्यादितिभावः।ननुसिच्यादीनांप्रत्ययाधिकारेपाठात्स्नमत्प्रत्ययत्वमस्तीतिनस्यानिवत्वोपयोगःनचतेषांप्रत्ययत्वेविधानंव्यर्थमित्याहुर्मन्त्रेघसेतिसूत्रेचङ्ङिसिचामितित्रयाणांग्रहणेगौरवापत्तेःसिचोलुकितद्विषयेआदिःसिचदृतिस्वरापत्तिश्चेतिभाष्यकैयटयोःस्पष्टमित्यरुचेराह।चेति।तेनाग्रहीदित्यादाविडादेशस्यई रर्मिः
टोसङ्हदृत्यर्थंदृमुपलक्षणमव्ययस्यपदात्परंग्रहणवैयर्थ्यमपिदोषदृतिबोद्धव्यम्॥

अव्ययस्येति।अत्रत्वस्यैवदोषत्वमितिभावः।ननुअव्ययस्याङ्गत्वेफलाभावेनप्रत्ययस्यसुकानुप्रत्वेनचतदप्राप्तावकर्यतेनाव्ययसंग्रहोतआह। पदेति। तत्त्वेचततः परस्यनिधाना
र्थमावश्यकंप्रत्ययलक्षणेनसुबन्तत्वाच्चतत्त्वमितिभावः॥सिद्धत्वाच्चेति।अतएवात्रतुक्।नचसर्वेसर्वपदादेशादितिन्यायेनप्रस्तुत्वादत्रस्यस्थानेप्रस्तुत्यइत्यादेशेतस्याव्यय
त्वसिद्धिरितिवाच्यम्।अर्थवत्येवस्थानिवत्त्वमिति तात्पर्येणतुकोप्यर्थवत्त्वेनतादृशस्यान्यादेशभावकल्पनेमानाभावादितिदिक्।अनल्विधावितिकिमिति॥
विधिग्रहणविशिष्टंकिमर्थमितिप्रश्नः॥णत्वप्राप्तमिति॥नचसकारेखतोऽभिन्नत्वसत्त्वात्अभिन्नव्यवायेनेतिनिषेधात्कथंणत्वप्राप्तिरितिवाच्यम्।अतिदिश्यमानधर्मविरुद्ध
स्वाश्रयधर्मप्रयुक्तकार्याभावस्यातिदेशस्वभावसिद्धत्वात्।इदंचासिद्धवत्सूत्रेकैयटेस्पष्टम्॥तुकामदिति॥यद्यपिवत्वंहल्त्वाद्यपेक्षयाविशेषधर्मस्तथाप्येतद्वाक्योपप्लुतेवकारव
नान्यः।अव्ययस्याङ्गपदाभ्यांपृथग्ग्रहणंवैयर्थ्यात्।प्रस्तुत्येतिवृत्तिकारोक्तंतदुदाहरणमपिमन्दम्।तुकामात्रस्यानव्ययत्वात्।कृत्तेनसिद्धत्वाच्चेत्यशयेनाह।आदेशदिति।
अनल्विधावितिकिम्।तेनतस्मात्तस्यतस्मिंश्चविधौमाभूत्।तत्रअलाविधौयथा।व्यूढोरस्केन।अत्रसंस्कारस्यस्थानिवत्त्वेनविसर्गवदङ्गमाश्रित्याङ्गावयेदतिणत्वंप्राप्त
म्।अलःपरस्यद्यौःपन्थाःहलङ्यादिलोपेनाअलोविधौ।युकामः।वलिलोपेनाअलिविधौ।यजेःक्तः।कदृष्टः।हशिचेत्युत्वेनाअल्त्वेहस्यान्यवयवएवत्वतेतेनरामा
येत्यादौसुपिचेतिदीर्घःसिद्धः।नहिधौहियजादिलमाश्रित्ययज्झादेशावयवेनतुस्थान्यवयवइतितदेतत्सकलमभिप्रेत्याह।नतुस्थान्यलाश्रयइति।आश्रयणंचेहयथाकथंचिन्नतु
प्रधान्येनेवेत्याग्रहः।तेनप्रपठेत्यत्रवलादिलक्षणेण्वृन्।७) तुकारइतिवाक्येउपात्तधर्मापेक्षयानतस्यतत्त्वम्।सूत्रेकृप्रस्यान्यादेशभावमादायैवैतत्कृतवाक्योपप्लवादितिभावः॥क
दृष्टइति॥यद्यपीदंरूपमुत्वेगुणेवादेशेपाक्षिकलोपेनसिद्धंतथापिपक्षेकविष्टइतिस्यात्।कयिष्टइतिचेष्यतेइतिभावः॥स्थान्यवयवएवेति॥उपलक्षणमेतत्स्थानिरूपोपीतिबोद्धव्यम्।
अतएवादेशिन्यत्याश्रीयमाणेप्रतिषेधइतिभाष्येउक्तम्।नतुस्थान्यवयवइति॥अतः प्रत्ययत्वंस्थानिवत्त्वेनभवत्येवेतिभावः।अग्रहीदित्यादौग्रहोलिटीत्यनेनेरएवदीर्घविधा
नान्यत्वेनतस्यस्थानितेतितद्धतीत्वाश्रयस्यसिचोलोपस्यसिद्धिरितिबोद्धव्यम्।यथाकथंचिदिति॥व्याख्यानादितिभावः ॥

दूषयितेति। अङ्गस्येति सूत्रेभाष्येऽतिशेषः। एतदसिद्धौ दूषयितेत्यर्थः। विसर्गसत्वन्यत्रदृश्यः॥ अनेनतुवार्यतेदति॥ स्थानिनिसतियद्भवतितदादेशेपिभवतितत्रसतियन्नभवतितदादेशेपि नभवतीत्यर्थात्। अजादेशोऽजकार्यंलभतेनलभतेवेतिवाच्योर्थः। तत्रोपपत्तिमाह। शब्देति॥ पूर्वसूत्रेस्थानिवत्पदस्यतदुत्कार्यंलभतदुत्येतन्मात्रार्थकस्येहोभयार्थकत्वानदाश्रयणमितिभाव। यलोपदीर्घाश्रेति॥ यलोपदीर्घावादियेषामित्यर्थः। यलोपादयोदीर्घादयश्चेतियावत्। तेनस्वरादीनामपिसंग्रहः॥ यलोपादिश्चेवसिद्धेएवमुक्तिर्वैचित्र्याय। नहियलोपादिविधयेभावातिदेशप्र नानिषेधादिति। स्थानिवत्वनिषेधादित्यर्थः। अन्यः॥ अलिङ्ग्यर्थमिति। तेनवव्रश्चेत्यत्रषस्यसंप्रसारणंन। उरदत्वस्यस्थानिवत्त्वेनसंप्रसारणतयानसंप्रसारणदृतिनिषेधात्। नचोरदत्वं परनिमित्तंनेतिवाच्यम्। अङ्गस्येत्यधिकारेप्रत्ययेपरेनद्विधानात्। प्रागभ्यासविकारेभ्योङ्गाधिकारदृतिपक्षेदूषयित्वाआसप्तमसमाप्तेरितिपक्षस्यैवआकरेसिद्धान्तितत्वात्। किं चपूर्वसूत्रेणस्थानिप्रयुक्तमतिदिश्यतेनत्वादेशप्रयुक्तंवार्यतेनायकः पावकदत्यादौएचोयवावायावदत्यादीनामप्रवृत्तिप्रसङ्गात्। अनेननुवार्यते। शब्दाधिकारमा श्रित्यभावाभावयोरप्यतिदेशोयमितिस्वीकारात्। नपदान्तेतिसूत्रेयलोपदीर्घादिग्रहणंचेहलिङ्गम्। अतएवगणयतीत्यादौनवृद्धिः। स्थानिनिसत्यभवन्त्यास्तस्याअ देशेप्यभावातिदेशात्। उक्तंचाकाममतिदिश्यन्तांवास्त्वासच्चापिनेहभारोस्तीति। स्यादेतत्। पूर्वत्वस्यसावधित्वेनसन्निहितस्यैवअवधित्वमुचितम्। सन्निहितंचेहत्रयंस्था नीआदेशेनिमित्तंचातत्रनतावत् स्थानीअवधिस्तस्यादेशेनापहारात्। नाप्यादेशनिमित्तेवैयाकरणदृत्यत्रऐकारस्य यादेशापत्तेरित्याशङ्क्याह। अतः पूर्वत्वेनदृष्टस्यै ति। पूर्वत्वमुपलक्षणंननुविशेषणमितिभावः। एतेनअचःपूर्वत्वविधानादैचोः सिद्धमितिवार्तिकंव्याख्यातम्॥ एकिरितिभावः॥ नवृद्धिरिति॥ अतउपधायादृतिवृद्धिर्नेत्यर्थः। किलुगुपधात्वेतिनिषेधस्तूपधात्वनिमित्तकप्रत्ययविधावेवनान्यत्रेतिभाष्येस्पष्टम्॥ आयादेशापत्ते रिति॥ यणःस्थानिवत्त्वेनाच्त्वादितिभावः। पूर्वत्वंचात्रव्यवहिताव्यवहितसाधारणंस्वरेनिषेधात्। अतोयणोनिमित्ताकारापेक्षयाप्यैकारस्यपूर्वत्वमस्तीतितत्यक्षेप्यर्थं दोषदृतिभावः। आदेशेनापहारात्कथंस्थानिनोवधित्वमित्यतआह॥ उपलक्षणमिति॥

अन्तशब्दस्यचरमावयववाचित्वंविधिशब्दोभावसाधनःकर्मषष्ठ्यासमासेनपदचरमावयवेकर्त्तव्येवृत्तेवंव्याख्यानेफलमाह।वृक्षमिति।विजिति।क्विपितूठ्स्यादिति
भावः॥स्थानिवत्त्वादिति।णिलोपस्यटिलोपस्यवास्थानिवत्त्वादित्यर्थः।नन्वस्यपदत्वाभावात्कुतोऽसिद्धिरतआह।सुबन्तादिति।अन्तर्वर्तिसुब्निमित्तकपदत्वस्यैकदेशविकृतन्या
यवान्तेपिसत्त्वमितिभावः।प्रत्ययलक्षणमितिस्थानिवत्त्वेनप्रत्ययनिमित्तंकार्यमित्यर्थः।वर्णाश्रयत्वादिति॥णाविष्ठवदित्यनेनयद्यभमितिशास्त्रस्यैवातिदेशस्तर्हिवर्णाश्रयभे
दचस्थानिवत्त्वस्याप्रसक्तिः॥कार्यातिदेशेपियन्निमित्तवैकल्यप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तातिरिक्तसर्वनिमित्तकत्वमतिदेशस्यापीत्यङ्गीकारादूर्णाभ्रमत्वंसिद्धमिति॥प्रत्ययलक्षणस्
त्रंतुभाष्यकृताप्रत्ययस्यप्रसाधारणंरूपमाश्रीयतेतत्रैवप्रत्ययलक्षणमितिनियमार्थत्वेनस्थापितंनत्वप्राधान्येनालाश्रयणेविद्यार्थमितिभावः।नचाचःपरस्मिन्नितिणिलोपस्यस्थानिव
न्नपदान्त ॥पदस्यचरमावयवइति।वृक्षंवेतीतिवृक्षवीः।वातीतिवृक्षवाः।तमाचष्टेवृक्षव्।विच्।दृहलोपोव्योरितिवलोपोन।स्थानिवत्त्वात्।नचनपदान्तेतिनिषे
धः।दृहविधेयस्यलोपस्यपदानवयवत्वात्।पदान्तस्यस्थानेविधौनेतिव्याख्यानेतुनेदंसिद्धेत्।सुबन्ताण्णिजितिहरदतादिमतेऽन्तर्वर्तिसुपापदत्वात्।नचेष्टवदित्यतिदि
ष्टेनणिचिभत्वेनपदत्वसाधोर्णेर्लुप्तत्वात्।नचप्रत्ययलक्षणमाश्रयणादिति।द्विर्वचनादौचेति।यलोपादयआदिशब्दग्राह्याः।वरेदृतिवरेयोजादेशःसनस्थान्यदृ
तिव्याख्येयम्।सहविवक्षाभावेपिनिपातनाद्बहूनःसप्तम्यलुक्च।अथोदाहरणानि।पदान्ते।कानिसन्ति।कौस्तः।द्विर्वचने।सुद्युपास्यः॥ ॐ स्वेनभत्वंसुलभमितिवाच्यम्॥णि
लोपस्येवटिलोपस्यापिस्थानिवत्त्वापत्तौवान्तेभत्वस्यदुर्लभत्वेननत्रपदत्वानिवृत्तेः॥प्रकल्प्यचापवादविषयमितिन्यायेननिषेधविषयेतत्प्रतिबन्धायस्थानिवत्त्वाप्रवृत्तेश्च।हरदता
दिमतेदृत्यनेनारुचिर्बोधितातद्बीजंत्वयंपक्षेनसूत्रवार्तिकभाष्यसंमतदृतिप्रातिपदिकान्तदुत्पत्तौपदत्वाभावदृति।चरमावयवेकार्यदृतिव्याख्यानेफलंतुएधोयन्हसतीत्यादौयणःस्थानिवत्त्वादेत
तदोरितिसुलोपाभावन्नदृणः।शतरियन्निति।रूपम्।उलेचनस्थानिवदनेननिषेधादितित्वम्।कानिसन्तीति।वाक्यसंस्कारपक्षएतत्।तत्रपक्षेपूर्वोपस्थितनिमित्तकत्वरूपान्तरङ्गत्वमादाय
न्तरङ्गाणांपूर्वंप्रवृत्तेरिकारादेःस्थानिभूतादचःपूर्वत्वंद्रष्टव्यम्।एतन्मूलकमेववाक्यसंस्कारपक्षेश्रुतवर्णक्रमेणैवलक्ष्यसंस्कारइतिवदन्ति ॥

नस्थानिवदिति।नेन्नतोलोपेनेतिभावः।नचपूर्वमलोपस्ततोवलिलोपइतिक्रमसत्त्वादकारेणाङ्धातुकत्वाद्यलाभात्कथमतिदेशेनतल्लाभः।सम्भावनामात्रेणापितल्लाभस्यवरेग्रहणेनज्ञापनात्।अस्तिचात्रापियदिपूर्वंयलोपःस्यात्तदाकारेणप्रत्ययत्वंलब्धंस्यादितिसंभावनाफलंतुयातिरित्यादिसिद्धिरितिदिक्॥क्तिजिति॥क्तिच्क्तौचसञ्ज्ञायामित्यनेनाक्तिन्तुनाअप्रत्ययाद्ग्रहणेनवाप्राप्तानस्थानिवदिति॥स्थानिवत्त्वेहिस्वराप्रवृत्तिरेवस्यात्।अकारस्यतुनस्त्वविधौस्थानिवत्त्वनिषेधात्॥लित्वंतुकारकृत्वादौसावकाशमितिभावः।शिष्टेति॥नन्वन्नानुस्वारस्यादिशब्दाच्चपूर्वत्वेनस्थानिवत्त्वाप्रवृत्तिः।नचास्मादेवज्ञापकात्तस्याशङ्कीयतेपिस्थानिवत्त्वेनतल्लाभफलाभावात्।तदुक्तंसन्निवेशेपेक्षेसतनःपूर्वत्वस्यातिदेशसहस्रेणाप्यतिदेष्टुमशक्यत्वाच्चेतिभाष्यसूत्रस्वभाष्यरीत्यातस्यस्थानिभूतालृत्तिधर्मत्वेनास्त्विधाविनिनिषेधाच्चविशेषणतयालाभ्रयणाच्चेतिभाष्येपूर्वत्रासिद्धेदृष्यन्तेनवरेयलोपस्वरभिन्नानांहिर्वचनादीनांग्रहणस्यात्रप्रत्याख्यानेनतस्यचणलेप्रतिप्रसवेनात्रस्थानिवत्त्वेनपरसवर्णाभावेयलाभादिमुदाहरणंचिन्त्यम्।णत्वग्रहणेचप्रतिप्रसववार्तिकेलक्षणप्रतिपदोक्तपरिभाषेत्युपपादितमेव॥

वरेति॥यायावरःयच्चयङ्दृतिवरच्।अतोलोपःसचअतोलोपइतिचेत्सालोपेकर्तव्येनस्थानिवत्।यलोपेमातिः।यातेर्यङ्तात्क्तिच्।अतोलोपःयलोपः।अल्लोपस्यस्थानिवत्त्वादतोलोपःयलोपः।नचपुनरलोपःशङ्क्यः।विणोलुङ्न्यायेनातोलोपस्यासिद्धत्वात्स्थानिवद्भावाच्च।स्वरेचिकीर्षकः।सनोतेर्लोपः।लितीतिचकारेकारस्यउदात्तत्वेकर्तव्येनस्थानिवत्।सवर्णानुस्वारयोः।शिष्टि।दीर्घेप्रतिदीर्घः॥७॥दधिष्यतेकिंचदीर्घादाचार्याणामित्युत्तरमनुस्वारस्यमयि।यमुदात्तस्यतोलिउदः स्थःभ्यो हः।श्रन्थोटीतिषट्सूतीपाठोत्तरंझलांजशझशि।अभ्यासेचर्चेखरिच।वृक्षासने।अणोप्रगृह्यस्येतिपञ्चसूत्र्याःपाठइतिभाष्यसंमताशङ्कापीपाठपक्षेपरसवर्णदृष्ट्याझलांजशझशीत्यस्यझरोझरीत्यस्यवासिद्धत्वेनयणादेशाभावात्तदप्राप्तेरितिचेत्सत्यम्।पादयतेः क्विपिपाद्धसतीत्यादौझयोहइतिपूर्वसवर्णेपञ्चमीसमासेनप्राप्तस्यानिवद्भावेवारणार्थत्वात्।हरितशब्दादाचश्चाणण्यन्तात्क्विपिहरिद्धसतीत्यादौउक्तरीत्याप्राप्तस्यतस्यवारणार्थत्वाच्च।अत्रालोपस्थापितत्वात्प्राक्कौलुप्तमित्यस्यविषयएव।हरिन्नमतीत्यादौअनुनासिकेतदुच्चारणसामर्थ्यात्।हयवरट्सूत्रभाष्यरीत्यातत्रसवर्णग्रहणापकर्षेणतस्यापिसवर्णविधित्वादित्यन्यत्रविस्तरः॥

तच्चिन्त्यम्।व्याघ्रीत्यादिवत्सञ्ज्ञात्वेपिजातित्वानपायात्।भस्त्रफलेतिभस्त्रेवफलानियस्यादृतिविग्रहः।ङ्याप्पोरिति।एतच्चफलनिष्पत्तावितिधातौमाधवग्रन्थेस्थितम्।भाष्ये
नुप्रायेणदीर्घएवपठ्यते।प्रत्यक्पुष्पेति।पाककर्णेत्यादिसूत्रस्थभाष्यवार्तिकपर्यालोचनयेदमुक्तम्।तेनसत्त्वाक्काण्डेतिपाठोनादर्तव्यः।शूद्रावेति।शूद्रशब्दष्टापमुत्पादयति
जातिश्चेत्।महत्पूर्वस्तुनाजातिश्चेदितीहापिसंबद्ध्यते।पुंयोगेत्विति।पुंयोगेदाम्पत्यरूपएवेतिननियम;किंतुजन्यजनकभावोपितेनवैश्याशूद्रोस्तुराजन्यान्माहिष्योग्रीसुतौस्त्री
नावितिसिद्धम्।महाशूद्रीइति।आभीरीतुमहाशूद्रीजातिपुंयोगयोःसमेत्यमरः।अत्रेदमवधेयम्।अजादिगणेशूद्रेत्येवपाठ्यम्।जातिरितिव्यर्थम्।मुख्येकार्यसंप्रत्ययाज्जातिलक्ष
णेङीषेवबाधिष्यते।पुंयोगेहिगौणीवृत्तिः।अमहदित्यादापिव्यर्थम्।महाशूद्रशब्दोहिविशिष्टएवजात्यन्तरेवर्तते।तत्रावयवसम्मानर्थकतयाशूद्रशब्दार्थसमवेतस्त्रीत्वाभावात्
टापःप्रसङ्गएवनास्ति।यातुमहतीशूद्रानत्रमहाशूद्रेतीष्यतएव।कुञ्चेत्यादित्रयोमीहलन्तादित्येके।क्रञ्चानालभेतउष्णिहंककुभंदित्यादिप्रयोगमुदाहृत्यादन्तात्रापिभाष्येस्वीकृतात्।
ष्यतएवेति।अतस्तंप्रत्यर्थमेतदिति।भवः।भाष्यवार्तिककारोतुशूद्रजातिवृत्तिमत्त्वेनतांजातिंतत्रारोप्यशूद्रशब्दप्रयोगइति शूद्रशब्दार्थसमवेतस्त्रीत्वस्यसत्त्वादस्त्येवटापः प्रा
प्तिरित्यमहत्पूर्वेति।शूद्रशब्दार्थसमवेतस्त्रीत्वेपिशूद्रशब्देवटाप्स्यान्नतुतदंन्तादितितदन्तविधिज्ञापकतापिभाष्योक्तानासंगता।अतएवशूद्रेन्नमातृजात्यारोपेणैवब्राह्मणक्षत्रि
यवैश्यैःक्षत्रियावैश्याशूद्रास्तत्पन्नाःक्षत्रियवैश्यशूद्राएवेत्युक्तम्।तत्रजातिरित्यस्याभावेपूर्वंजातिमात्रविवक्षयाकुक्कुटाण्डवत्शूद्रशब्देनसमासेततःस्त्रीत्वविवक्षायाममहत्पूर्वेति

निर्देशेनापनयादितिमन्यतेइत्यन्नविस्तरः।

ल्युत्यादितश्चेति।न्यासकृतेतिशेषः।दृदंल्युत्पादनमप्रामाणिकम्।अत्रत्यभाष्यासमतेः॥दधातेः क्कनिविति॥घुमास्थेतीत्वम्॥पावानदित्यस्यवनिपासिद्धिमाश्रित्यदृब्लमत्र
कारादावित्यस्यतत्रैवभाष्येप्रत्याख्यानात्।स्थः कचेतिसूत्रभाष्यस्थेशंस्यादित्यत्रआम्बाबेतिसूत्रंभाष्यस्थेसत्येष्टादित्यत्रचस्यसिजित्यतोवाग्रहणंमण्डूकप्लुत्यानुवर्त्यव्यवस्थि
तविभाषाश्रयणात्तद्भावः।तत्रविजेवेत्यन्ये॥अतएवधीर्द्ध्यायतेर्दधातेर्वेतिद्ध्यायतेः संप्रसारणमितिवार्तिकस्थंभाष्यंसंगच्छेते॥घुमास्थेत्यत्रहलीत्यस्यानुवादात्यर्थात्प्र

पुंयोगेपीति।यदाज्येष्ठादयः प्रथमजातादौवर्तन्तेतदाअदन्तत्वादेवटाप्सिद्धः।यद्वातुज्येष्ठस्यस्त्रीत्यादिविवक्षातदापुंयोगलक्षणोङीषप्राप्तः सोऽनेनबाध्यतदिति
सूत्रमपिशब्दः।मूलान्नञः।नञः किम्।शतमूली।अमूलेति।ओषधिजातिरियम्।उगितश्चेति।सर्वादिषुभवतुदित्युदित्पठितः भातेर्डवतुरितिक्युत्यादित
श्चेत्रन्नानुङीपिशपश्यनोरितिनित्योनुम्।वनोरचासुत्वानमिति।सुयजोर्ङ्वनिप्।अतिधीवरीति।दधातेः क्कनिप्।शर्वरीति।शृधातोर्वनिप्।गुणेकृतेहशन्तात्परत्वेपि
हशन्ताद्विहितत्वाभावाद्ङीब्बयोर्निषेधोन।अवावेति।न्यासकारस्तुप्रायिकोयंनिषेधः।तेनअवावरीत्याह।नत्वेतद्भाष्यादोदृष्टम्।पक्षेङाविति।तथाचद्विवचने।बहुधीव
र्भौ।बहुधीवानौ।बहुधीवेदृतिरूपत्रयंभवतीतिभावः।टाङसिङसामिनात्स्याः।टाङसिङसामिति।पूर्वेणप्राप्तस्यङीयोपवादः।असिद्धत्वादिति।कार्यकालपक्षेणेदम्।यदितुयथोद्देशंषट्संज्ञायदिवाउप
देशकालेसान्तेतिव्याख्यानेनतदासिद्धत्वोपवर्णनंनोपयुज्यतइत्याहुः।वस्तुतस्तुयथोद्देशपक्षेपिअसिद्धत्वमुपयुक्तमेव।एकदेशविकृतस्योपसंख्यानंहिस्थानिव
त्सूत्रेपठ्यते।आदेशग्रहणसामर्थ्यात्सर्वेसर्वपदादेशादित्याश्रित्यआनुमानिकोप्यादेशः स्थानिवदितिवाव्याख्यायते।उभयथापिअल्विधौनतत्प्रवृत्तिः॥

त्ययलक्षणसूत्रस्थनियमार्थत्वेपिप्रत्ययलक्षणकार्यसुलभमितिदिक्।निषेधोनेति।वनोनहशदृतिवार्तिकेविहितविशेषणस्येदमेवफलमितिभावः।नत्वेतदिति।अतोऽप्रमाण
मेतदितिभावः।व्याख्यानमिति॥उपदेशदृतिवक्तव्यमितिवदतोवार्तिककारस्येतिभावः॥आनुमानिकोपीति।एरुरित्यनेनतेस्तोरनुमानादितिभावः॥

एतच्चाकरेदृति॥अत्रारुचिवीजंतुषट्त्वंनात्यर्थमदृतितदाश्रयविधीनांनात्विधित्वमिति॥सिद्धेदृति॥एवंचान्यतरस्यांग्रहणंकिमर्थमितिभावः॥ङीपेति।ऋन्नेभ्यदृतिविहितेन।अनोयोसौविकल्पदृति।अन्यतरस्यामितितिभक्तसूत्रेणप्राप्तदृत्यर्थः॥अनदृतिसूत्रेत्यन्यतरस्यामित्यस्यसत्त्वाद्विकल्पनियमलाभोऽन्यथासनित्यार्थोविधिरेवस्यादितिभावः॥सउपधेति।सउपधालोपिनोनुपसर्जनस्यबहुव्रीहेरेवेत्यर्थः।निषेधार्थमिति।योगविभागेनपसप्राप्तस्यऋन्नेभ्यदृतिङीपदृत्यर्थः॥दृत्येवङीबिति।नियमशास्त्राणांनिषेधमुखेनप्रवृत्तिरित्यभिमानेनेदम्।तेनेतिअनउपधेत्यस्यनियमत्वेनेत्यर्थः।ऋन्नेभ्यदृति।अस्यान्यथेत्यादिः।अनउपधेत्यस्यविधायकत्वेदृतितदर्थः।प्रकरणान्तस्थे

एतच्चङ्गाकरेस्पष्टम्।बहुयज्वानाविति।नसंयोगादितिनिषेधान्नायमुपधालोपीतेनअनउपधालोपिनदृतिनप्रवर्तते।ङाबुभाभ्याम्।ननुनिषेधङापोर्वचनसामर्थ्यात्पर्यायःसिद्धः।सत्यम्।अन्यतरस्यामितियोगोविभज्यते।तत्रमनदृतिनिवृत्तम्।अनोबहुव्रीहेर्ङीम्वास्यात्।ङीपासहविकल्पलाभार्थमिदम्।अनउपधालोपिनदृतिसूत्रंतुनियमार्थम्।अनोयोसौविकल्पःसउपधालोपिनएवेति।तथाचसुपर्वेत्यादौअनुपधालोपिनिनिषेधार्थमिदम्।बहुराज्ञीत्यादौतुऋन्नेभ्यदृत्येवङीप्।तेनबहुधीवरीसिद्ध्यति।ऋन्नेभ्यदृतिहिङीपमनूद्यतत्सन्नियोगेनविधीयमानोरेफःप्रकरणान्तरस्थेनङीपिकृतेनसिद्धेत्।ननुवनोरैचेतिसूत्रमेवङीवृौविधत्तामितिचेन्न।उभयंविधौगौरवात्।किंचैवमपिङीपिनिषिद्धेरोपिदुर्लभः॥

नेति।तेनाननन्तरत्वंबोधितम्।गौरवादिति।ममतुऋन्नेभ्यदृतिप्राप्तङीपमनूद्यतत्संनियोगेनरभावमात्रविधायकंतादितिभावः।ननुवनोरचेत्यस्योभयविधायकत्वेऽनोबहुव्रीहेरित्यनन्तरत्वादस्यनिषेधकमुतयेनेतिन्यायेनऋन्नेभ्यदृत्यस्य,नाद्यइत्याह।किंचेति।अनउपधेत्यनेनङीप्यपिरोदुर्लभएवेतिभावः।किंचैवंबहुश्वेत्यत्रऋन्नेभ्यदृतिङीबापत्तिः।किंचबहुव्रीहौवेतिवार्तिकस्याप्यपूर्वविधायकतापत्त्यासुपर्वनशब्देङीब्रुयोरापत्तिः।सिद्धान्तेत्वनउपधेत्येतत्प्रापितङीबनुद्यादेनरभावस्यतेनविधानान्नदोषः॥एतेनान्यपक्षोबाढ्यसामान्यचिन्तयोर्भगबाधकमितिषष्ठ्यपरास्तः॥बहुव्रीहौवेत्यनेनसुपर्वनशब्देङीब्रुयोरापत्तेरितिदिक्॥

इत्यस्यानन्तरमिति।अनोबहुव्रीहेरीङ्ङाबुभाभ्याम्।अनुपसर्जनात्उपधालोपिनोवेतिपाठ्यमितिभावः॥यथाश्रुतेःनुपसर्जनादित्यस्यसंबधोदुर्घटः।अतश्चबहुव्रीहेरित्यस्यानन्तरमुपधालोपिनोवेतिसूत्रमस्तु।अनउपधेत्यादिष्विवदेशान्तरस्थंसूत्रं मानिपुराण्यतिक्रान्तामगरीत्यत्रङीषि॥ग्रहणंचेति।चेनबहुव्रीहेरोवेत्यस्यापिसंग्रहः॥पूर्वोक्तयोगविभागप्रकारस्तुगुरुभूतदृतिभाष्याशयः॥दृत्युक्तमिति।डाप्सूत्रेऽन्यतरस्यांग्रहणंचमास्तुदृतिभावः।यत्नसाद्यदृतिभावः॥एतत्प्रयोगरूपज्ञापकसाद्यदृत्यर्थः।एतच्चाकारस्येति।संनिहितत्वात्साक्षाद्द्वयोश्चयत्नेनप्राधान्याच्चेतिभावः॥तत्रसामर्थ्यादिति।कात्पूर्वस्येतिसन्नियोगशिष्टत्वात्।भाष्येतुसूत्रभङ्गेनसमाहितम्।तद्यथा।अनोबहुव्रीहेरित्यस्यानन्तरमुपधालोपिनोवेतिसूत्रमस्तु।अनउपधेत्यादिष्विवदेशान्तरस्थंसूत्रं डाप्सूत्रेऽन्यतरस्यांग्रहणंचमास्तुदृतिअनउपधाबहुव्रीहेरूधसोङीषित्यतोबहुव्रीहिग्रहणंसंख्याव्ययादेर्ङीपूचानुवर्ततेदृत्याशयेनाह।अन्नन्तादित्यादि।नियमार्थमिदमित्युक्तम्।नचैवंपूर्वेणविकल्पसिद्धेदृहान्यतरस्यांग्रहणंव्यर्थमितिवाच्यम्।असतिहितस्मिन्नित्यार्थोविधिरेवायंस्यान्नतुनियमः।प्रत्ययस्थात्कात्पूर्वस्यकादित्यकारोच्चारणार्थः।व्यञ्जनमात्रंविवक्षितम्।विशिष्टविवक्षायांतुएनिकाश्वरन्नीत्यादौअकचिनस्यादित्याशयेनाह।ककारादिति।वर्णनिर्देशेहिकारप्रत्ययोविहितः।क्वचित्समुदायात्प्रयोगस्तुउच्चैस्तरांवावषट्कारदृतिनिर्देशरूपयत्नसाद्यदृतिभावः।आपिपरदृति।एतच्चअकारस्यविशेषणम्।तत्रसामर्थ्यात्ककाराकाराभ्यांव्यवायेपिभवति।ननुरथकट्येत्यादौत्रिचतुरादिव्यवाये।अतएवसर्विकादौआद्याकारस्यनभवति ॥ शास्त्रसामर्थ्यात्ककारेणव्यवधानंसंह्यते।आबकारयोस्त्वेकादेशेकृतेचःपरस्मिन्निस्थानिवत्त्वेनाकारव्यवधानेपिश्रौतमव्यवधानंगृहीत्वाप्रवृत्तिः।अकारशब्देनाजजातिग्रहणंतेनैनिकेत्यादावकारद्वयसत्त्वेपिनक्षतिरितिभावः।अतएवनयासयोरितिचरितार्थम्।त्रिचतुरादीति।श्रौतत्रिचतुरादीत्यर्थः।आद्याकारस्येति।दृदंचकात्पूर्वस्येत्यंशेप्यनूद्यमानविशेषणत्वान्नाव्यवधानांशप्रवृत्तिरितिवादिनांमतेबोध्यम् ॥

वचनसामर्थ्यादिति। श्रौताव्यवधानमाश्रित्येत्यर्थः। अनूद्यमानस्येति। साक्षादनूद्यमानविशेषणत्वाद्यावानूद्यमानस्येत्यर्थः। विशेषणेषु, आपीत्यादिषु॥ सिद्धिरिति॥ अ
स्यतैरुक्तमितिशेषः। अनेनतत्रसूत्रेएतस्यैवज्ञापकत्वंवर्णयतोत्रचैवंवदतस्तवपूर्वापरविरोधदतिभावः॥ यदित्वन्तरङ्गत्वेमस्थानसंबन्धलाभदत्यर्थः षष्ठीस्था
नेदित्यत्रभाष्येस्पष्टदतिस्थानेग्रहणंव्यर्थमेवतस्यपरिभाषालभ्यत्वाभावेनज्ञापकासंभवात्। वृद्धसञ्ज्ञायामिक्परिभाषानुपस्थितिस्तुमालादीनांचेतिज्ञापकात्,तद्धि
प्रस्थेःवृद्धमितिपर्युदासेप्राप्तेआरभ्यतेअनुवादेदतिचनिर्मूलम्। यद्वाइक्यरिभाषाच्परिभाषयोर्विधीयतेदत्यद्याहारात्तत्रतस्याअप्रवृत्तिरनुवादेदतिचतद्विषयमे
तदेतदुक्तम्। अकारस्येकारस्यादापिपरदतिककारविशेषणत्वेतुविवक्षितेआप्परात्ककारात्पूर्वस्यातदत्यवश्यत्वात्तुप्राच्यः। आपीतिककारविशेषणं
सर्विकेत्यादौतुएकादेशस्यस्थानिवद्भावात्ककारेणव्यवधानेपिवचनसामर्थ्यादुविष्यतीति। तन्न। रथकट्यादावतिप्रसङ्गात्,व्यवहितस्यापिपरत्वानपायात्। न
वनिर्दिष्टपरिभाषयाविस्तारः। अनुवादेपरिभाषाणामनुपस्थितेः। अनूद्यमानविशेषणेधितिहितदर्थः। अत्रचउदीचामातदतिसूत्रेस्थानेग्रहणंलिङ्गम्। फलन्तु
शङ्ग्वमेवारथकट्यापुत्रकाम्येत्यत्रानिप्रसङ्गात्। शकेति। पचाद्यच्। स्थग्रहणंविस्पष्टार्थम्। ककारमात्रस्यप्रत्ययस्याभावादेवनात्स्यलाभात्। कूर्त्तस्यकिम्। सर्विके
त्यादौटाबेकादेशंबाधित्वाकात्यरस्यमाभूत्। तस्मादित्युत्तरस्येतिपरिभाषणात्॥
यातएवात्रोपोनदत्यत्रयजादिस्वादिपरदत्यस्यानविशेषणत्वेपिअव्यवधानलाभदतिष्यङ्दतिसूत्रेभाष्येध्रुनितंसंगच्छतेदतिविभाव्यतेतदासंनिहितत्वादिनेवा
पीत्यस्याकारविशेषणतेतिबोद्धव्यम्। तत्स्त्रीयदति। विधेयस्यासिद्धत्वेनतद्विशेषणासंभवादितिभावः। अनाशङ्ग्वमेवेति। श्रुतेनान्वयसंभवेश्रुतेनान्वयायोगादितिभा
वः। लस्यविसंवादमप्याहारथेत्यादि। तात्स्यलाभादिति। कान्तात्प्रत्यापादितितुनार्थः क्षिपकादीनांनिषेधस्यव्यर्थत्वापत्तेः॥

अपवादेदृति॥येननाप्राप्तिन्यायेनबाधकविषयेतेनैवन्यायेनबाधसिद्धेरितिभावः।प्रत्ययस्येकीनि ।प्रत्ययेकीत्येवयुक्तंनयासयोरितिज्ञापकात्कादैप्रत्ययदृतिनार्थइतिकेचित्
एवंचाष्यस्यप्रत्ययस्येककारपरस्यचातदृदित्यर्थः।तत्रसामर्थ्यादाप्यस्त्रांशेककारस्यवधानंसोढव्यमेवेतिभावः॥विग्रहदृति।दक्षिणापश्चादितित्यक्।अन्यथादिग्वाच
मत्तुवाणादाङ्मितिपरिभाषयाएकादेशोवाङ्ङेतेत्याहुः।तन्न।अपवादेपरत्वस्येवउक्तपरिभाषायाअपिनिष्फलत्वात्।वस्तुतस्तुप्रत्ययस्येकिदृद्रिक्तत्वंनिनि
र्देशएवोचितः।पूर्वग्रहणंचसुत्यजम्।अतदृतितपरःकिम्।कृदाधारार्चिकलिभ्यःकः।धाका।राका।मामिकेति।केवलमामकेत्यादिनासञ्ज्ञाछन्दस्येवेतिनियमा
न्नडीःपूत्यकृत्यपोरितिउदीचामातस्थानदृतिविकल्पस्यापवादः।दाक्षिणात्यिकेति।दक्षिणस्यामदूरेदक्षिणा।आजन्तः।दक्षिणाभवेतिविग्रहःयत्तुदक्षिणस्यांदि
शिभवेतिप्राचाविगृहीतम्।तन्न।त्यम्विधौवक्तव्यसाहचर्यादाजन्तस्यैवदक्षिणाशब्दस्यग्रहणात्।अन्यथासर्वनाम्नोवृत्तिमत्रेइतिपुंवद्भावापत्तेश्च।यत्तुसमा
सेएवपुंवदितिनेतिवक्ष्यतेत्यकिंकिनिचेत्यादिवृद्धौटापतनोऽज्ञातार्थैकःकेणदृतिह्रस्वःटाप्।दृहत्यिकेति।अव्ययात्यप्।नयासयोः।अत्रन्यासकारःत्याद्
त्येतस्योदीचामातस्थानेदृतिविकल्पेप्राप्तेनिषेधोयमिति।तन्न।आन्तस्थानेदृत्यंशस्येहाभावात्।यासेतियत्तदोरुपलक्षणमित्याशयेनाह।यत्तदोरितिस्वरूप
स्याविवक्षयाफलमुदाहरति।यकंतकामिति।मासयोरित्यपहाययत्तदोरित्येववक्तुमुचितम्।उपत्यकेति।उपाधिभ्योत्यकन्नासन्नारूढयोः।क्षिपकादीनां
च।नेत्यनुषज्यते।क्षिपकेति।क्षिपेरिगुपधलक्षणःकः।ततोऽज्ञातादौकः।चरभेदने।पचाद्यच्।ततःकृः।तारकेति।तरतेर्ण्वुल्।ज्योतिर्नक्षत्रंनेत्रकनीनि
काच।वर्णकाप्रावारविशेषः।तन्नूनांविकारस्तान्तवम्।ओरञ्।अन्यत्रवर्णिकेति।ग्रन्थविशेषस्यव्याख्या।स्तोत्रकर्त्री च।वर्तयतीतिवर्तका।शकुनौदृत्वं
वा।अन्यत्रनित्यमेव।पितरश्चताः देवताश्चपितृदेवताः तदर्थंकर्मपितृदेवत्यम्।देवतान्नात्तादर्थ्येयदितियत् ॥
कस्यापिग्रहणेचेनसाहचर्यत्यागेमानाभावः संगृहीतः॥दृहाभावादितिअकचःसत्त्वादितिभावः।प्रावारविशेषदृति।वर्णयत्याच्छादयतीतिण्वुत्यतेः ॥

जागरूकेदृति।स्थानेपदाभावेप्यन्तरङ्गत्वात्स्थानसंबन्धस्यैवलाभदृत्यपिवोद्यम्॥प्रतिपदोक्तस्येति।स्त्रियामित्यधिकृत्यविहितस्येत्यर्थः।विशिष्यतदनुपादानात्कथं तल्लाभदृतिचिन्त्यम्॥दृच्छन्तीति।तद्वाष्यादावदर्शनादयुक्तम्।शुभंयाः विच्।ततः कदृति।नदीसञ्ज्ञासूत्रस्थभाष्यप्रामाण्यादादन्तेभ्यः क्विपोनभिधानाद्विजुक्तः।तत्रहि भस्त्रेति।ब्राह्मणः यस्यासाअष्टका।दृष्यशिभ्यान्कन्।अष्टिकान्येति।अष्टौपरिमाणमस्याः।संख्यायाअतिशदन्तायाः कन्।अर्धगतंस्त्रीत्वमाकारेऽद्यारोप्यमक पूर्वायादृतिस्त्रीलिङ्गनिर्देशः।तेनस्त्रीप्रत्ययोलभ्यतदृत्याशयेनाह।स्त्रीप्रत्ययाकारस्येति।साङ्काश्यिकेति।साङ्काश्येननिर्वृत्तंसांकाश्यम्।वुञ्छण्कण्ठादिसूत्रेणसंका शादिभ्योण्यः।ततोभवोर्थेधन्वयोपधाद्वुञ्।अकादेशः।सचसांकाश्यभवांस्त्रियमाहेतितदकारस्यापिदृत्वविकल्प्येनतस्मादातदृत्युक्तम्।ननुयथायमकारोनाकार स्थानिकएवंस्त्रीप्रत्ययस्यानिकोनेतिद्योतनेलिङ्गविकलमेतत्।अत्राहुः।सतिह्यातदृत्येतस्मिन्स्त्रीलिङ्गनिर्देशबलात्स्त्रीवाचकआकारःस्त्रीप्रत्ययएवेतिलभ्यते।अस तितुतस्मिन्स्त्रीवाचकस्ययोकारदृत्येतावल्लभ्यतेततःसांकाश्यिकेत्यत्रापिप्रसज्येतेति।अत्रेदंवक्तव्यम्।यकपूर्वायोस्थानेदृतिस्थानेशब्देजागरूकेकथमवयवषष्ठी संगम्यताम्।मत्वर्थस्थानेयमितिवाच्यम्।अकेतिसमुदायस्यतथात्वेपिअकारस्यैवयस्तथात्वात्वुञोयकपूर्वत्वाभावाच्चानहितस्यावस्थायांयस्येतिलोपोलभ्यते।किंच प्रतिपदोक्तस्त्रीप्रत्ययस्यलाभेवार्थेविहितस्यवुञादेःप्रसङ्गस्वनास्तितस्मादातदृतिस्पष्टार्थमेवाभिधेयेति।कौमारास्तु भस्त्रादिवाक्येश्वशब्दमपिपठन्तोस्यापिविकल्पमिच्छन्ति।शुभंयातीतिशुभंयाः वि च्।ततःकः।केऽणः।शुभमितिमान्नोनिपातः।सुष्ठुनयोयस्याःसुनया।ततःकः।भस्त्रैषा।तदन्नेति।आङ्गत्वादितिभावः।एवंचेति।उक्तंचहरदत्तेन।अत्रातस्थानदृत्येतत्त्व शब्दस्यविशेषणम्।संभवव्यभिचारौहितत्रस्तःकाकचोःसनोःहैषयोःसंभवोनास्तिनान्यत्रव्यभिचारिता।सर्वनाम्नःस्वशब्दस्यतेननायंविधिर्भवेत्दृतिदृहस्वश ब्दस्येत्यस्यानन्तरमतदृतिशेषोबोद्धव्यः।एतच्चदृहमूलेध्वनितम्॥ ङ्याबित्यादिपदेआदन्तलक्षणोविजुक्तोननुकिपदृत्याहुः।कैयटस्तुशुभंयातिक्विप्।शुभमितिनिपातो ज्ञातादोक्तःकेणदृतिहस्वदृत्याह।मूलेपिध्वनितमिति।स्वशब्दस्यतेनाविशेषणमित्यादिनाभवत्युदाहरणमित्यन्तेनग्रन्थेनेतिभावः॥

स्विकायामितीति। स्वाशब्दादत्यन्तस्वार्थिकेकेदत्वेसाधुः। नह्यकच्अत्यन्तस्वार्थिकस्याप्यपवादैः॥ व्याचक्षाणादृति। अकचमुक्तावैकल्पिकमित्वंव्याचक्षाण्यदृत्यर्थः। स्त्रीत्वमेवनास्तीति। स्वोज्ञानाघात्मनिस्वंस्त्रिघात्मीयेस्वोस्त्रियांधनेदृतिकोशादितिभावः। सञ्ज्ञाविषयकमिति। सञ्ज्ञायाअपिसञ्ज्ञापूरण्योश्चेतिपुंवत्वनिषेधेनभाषितपुंस्कत्वबोधनादभाषितपुंस्कत्वेत्यनेननासिद्धिरितिभावः। अत्यन्तस्वार्थिककान्तविषयंचेत्यपिबोद्यम्॥ उपलक्षणमिति। भस्त्राशब्दसाहचर्येणआख्यानेनचश्रुतानुपूर्वीकस्यैवैषाशब्दस्यग्रहणमतएवैषाद्वे एवंचहंसंतनौसंनिहितंचरन्तंमुनेर्मनोवृत्तिरिवस्विकायामितिश्रीहर्षश्लोकेभस्त्रेषेतिवैकल्पिकमित्वमितिव्याचक्षाणाउपेक्ष्यादृतिभावः। आत्मीयायामिति। आत्मज्ञातिधनेषुतुस्त्रीत्वमेवनास्तीतिभावः। यत्तुज्ञातिधनयोःस्वकास्विकेतिरूपद्वयमाकरेस्थितमित्याहुः। तच्चिन्त्यम्। नादृशस्याकरस्याप्रसिद्धेः। लिङ्गानुशासनविरोधाच्च। यत्तुस्वकास्विकेतिकाशिकायामुदाहृतंतत्तज्ज्ञातिधनविषयकंनतुज्ञातिधनविषयकम्। यद्यपिस्वार्थिकाः क्वचित्प्रकृतितोलिङ्गवचनान्यतिवर्तन्तेदृतिपरिजहुः। तदपिचिन्त्यम्। उक्तरीत्याकप्रत्ययान्तादृापुसोर्थेवेप्रकृतेरस्त्रीलिङ्गतयाभानस्यानेदृस्यशस्यदुरुपपादत्वात्। प्रत्युदाहरणान्युक्त्वोदाहरणान्याह। निर्भस्त्रिकेत्यादि। निष्क्रान्ताभस्त्रांयाः निर्भस्त्रः उपसर्जनह्रस्वः। टाप्। ततोऽशीतिकः। कृतबहुत्वेति। सूत्रेविकृतनिर्देशोविवक्षितविषयोनतुन्यासयोरितिवदुपलक्षणमितिभावः। स्त्रीलिङ्गनिर्देशादजाद्यः स्त्रीलिङ्गाएवगृह्यन्ते। तेनेहन। सुभोजोस्याः सुभ्राजिका। जानातीतिज्ञः। प्रियोज्ञोस्याः प्रियज्ञिकेति। अभाषित। ——विहितविशेषणत्वाच्चाख्यायाः फलमाह। बहुव्रीहेरिति। नित्यमिति। अस्यविकल्पस्याप्रवृत्तेः प्रत्ययस्यादित्युत्सर्गएवप्रवर्ततइत्यर्थः। परविशेषणत्वेत्वर्थंविकल्पःस्यादितिभावः। बहुव्रीहेरित्युपसर्जनोपलक्षणंतेनातिखट्विका। निःखट्विकेत्यादावपिनित्यमेव ॥ ॐ नञ्पूर्वेउदाहरणमितिभाष्येप्येषेत्येवोक्तम्। अन्यथाएतद्वीत्येववदेदितिभावः। सुभ्राजिकेति। बहुव्रीहेरपितत्तः स्वार्थिकः कदृतिभावः। एतेनातःस्थानिकत्वाभावादप्राप्तिरित्यपास्तम्॥ परविशेषणेत्वेत्विति। समुदायस्य भाषितपुंस्कत्वेपितदवयवस्यखट्वशब्दस्यतथात्वेनततः परत्वात्परविशेषणेदोषःस्यादेवेतिभावः ॥

ह्रस्वपक्षेइति॥बहुजस्खट्वाजसित्यवस्थायांकपिसुब्लुकिप्रत्ययलक्षणेनभागद्वयस्यसुबन्तत्वात्समासस्संज्ञायांसमासान्तादितिशास्त्रबलात्बहुवन्तस्यैवसमासत्वेनोपसर्जनस्त्रीप्रत्ययान्तस्यसमासरूपप्रातिपदिकाभावा द्बह्वीत्यादेरिति ह्रस्वत्वाभावेकेणदितिह्रस्वत्वेचनकपीतिनिषिद्धेअयोन्यतरस्यामितिह्रस्वेकपःप्राग्वर्तिनःस्वद्वशब्दात्परस्यापोऽभाषितपुंस्काद्विहितस्यैवतत्स्थस्यनिष्कारस्यायंविकल्यः ह्रस्वाभावेतुबहुस्खट्वाकेतीतिभावः।प्राञ्चआहुरिति।नचस्त्रियामित्यस्यगृह्यमाणविशेषणत्वान्नात्रदोषः।अनुपसर्जनाधिकारेणतदन्तविधौस्त्रियामित्यस्यस्त्रीप्रत्ययप्रकृतिविशेषणतायाश्चज्ञापनेनादोषात्।अतएवधीवानमतिक्रान्तोअतिधीवरीसिद्धति।प्राधान्येनतद्विशेषणतायान्याय्यत्वाच्च।अनुपसर्जनादितितुगृह्यमाणस्यैवशैषिकेकपीति।औपगवःउपगस्यापत्यमितिह्रस्वपक्षेदितिभावः।अभिव्याप्येति।अतएवबहुयुवाशालेत्यत्रयूनस्तिरुपसर्जनत्वान्नेतिप्राञ्चआहुः।दिद्यु।दृहवृत्तिकृतासूत्रेरज्युनपक्षिप्तः।औत्तीनिःउत्तेरपत्यमित्यादिष्वौणादिकेषुइञ्प्रत्ययान्तेषुनासिद्धमिदमितिवाच्यम्।तन्त्रजातेरित्यनुवृत्तेः।अन्यथापुंयोगेपिस्यात्।एतेनदृहभञ्जुग्रहणंस्पष्टार्थमितिप्राचोग्रन्थःप्रत्युक्तः।दृहानेकंवाक्यंतत्रअनुपसर्जनमर्णेयकारस्तदन्तादितिव्याख्यानान्नेह।आपिशलमधीतेआपिशलाब्राह्मणीति।अत्रहिप्रोक्तार्थेऽणुपसर्जनम्।अद्ध्येत्रण्तुलुप्तः।वर्णप्राधान्यान्नप्रत्ययलक्षणम्।अतष्टाबेवभवति।तान्शीलिकेतिअयंभावः।शीलंकुत्रादिभ्योणदितियोणस्तस्मिन्अण्कार्यंभवतिकार्मस्ताच्छील्यदितिज्ञापकात्।अनेनहिअन्निति अणिविहितंप्रकृतिभावंबाधित्वाटिलोपोनिपात्यते।चौरीति।चुराशीलमस्याः।हलस्तद्धितस्योपधाभूतस्येति।ननुयस्येतिचेतियजोकारलोपेकृतेयकारस्यईकारपरत्वमस्त्येव।किमुपधाग्रहणानुवृत्त्या।नचाल्लोपस्यस्थानिवद्भावः।यलोपेतन्निषेधात्।मैवम्।यलोपेकार्येऽल्लोपस्याभीयत्वेनासिद्धत्वात्॥७ विशेषणम्।अतएवकौम्भकारेयसिद्धिः।अन्यथाकुम्भकारेयोप्यापद्येतकुम्भेनसमासेपिकेवलस्यकारस्यप्रातिपदिकत्वेनतदर्शस्यापिस्त्रीत्वेनयोगात्ततोङीपिकुम्भेनैकार्थीभूतस्यापिविशिष्टस्यापत्येनयोगेतस्यायोगस्यवक्तुमशक्यत्वात्नेनापियोगेकदाचित्ततोढकिविशिष्टस्यतन्निरूपिताङ्गत्वाभावेनकुम्भ्यादिशब्दानापत्तेः॥निष्कस्यैकार्थीभावस्यैवप्रत्ययोत्पत्तिनिमित्तत्वेनमानम्।समुदायेनैकार्थीभावेऽवयवेनापितस्यैवसत्त्वात्।नचसमुदायादीङ्यपिअनुपसर्जनस्त्रीप्रत्ययेनदादिनियमाभावेनकदाचित्कारीशब्दापत्तिस्तवापीतिवाच्यम्।एतदधिकारसामर्थ्यादेकतदादिनियमाभावेनाधिकस्यैवकार्यंबोद्धव्ये नतुन्यूनस्येत्यदोषादिति

तदाशयोविस्तरस्त्वन्यत्रबोद्धव्यः।पुंयोगेपिस्यादितिदृष्यतेनुङ्षिष्यर्थः॥प्रत्युक्तदृतिःअनेनैवसिद्धेतत्राजग्रहणंतूत्तरस्यापत्यस्त्रीत्यत्रजातिलक्षणङीषबाधनार्थमितिबोद्धव्यम्।अत्रहीति।नचैवमनुपसर्जनाधिकारस्यचारितार्थेमूलोक्ततदन्तविधिज्ञापकतानुपपत्तिरितिवाच्यम्।लक्ष्यानुसारिव्याख्यानेनस्त्रियामित्यस्यगृह्यमाणविशेषणतयापितद्द्वारणसम्भवात्।तस्माद्बहुकुरुचरित्येवतद्द्यावर्त्यम्।नचतदन्तविधिंविनानोपपद्यतेतदितिज्ञापकत्वंस्त्रियामित्यस्यप्रकृतिविशेषणत्वज्ञापकत्वंचेतिबोद्धव्यम्।तत्करणेएतद्द्वारेनिरपिअनेनैवउपसर्जनपदेनोभयोरपिग्रहः अनपत्येति।यद्यप्यपत्यग्रहणंकर्तव्यमितिवार्तिकंतथापिअपत्याधिकारविहितपरंतत्तादृशञ्चगर्गादियञ्जेवनतुदेवाद्यञ्।तस्यापत्याधिकारात्प्रागेवपाठात्।अतएवभाष्यकृताकञ्जकरणेयञञ्चेतिगर्गादिभ्यःअयञ्जितिचअकारःप्रश्लिष्टः।यस्कादिभ्योगोत्रेःयञञोश्चेतिसूत्रेयेवम्।प्राचांष्फतद्धितःतद्धितग्रहणंप्रातिपदिकसञ्ज्ञार्थम्।ननुतांविनापिषिकरणसामर्थ्यादेवङीषभविष्यति।एवंतर्हितद्धितग्रहणंगमिञ्नादपिक्वचित्ष्फदृतिज्ञापयति।यञञेसवर्णदीर्घेणापिरूपसिद्धौयस्येतिलोपस्यानावश्यकत्वात्।तेनआसुरेरुपसंख्यानमितिवक्ष्यमाणंसिद्धति।आयनेयीनीयियःफढखछघांप्रत्ययादेःकारउच्चारणार्थः।आयनीनोनकारस्यनेत्वम्।फिनोनित्करणसामर्थ्यात्।कौरव्यौकुर्यंतर्हियद्यसौकूपमाण्डूकितवैतावनिकःस्यादृतिभृञःक्तादङ्।कैशोरंसाहचर्यादपत्यप्रत्ययान्तस्यैवमाण्डूकस्येहग्रहणम्।दृढतमाण्डूकस्येयंभार्येतितस्येदमित्यणं।कुमारीति।प्रथमवयोवाचीएषशब्दः।नत्वनूढस्त्रीपर्युक्तः।वृद्धकुमारीतिनुगौणःप्रयोगः।त्र्यनीकेति।त्रयाणामनीकानांसमाहारः।अत्राजादेराकृतिगणत्वात्टाबृदितित्र्यनीकाधिकरणेमीमांसकाःपञ्चावयवानित्यनुगोरितिङीपमाभूत्ठगन्तत्वानुस्यादेवेतिचेत्।न।ठकोयोःकारःदृतिव्याख्यानात्।द्विबिस्तेति।सुवर्णबिस्तौहेम्नोसेदित्यमरः।आचितोदशभारास्युः॥णमित्याशयेनात्।अणर्थमिति।ङीबित्यर्थः।ताच्छीलकदृत्युक्तेस्तदस्यांप्रहरणमितिणेदाण्डेत्येव।अकारःप्रश्लिष्टदृतिःतद्वार्तिकप्रत्याख्यानायेतिशेषः॥अभिजिद्विदभृदित्यादिसूत्रेःस्त्रियामित्यनुवृत्तेस्तस्यगोत्रार्थकत्वेपिनतत्रङीप्सिद्धान्तेपीष्टः।संघाङ्कौतिसूत्रेएतद्भाष्यप्रामाण्यादेकानुबन्धकपरिभाषायाअप्रवृत्त्यागर्गादियञएवग्रहणमितिभावः॥एवमिति॥अकारःप्रश्लिष्टदृत्यर्थः।प्रातिपदिकसञ्ज्ञार्थमिति।तत्फलंचङीषितिभावः।नचलिङ्गविशिष्टपरिभाषयातसिद्धिः॥एतत्सूत्रस्थैतत्समानार्थकभाष्यप्रामाण्येन[illegible]प्रत्ययप्रकरणेनु

पस्थितेः॥सामर्थ्यादेवेति॥अप्रातिपदिकत्वेपीतिभावः॥उच्चारणार्थदृति।तेनदृकआदेशसिद्धिः॥नित्करणेति॥असञ्ज्ञातविरोधन्यायेनसहकृतेत्यर्थः॥नात्रेति॥[illegible]
यामपिप्रयोगादितिभावः॥गौणदृति॥पुंसाःसंप्रयोगरूपसादृश्यादितिभावः॥ठगन्तत्वादिति।द्वाभ्यांशताभ्यांक्रीताद्विशतेत्यादौनिषेधश्चरितार्थोऽत्रहिकनोलुक्।कम्बल्यमिति।अप
रिमाणेत्वेयेत्ययोर्ग्रहणंनियमार्थमुन्मानस्यचेद्विरूकम्बल्ययोरेवेति।तेनान्यत्रोन्मानेद्विपलीद्विनिष्कीत्यादिसिद्धिः॥श्रुतत्वादिति।अवान्तरवाक्यार्थबोधोत्तरंयेनविधिरित्यस्यप्रवृत्तेस्त
द्विकम्बल्येतिद्वाभ्यांकम्बल्याभ्यांक्रीता।कम्बल्यमूर्णापलशतम्।कम्बलाच्चसञ्ज्ञायामितियत्।क्रीतार्थस्यठओलुक्।द्व्याढकौपचतीति।आढकाचितपात्रत्ववान्य
तरस्याम्।द्विगोष्ठश्चेतिस्थूलभ्यांमुक्तेप्राग्वतीयष्ठञतस्यलुक्।एतेनद्व्याचितात्मानम्।काण्डान्तात्षोडशहस्तप्रमाणोदण्डःकाण्डम्।यद्यपिविशेषणेनतदन्तविधिःसिद्ध
स्तथापिअन्तग्रहणेअसतिक्षेत्रदृत्येतत्श्रुतत्वात्काण्डस्यैवविशेषणंस्यान्नतदन्तस्य।ततश्चेहापिस्यात्।द्वाभ्यांकाण्डाभ्यांकाण्डप्रमिताभ्यांक्षेत्राभ्यांक्रीताद्विकाण्डीवडवेति।द्
हतुनस्यात्।द्विकाण्डाक्षेत्रभक्तिरिति।अतोन्तग्रहणेमणिपात्रवदृति।यत्तुप्राचोक्तंद्वयसचोलुगिति।तन्न।प्रथमश्चद्वितीयश्चऊर्ध्वमानेमतौममेतिसिद्धान्तात्।द्विकाण्डीरज्जुरिति।नन्वि
हापरिमाणान्तादितिपूर्वेणनिषेधःस्यात्।काण्डशब्दस्यायामपरतयापरिमाणार्थत्वात्।परितःसर्वतःआरोहतःपरिणाहतश्चयेनमीयतेतद्विपरिमाणम्।आढककुडवादि।न
तुयथाकथंचित्परिच्छेदकमात्रम्।यदाहुः।ऊर्ध्वमानंकिलोन्मानंपरिमाणंतुसर्वतः।आयामस्तुप्रमाणस्यात्संख्यानंह्यातुसर्वतदृति।अतस्वद्विहस्ताभित्तिरित्यत्रङीब्न।अत्रा
हुः।नियमार्थमिदम्।क्षेत्रेस्वनिषेधोयथास्यादिति।अतोद्विकाण्डीरज्जुरित्यत्रङीर्वेवसूत्रस्यफलमिति।पुरुषात्प्रमाणेयद्यपिपुरुषशब्दोजातिवचनस्तथापिद्वौपुरुषौप्रमाणमस्या
दृतिवत्यप्रमाणेवर्तनण्वाप्रमाणशब्दस्यमानाधिकरण्यात्।वृत्तौतुनतत्स्वभावादेवातथाचभूत्वसूत्रम्।पञ्चारत्निःपुरुषदृति।द्विपुरुषीति।अत्रन्यासकारःप्रमाणेलोद्विगोर्नित्य
मितिद्वयसचोलुगित्याह॥ॐकालेश्रुतत्वात्तेनैवसंबंधेजातेपश्चात्तदन्तविधावपिपुनर्व्यापारेमानाभावदतिभावः॥दृहापीति।दृहैवेत्यर्थः॥सिद्धान्तादिति।षोडशहस्तप्रमाणंदण्डार्थका
दण्डशब्दस्तुतिपरइतिनतस्योर्ध्वमानत्वमितिभावः॥प्रमाणेवर्तनण्वेति।परिच्छेदकेवर्तनदृत्यर्थः॥तत्स्वभावादिति।वृत्तिस्वभावादित्यर्थः॥द्वयसचोलुगिति॥तस्यायंभावः।आयामोदैर्घ्यं

नन्विहापिनिषेधात्प्रमाणवतुलानांचतुलायांयेयत्वेकीयेतत्रकीयेतत्रकीयेतत्र

प्रमाणवाचित्वाभावेनेति।तिर्यङ्मानस्यैवप्रमाणत्वात्।तिर्यङ्मानस्यैवायामपदेन प्रमाणलक्षणेग्रहणेनतूर्ध्वमानस्य।ऊर्ध्वकिलोन्मानमित्युक्तेरितिभावः॥द्विगोर्लुगित्यशेपिप्रमाणेदृत्यनुवर्तनेएवेतितात्पर्यम्।प्रमाणत्वेनप्रसिद्धादृति।तिर्यङ्मानत्वेनप्रसिद्धादृत्यर्थः॥शमादीनामूर्ध्वधरदिगवस्थितवस्तुपरिच्छेदकत्वेपितिर्यगवस्थितवस्तुनोपिपरिच्छेदकत्वात्तत्वेनप्रसिद्धिरस्ता।अन्यथेति।नचप्रमाणेलदृत्यत्रसमर्थानांप्रथमादेत्यतोवेत्यनुवृत्तेरुक्तप्रयोगसिद्धिः॥आद्यपदयोरननुवर्तनेनवेत्यस्याप्य

तन्न।पुरुषशब्दस्यप्रमाणवाचित्वाभावेनप्रमाणेलदृतिश्लोकवार्तिकस्यतत्राप्रवृत्तेः।येहिशमादिवत्प्रमाणत्वेनप्रसिद्धास्तत्रैतत्प्रवर्ततेननुपुरुषशब्देपि।अन्यथापुरुषहूयसमित्यत्रापिलुक्स्यात्।स्पष्टंचेदंपुरुषहस्तिभ्यामणंचेतिसूत्रेपदमञ्जर्याम्।नचैवंद्वयसज्दघ्नचावपिनास्मात्प्रातामितिवाच्यम्।ऊर्ध्वमानेर्मतौममेतिवचनात्।एवंपुरुषात्प्रमाणेदृत्यस्यापिसामर्थ्यादेवप्रवृत्तिः।यत्तुतत्रैवसूत्रेद्विगोर्लित्यंलुगितिवृत्तिग्रन्थमुपादायहरदत्तेनोक्तम्।तस्मादप्राप्तएवात्रलुविधीयतदृति।तदपिचिन्त्यम्।मुनित्रयानुक्तसमविधानोक्तेर्व्याहतत्वात्।यदपिप्राचीनप्रक्रियांव्याचक्षाणैरुक्तंपुरुषहस्तिभ्यामित्यत्रपठ्यमानेनवार्तिकान्तरेणलुगितिनदपिरभसोक्तिमात्रम्।उदाहृतसूत्रस्यभाष्यवार्तिककाराभ्यामस्पृष्टत्वादित्यास्तांतावत्।वस्तुतस्तु।पुरुषात्प्रमाणदृतिसूत्रेद्विगौस्तद्धितलुकिदृत्यनुवर्तते।तत्सामर्थ्यात्लुग्भविष्यति।हरदत्तोक्तिरपिकथंचिदेवंपरतयैवनेयेतिसहृदयैराकलनीयम्।प्रमाणेकिम्।द्वाभ्यांपुरुषाभ्यांक्रीतादिपुरुषागौः।तद्धितलुकीत्येवासमाहारेपञ्चपुरुषी।ऊधसोनङ्॥

ॐ संबन्धात्॥लुक्स्यादिति॥शमदृत्यादाविवेतिभावः॥सामर्थ्यादिति॥तिर्यगवस्थितवस्त्वपरिच्छेदकत्वेपिसामर्थ्यात्प्रमाणपदस्यपरिच्छेदकमात्रपरत्वमितिभावः॥लुगप्यास्पिष्यतदृति॥दृदमपिवृत्त्याशयवर्णनमात्रम्।वस्तुतस्तुद्वौपुरुषौप्रमाणमस्यादृत्यर्थेनदृस्यपरिमाणमितिठकष्ठञोर्वाद्व्यैतिलुकिशस्यचारितार्थ्यात्तदाशेयेनमानम्॥तत्रहिपरिमाणशब्देनोत्तरसूत्रानुरोधेनपरिच्छेदकमात्रग्रहणमितितत्त्वम्॥

नादेशेनेति।अतएवऊधसोनकारोलिङ्गाधिकारेदृतिवार्तिककृतोक्तम्।एतेनलाक्षणिकत्वादस्यानोऽङ्गोपोनदृतिनस्यात्।कुण्डोधन्यादिभ्यआचारक्विप्यात्मनेपदार्थचङ्-का
रदृत्यपास्तम्।अङ्गत्यवार्तिकभाष्यप्रामाण्येनानङ्ग्रहणेप्रतिपदोक्तपरिभाषायाआचारक्विबभावस्यचतदन्तेआत्मनेपदाभावस्यवाकल्पनातूतदयुक्तमिति।अन्तर्वतीत्यत्रमनुपोऽप्र
त्ययस्यतिभावः।।न्त्रम्धेति।विभाषासपूर्वस्येत्यत्रयत्नसंयोगदृत्यस्यासंबन्धात्।अतएवाशायाःपतिराशापत्नीतित्रोदाहृतंभाष्ये।आशापूरकत्वेनकस्याश्चित्पतित्वमितिभावः।।दृत्सु
नादेशेनैवसिद्धेःनङ्करणंधनुषश्चेत्येतदर्थम्।दाम।बहुव्रीहिविशेषणत्वादेवसिद्धेअन्तग्रहणंस्पष्टार्थम्।संख्यादेरिति।स्वरितत्वबलादेकदेशएवानुवर्तनदृतिभावः।
केवलमामकादित्यादिति।अद्यस्यामामकीतनूमित्रावरुणयोर्भागधेयी।अनिषव्यास्तन्वःसन्तुपापीः।उतापरीभ्योमघवाविजिग्ये।समानीवआकूतिः।आर्यकृती।सु
मङ्गलीशिवारुद्रस्यभेषजीप्रत्युदाहरणंत्विति।यत्तुप्राचाअन्तर्वतीमतिवतीतिप्रत्युदाहृतम्।तदयुक्तमितिभावः।व्यस्तेकथमिति।यत्तुप्राचा समस्तेप्युपचारद्
निर्वर्णितन्तन्मुधेतिभावः।पूतक्रतोरैचाऐकारादेशः।नतुप्रत्ययः।उत्तरसूत्रेउदात्तदृत्युक्तेः।नत्विति।अन्यथारषाकपिशब्दोनषान्तेदूयोश्चबहूषोगुरुरिति
मद्योदात्तउदात्तत्वंप्रयोजयति।अम्न्यादिषुत्रिष्वित्यनेनन्तरतमदृत्येवसिद्धमितिप्राचांग्रन्थाविरुद्धोरन्नितिभावः।उदात्तैकारदृति।सुनुशब्दोह्यादयुदात्तः।भृस्तृस्निहीत्या
दौमनेरुप्रत्ययविधायकेसूत्रेधान्येनिदित्यधिकारात्समासनिर्देशेनैतदर्शयति।उदात्तदृत्यनुवर्तमानंसंबन्धानुरोधेनैरकारेणैवसंबद्धतेनत्वौकारेणापीति।ततश्चयदु
क्तंप्राचाऐकारौकारउदात्तौस्तदनितदुपेक्ष्यम्।वृत्तिपदमज्झर्यादिविरोधादितिभावः।मनायीतिमद्योदात्तम्।दृतरदूयमायुदात्तम्।एताःकर्बुराःवर्णानामिति।एतःशेणः।
शितिःएश्निःएषत्।दृत्युदाहरणानित्र्येण्यंति।अत्रउत्तरपदस्योपसर्जनत्वेपिसमस्तस्यअनुपसर्जनत्वमितिभावः।सञ्ज्ञात्वात्रत्वंक्वान्दसत्वाद्वा ।।ञ्क्तेरिति।प्रत्ययत्वेहिआ
युदात्तश्चेत्येवसिद्धेतदुदयर्थंस्पष्टमेवेतिभावः।।नत्वौकारेणेति।ततश्चसआन्तरतम्यादनुदात्तएवेतिभावः।दृतरदूयम्।मनावामनुरित्येतत्।।समस्तस्येति।एतच्चग्रह्यवृत्त्यनुसारेणो
क्तम्।टिड्ढाणञित्यादावित्यत्रापिगृह्यमाणविशेषणत्वमेवेत्युपमानानीतिसूत्रभाष्यसंमतेपस्त्रिष्वित्यत्रेषुस्त्रीत्येणीतिबोद्धव्यम्।क्वान्दसत्वाद्ङीप्।तत्यनयसञ्ज्ञात्वानङ्ङीकारेआह।।क्वान्द

प्राञ्चइति॥कैयटादयस्त्वर्थः।छन्दसेषुसूत्रेषुवाग्रहणवदिहमेकइत्यपीतितेषांभावः॥नप्रत्ययेइति।दृशपाद्यनुसारेणेदम्।तत्रहिनप्रत्ययप्रकरणेतृषिमृषिकृसिकृषेश्चकिदितिङ्लच्प्रकरणेकृपेश्चेतिपठितम्।कपिःसौत्रइतिचोक्तम्।पञ्चपाद्यांतुकृषेर्वर्णइतिनक्प्रत्ययः।कमेःपञ्चेतिङ्लजित्युक्तम्।पठ्यतइति।इदंचासिद्धवत्सूत्रेभाष्येस्थ
ष्टम्।उक्तंरूपमितिनान्तंरूपमित्यर्थः।णिचिमस्तद्धितइतिटिलोपेतद्भावःस्पष्टएव॥नचनस्तद्धितइतिटिलोपोनेष्टवद्भावेनटेरितिनुप्रकृत्यैकाजितिनिषिद्धमितिवाच्यम्।अस्य
मतस्यनामधातौदूषयिष्यमाणत्वात्।तस्मात्प्रत्ययेतोक्तम्।मुख्यमतेइति॥नस्तद्धितइत्यस्यापिप्रकृतिभावइतिषपूर्वेतिप्रकृत्यैकाजितिसूत्रभाष्येध्वनितत्वेनपूर्वटिलोपाभावेपि
क्रमेकेइति।अत्रछन्दसीतिभाष्योक्तेः लोकेगतौगणस्तूर्णमसिक्निकानामित्यादिप्रयोगाःग्रामादिकाइतिप्राञ्चः।वस्तुतस्तु छन्दस्येकेइत्यन्वयात्भाषायामपिदृश्यं
भाष्याभिप्रेतम्।अन्यथाएकग्रहणंनकुर्यात्।नचछन्दसिपलिक्नीरिद्युवतयइत्यादिप्रयोगेषुकश्चिद्विप्रतिपद्यते।विशुद्धवाचीतिदृशेधनेइतिस्मरणात्।अथवा
तःसितोगौरइतिकोशेतुविशुद्धत्वसाधर्म्यात्प्रयोगउपनिबद्धइतिभावः।लघाविति।अन्तेएकस्मिन्लघौहूयोश्चलघ्वोःपरत्वेचहूयोबहूचकस्यगुरुरुदात्तःस्या
न्।अषितिअचःप्राचांसञ्ज्ञा।कृणोतिकृषेश्चेतिनक्प्रत्ययेकपेश्चेतिसौत्राद्धातोरौणादिकेदृलचिचकृल्सकपिलावन्तोदात्तौ।षिद्भ्योदिभ्यश्चेत्यत्रशब्दोत्रपठ्यते।
तेनत्रत्नेभ्योङीप्पुल्लिङ्गत्वंचयत्रोचाश्नुनीत्युदाहृततत्त्वामादिकम्।यत्तुव्याचक्षतेश्वानमाचष्टेश्वेवाचरतीतिवार्थेणिचःक्विपोवाकौउपसर्जनत्वात्ङीषभावेनिः
श्वनीत्यादिवत्ङीविति।तन्न।णिचिसंप्रसारणटिलोपयोरुक्तंरूपंमुख्यमतेदुर्लभम्।अन्यत्रतुआस्तांकथंचित् ॥
संप्रसारणेवर्णादाङ्गमितिपररूपात्पूर्वटिलोपइतिसंप्रसारणटिलोपयोरिति।अन्यत्रक्विबन्तात्कौअनुनासिकस्येतिदीर्घेपिएकदेशविकृतन्या
येनानल्लमितिसंप्रसारणंभवतीतिभावः॥कथंचिदिति॥अनेनारुचिःसूचिता।नद्वीजमेषामनभिधानम्।अन्यथाऽनुपसर्जनादितिसूत्रस्यतदन्तविधिज्ञापकताभाष्योक्ता
भज्येत।किंचावश्वाणकर्त्रादिरूपार्थस्यापिश्वशब्दार्थत्वेननस्यानुपसर्जनत्वादस्येवङीषःप्राप्तिरभिव्यक्तेतिन्यायस्तुपदकार्यविषयएवेति ॥

इत्याहुरिति । अत्रारुचिबीजंत्वाकडारसूत्रस्थभाष्यविरोधस्तत्रहिसमस्तकृदन्ततद्धितसर्वनामजातिसंख्यासञ्ज्ञाशब्दातिरिक्तप्रातिपदिकमात्रस्यगुणवचनसञ्ज्ञा
कृतावहुशब्दस्यसंख्या।अग्रार्थंबहुग्रहणमपिमानम्।सत्त्वेनिविशतद्त्यादिगुणलक्षणमपितदेकवाक्यतापन्नमित्यन्यत्रप्रपञ्चितम्।व्यर्थमेवेति।उत्तरार्थमितिवदतां
मतेद्तिशेषः॥गौणीवृत्तिरिति।लक्षणेत्यर्थः।नत्वेषागौणीसादृश्यसंबन्धमूलकलक्षणायाएवगौणीत्वात्।दृङ॰ग्रेतिसूत्रेद्ति॥अपादानेल्यिोर्घञञउपसंख्यानन्दन्ता
आवपनंचेदिति।ओप्यतेनिसिप्यतेधान्ययस्मिन्।गोणान्येति।यस्मायाद्दिछकंनाम।अकृत्रिमेति।यथासैषास्थलीयत्रविचिन्वतात्वामिति।स्थलान्येति।कृत्रिमैःपुरुषेण
संस्कृता।यथास्थलयोदर्कपरिच्छेन्नाभाणापक्वा।अयोविकारद्ति।फालद्तिप्रसिद्धः।कुशान्येति।कुन्दोगाःस्तोत्रीयागणनार्थान्औदुम्बरान्शङ्कून्कुशाद्तिन्यवहर
न्ति।अतःकृकमीतिसूत्रेहनोतूपायनेतिवार्त्तिकेकुशावानस्यस्थानामायातेतिश्रुतौचप्रसिद्धएवायम्।पतिंवरेति।तथाच।पाणिग्रहणोत्कण्ठाभिधायित्वाद्गुणवचनोय
मितिभावः।बह्वादिभ्यश्चेतिबहुशब्दस्यगुणवाचित्वातपूर्वेणसिद्धेउत्तरार्थंग्रहणमित्याहुः।वस्तुतस्तुबहुशब्दोनित्यंकुन्दसीत्युत्तरसूत्रेचिदियमप्यर्थमेव।सर्वविकल्पानां
कुन्दसिव्यवस्थितत्वात्संयोगादिति।तथाचगौणीवृत्तिरितिभावः।यदातुमुख्यार्थांत्तस्येदमित्यणतदागौपीत्येवभवति।योगश्चेद्दम्पतिभावएवेत्येकोवस्तुतस्तुसंकोचेमाना
भावाज्जन्यजनकभावोपिगृह्यते।तथाचभट्टिः।कौशल्यायासाविसुखेनरामःप्राक्केकयीतोभरतस्ततोभूदिति।केकयदुहिताकेकयी।जनपदशब्दादित्यपत्यप्रत्ययेतुकैकेयी
तिस्यात्।नचतस्यअतश्चेतिलुक्।नप्राच्यभर्गादीतिनिषेधात्।तथाचकालिदासः।कैकेयिकायाःफलितास्तवेतिएतेनदेवकीव्याख्याता।दुष्टायवोयवानीति।जात्यन्तरमेवानेना
भिधीयते।अयमेववातस्यदोषः।यदुक्तयवस्त्वजातेरभावेपितदाकारानुकृतिः।ङीषष्वाच्यद्ति।दृदञ्चतीयेभाष्येदृङ॰ग्रेतिसूत्रेस्थितम्।कथमिति।यत्तुवदन्ति।दीर्घोच्चारणसा
मर्थ्याद्आअनुकृद्तिपदंविभज्यते॥ञ्वादीनितित्रोक्तम्।ञ्पेत्याधीयतेयस्माद्तिविग्रहः।दीर्घोच्चारणेति।नचेन्द्रादिशब्देभ्यआचसाणणिविटिलोपेइन्द्राणीतिसिद्ध्यर्थंतवअ
दन्तत्वाभावेननत्राप्राप्तेः।पदंविभज्यतेद्ति।तत्रनकारोच्चारणसामर्थ्यात्श्रुतक्रमानुरोधेमचपूर्वमाकारस्ततोतआनुगितिबोद्धम्।स्पष्टार्थंदीर्घाकारआदेशउक्तः॥

प्रसङ्गादिति।इन्द्रादिशब्देदृतिभावः।अकारोच्चारणेति।अनुकीतिशेषः।अल्लोपोनदृत्यस्यबाधेनेतिअल्लोपोनदृत्यत्रलक्षणप्रतिपदोक्तपरिभाषयाअप्रवृत्तेर्बहुव्रीहेरूधसदृतिसू
त्रभाष्यसंमतत्वयाःकाराभावेऽवश्यप्राप्तस्यअल्लोपोनदृत्यस्यबाधेनाकारोच्चारणस्यचारितार्थ्यादित्यर्थः।नभविष्यतीति।एवंचनतद्बाधार्थमाकारोच्चारणमितिपररूपस्यनेत्यबा
धादितिभावः।पररूपबाधनार्थमिति।अल्लोपबाधेनचरितार्थस्यपररूपबाधकत्वेमानाभावेनेन्द्रशब्देपररूपबाधायाकारोच्चारणस्यावश्यकत्वेनत्वदुक्तकल्पनानवकाशदृतिभा
तत्रेन्द्राद्रीनामनुकैवसिद्धेआकारादेशविधानसामर्थ्यात्क्वचिदन्यतोपिविधानमनुमीयतेतेनब्रह्माणीसिद्ध्यति । तच्चिन्त्यम्।अनुकिकृतेर्वीगुणेदृति
पररूपप्रसङ्गात्।वुन्वकारोच्चारणसामर्थ्यादेवौभविष्यतिअन्यथाहिनुकमेवकुर्यादितिचेन्न।अल्लोपोनदृत्यस्यबाधेनचरितार्थत्वात्।पत्युर्नदृतिवदादेशेक
र्नत्वेआगमलिङ्गंवकारोच्चारणसामर्थ्यादेवाल्लोपोनभविष्यतीतिचेन्नासर्वशब्देकारस्यचारितार्थ्यात्।नहितत्रलोपोस्ति।वुसंयोगादितिनिषेधात्।तस्मात्क
कारोकारयोःसामर्थ्यविरहेपररूपबाधनार्थंतेनार्थोच्चारणमावश्यकमिति।एतेनानुकृस्वादिरेवलाघवादृक्तव्यदृतिहरदत्तोक्तिरपिप्रत्युक्ता।कर्मण्यणितिसूत्रे।तदन्तान्
ङीषःपूर्वपदात्संज्ञायामितिणत्वम्।वस्त्रंक्रीतीति।वस्त्रमिमंक्रीतदृत्यस्यामवस्थायांप्राक्सुबुत्पत्तेःसमासेऽदन्तत्वान्ङीषःक्वचिन्नेति।कर्तृकरणेकृतेतिसूत्रेबहुल
ग्रहणात्क्वचित्सुबन्तेनसमासः।तत्रचसुपःप्रागेवान्तरङ्गत्वात्टापःततोदन्तत्वाभावान्ङीषदृतिभावः।तेनबह्वीति।अयंभावः।बह्वोर्नञ्ववदुत्तरपदभूम्निनञ्
सुभ्याम्।जातिकालसुखादिभ्योनाच्छादनात्नोकृतमिनप्रतिपन्नाःदृतिह्यन्तोदात्ततांविधायकानि।तत्रजातिपूर्वादित्युक्तेबह्वादिपूर्वकस्यार्थाद्ग्रुदःसदृति।अस्वा
ङ्गपूर्वपदादिकल्पस्यवक्ष्यमाणत्वादिहस्वाङ्गपूर्वपदस्योदाहरणमित्याह।ऊरुभिन्नीति ॥ ७७ वः। ङीबिति।इन्द्रवरुणेतिसूत्रेविन्द्रीत्यादिव्यावृत्त्यर्थमुदात्तनि
वृत्तिस्वरेणचस्वरेनविशेषदृतिभावः।सुबुत्पत्तेरिति।टाबुत्पत्तेश्चेत्यपिबोध्यम्।बहुलग्रहणादिति।ततश्चगतिकारकेत्यादेरनित्यत्वेनाप्रवृत्तिरितिभावः। सुखादिभ्यदृति॥ रामः
सुखादयश्चसुखादिभ्यःकर्तृवेदनायामित्यत्रपठिताःसुखदुःखकृच्छ्रादयःसकृदाख्यातनिर्ग्राह्येत्यन्तर्हितीयंलक्षणम ॥ ११८

तत्रारब्धानमुपदेशदित्याशयेनाह॥एकस्यामित्यादि॥ब्राह्मणत्वमप्येवंतत्पितृपितामहादौसुग्रहमितिबोद्धव्यम्।द्व्यंचनाकृतिग्रहणाब्राह्मणक्षत्रियादाकारस्यसमत्वादितिबोद्धव्यम्॥बाधतेइतिगोत्राणीतिशेषः।प्रतीकमादायेति।औपगवीत्यस्यगोत्रानन्तरापत्यसाधारणत्वेनविशिष्यइतितदुक्तिरुपेक्षेत्यर्थः॥एतेनजातिलक्षणेएकोगोत्रेइतिसूत्रस्यभाष्यप्रामाण्येनगाजातान्तादिति।वर्णादनुदात्तादितिवहुव्रीहेरुदात्तादित्येवसिद्धेऽन्तग्रहणंनित्यत्वप्रतिपत्त्यर्थम्।वाजातेइतितुवैकल्पिकउदात्तोनतुनित्यइतिभावः।सुमुखाशालेति।एवंचफलमुखीकारणमुखीचानवस्थेत्यादिप्रयोगाःप्रामादिकाइतिबोद्धव्यम्।उरःक्रोडेति।स्त्रीलिङ्गोयमितिहरदत्तादयःतत्रोपसर्जनह्रस्वत्वेकृतेदन्तत्वान्ङीषःप्राप्तिः।अमरस्तुनुनाक्रोडंभुजान्तरमित्याह।रत्नमतिस्तुपुंस्त्वमाह।गणेचक्रोडेतिप्रातिपदिकमात्रपठ्यतेनतुटाबन्तमितिगणरत्नमहोदधिकारः। एवंचाविशेषाल्लिङ्गस्यैप्युदाहरणंबोद्धव्यम्।माधवस्तुतुदादिगणेकुडनिमज्जनइतिधातावाह।क्रोडः।पञ्चक्रोडा।अश्वानामुरःटाबन्तोयंस्वभावतोविशेषविषयः।क्रोडादिषुटाबन्तस्यैवपाठाद्भुजान्तरमात्रवचनस्यक्रोडशब्दस्यबहुव्रीहौस्वाङ्गलक्षणेङीषोविकल्पेभवत्येव।कल्याणक्रोडी।कल्याणक्रोडामयूरीङीषोङीबादेशइतिदिक्।पञ्चम्याङोषितिप्रथमायाःषष्ठीकल्प्यतइतिभावः।यदितुस्वतन्त्रोङिप्स्यात्प्राग्गुल्फादावपिप्रसज्येत।पूर्वोक्तपर्युदासस्यनिषेधानांचानुवृत्तौतुगौरवमितिभावः।वृषलीति।एकस्यांहिव्यक्तौवृषलत्वेकथितेतत्पत्यतत्सहोदरादौकथंनेतिनातस्यसुग्रहादितिभावः।औपगवीति।अणन्तलक्षणंङीपंपरत्वादयंबाधते।एवंचापत्याधिकारेऔपगवीतिप्रतीकमुपादायपरिङ्गणञ्जइतिङीबितिव्याचक्षाणाउपेक्ष्यादितिभावः।ब्राह्मणीत्यत्रेति।एवंचप्राचोङीषुदाहरणंग्रामादिकमितिभावः।कुरूरितिलिङ्गविशिष्टपरिभाषयास्त्रीयः। प्राचामवन्त्यादिवद्वेतिसूत्रमुपन्यस्यादिवद्वावात्त्वादमद्त्युक्तम्।अत्रेदंवक्तव्यम्।परंप्रत्यादिवद्वावोविधीयते।तथाचेहाप्रत्ययइतिप्रतिषेधएवस्यान्नतुस्वादेयः॥

रिभाषिकमात्रस्यैवग्रहणम्।अवन्तीत्यादेर्गोत्रत्वारोपेणजातित्वमितिप्राचीनोक्तमदुष्टमित्यपास्तम्।लिङ्गविशिष्टेति।मत्तुलिङ्गबोधकप्रत्ययान्तत्वरूपलिङ्गवैशिष्ट्यप्रातिपदिकत्वस्यचेलाम्प्रत्ययपूर्वान्तत्वपरादित्वंयोरावश्यकत्वेनोभयत्रात्रयणेन्तादिक्त्वाभावान्नात्रेयमिति। तन्नुदृन्द्राणीत्यसिद्धापत्तेः॥तस्मात्प्रातिपदिकत्वोपयोगोनकश्चित्।नापिलिङ्गविशिष्टप्रातिपदिकस्येतिपरिभाषायांपठ्यतेनतया

प्रातिपदिकत्वतद्व्याप्यधर्मांशलिङ्गप्रत्ययार्थविशिष्टेतिदेशेचेति

ननुसप्तम्यधिकरणेचेतिनिर्देशेनविभक्त्येकादेशस्यान्तवत्त्वाभावज्ञापनादुत्सर्गस्यासार्वत्रिकत्वाच्चह्रस्वस्यसत्त्वप्रधानेएवप्रवृत्तेश्चकाण्डेदृत्यादौनदोषोतआह।श्वश्रूरित्यत्रेतिवचनमिति।दृश्यादि
पठितमित्यर्थः।उपमानाभावादिति।उपमानंसादृश्यंतदभावात्तस्यसमासावाच्यत्वादित्यर्थः।यद्वोपमानत्वेनप्रतीत्यभावादित्यर्थः।शफोरूरित्यत्रापिसादृश्यमूलकःशफत्वारोपोमनुसन्धेयइति
यत्तुन्यासकारस्तुः।आदिफङ्पेक्षयापूर्वः प्रातिपदिकंतदङ्गात्तदवयवत्वेनग्रहणात्पूर्वान्तवद्भावादितियावदिति।तदपिक्लिष्टंस्वपरग्रन्थविरुद्धम्।उक्तरीत्याहिकाण्डेकुण्डेदृ
त्यादावेकवचनमुत्सर्गतोनदृतिसुः प्रवर्तेत।तद्धारणार्थंचप्रत्ययग्रहणेप्रत्ययसज्ञाप्रतिषेधाभ्युपगमेप्रकृतेदोषः।श्वश्रूरित्यत्रैकादेशाभावाल्लिङ्गविशिष्टपरिभाषायाएवअवयवपूर्व
कत्वाच्च।यत्तुतत्रश्वशुरःश्वश्रूरितिनिर्देशात्तदवयवदृतिरित्यपि।तन्न।निर्देशस्यशब्दपरत्वात्।विपराभ्यांजेः।ङेर्यदृतिवत्।श्वश्रूरस्येति।प्रयोगलक्ष्येङीषिप्राप्तेऊङ्।तत्सन्नियोगेनच
विधीयमानोलोपःसंनिहितत्वादन्तस्यैवाकारस्यनत्वादेः।एतच्चवचनंश्वशुरःश्वश्रूरितिनिर्देशसिद्ध्यर्थकथनपरम्।अतोपिप्रथमाकारस्यदीर्घानशङ्क्यः।उपमानवाचिपूर्वप
दमिति।धान्याकराभ्यांकरभोपमोरुरित्यत्रतुनाकरभशब्दस्योपमानवाचित्वेपिपूर्वपदत्वाभावात्।शफौखुराविति।यद्यपिशफंक्लीबेखुरःप्रमाणमित्यमरः।तथापिशफशब्द
स्यपुंस्त्वमपिबहुसंमतमाशफाविवजर्भुराणेतिश्रुतौग्राम्यपशुसंघेषितिसूत्रस्थव्याख्यावसरेन्यासहरदत्तादिग्रन्थेषुवाचस्त्यादिनिबन्धेषुचप्रचुरप्रयोगदर्शनात्।लि
ङ्गमशिष्यंलोकाश्रयत्वाल्लिङ्गस्येतिभाष्याच्चाशफोभुजोगुदपोणेतिगणरत्नमहोदधौक्रोडादिगणेपाठाच्चाशफःखुरेगवादीनांमूलेविटपिनामपीतिहेमचन्द्रकोशाच्च।विश्व
कोशेचपुन्नपुंसकतोक्ता।वामोसुन्दरीऊरूयस्यादृतिविग्रहः।दृहसर्वत्रउपमानाभावादप्राप्तेविधिः।कथंतर्हिपीवरोरुपिबतीनबर्हिणदृतिकुमारःप्रमादश्चायम्।सञ्ज्ञापू
र्वकत्वात्संबुद्धिगुणोनेत्येके।हितेनसहेति।समोवाहिततततयोरितिव्युत्पादितः सहितशब्दस्तुनेहगृह्यते।एकदेशविकृतत्वंसहितग्रहणेदेवसिद्धेरितिभावः॥
रितिभावः॥ एवंचकरभोरूशब्देभाषोपविवक्षायामूङ्नभवत्येव। एतेनकरभोरूभिरितिन्यारख्यातम्। एकेदृति। तस्यभाष्यानुक्तत्वात्साधुत्वेननियामकनेत्यरुचिरत्र॥ ॥

ङीषिति। अतएवनप्राच्येतिसूत्रेयौधेयादिग्रहणंचरितार्थंतद्धिपर्य्वादियौधेयादिभ्यामणञावितिस्वार्थिकाञोतश्चेतिप्राप्तलुकोनिषेधार्थम्। तत्फलंचाञन्तत्वान्ङीन्न्यथास्यात्। ठगन्तत्वा
ङीनब्माभूदितिनरशब्दादिति। यद्यपिनृशब्देननारीसिद्धानरीचपुंयोगेदुर्वारातथापिनरत्वजातिमात्रप्रतिपादनेच्छायांनरीत्यस्यवारणार्थंनरग्रहणंबोद्धव्यम्। ननुवृद्धिविधान
सामर्थ्याल्लोपबाधोतआह। गुणेत्विति। अलोन्त्यपरिभाषाबाधएवन्याय्यइतिभावः॥ अन्तरङ्गत्वेनेति। सामर्थ्याद्धाधोह्यनुचितःन्यायप्राप्तबाधस्तूचितएवेतिभावः। कथंचिदिति
अञ्योकारइति। अञाअकारविशेषणंकिम्। शूरसेनी। जनपदशब्दादित्यञोतश्चेतिलुकिजातिलक्षणोङीष्। शार्ङ्गरवीति। मृङ्गरुशब्दाद्दक्षस्यार्थेण। नृनरेभ्योसिति।
नृशब्दाद्दक्रञेभ्यइतिङीपिनरशब्दाज्जातिलक्षणेङीषिप्राप्तेवचनम्। ननुनरशब्देलोन्त्यस्यवृद्धिःस्यात्। यत्वाद्वः। अन्त्यस्ययस्येतिलोपेनापहारादनन्त्यस्या
प्यकारस्यवृद्धिर्भवत्यान्तरतम्यात्। गुणेत्वन्याय्यकल्पनेत्यलोन्त्यपरिभाषाबाधस्यैवन्याय्यत्वादिति। तन्न। प्रत्ययस्तन्नियोगशिष्टग्रहणेवृद्धेरन्तरङ्गत्वेनपरमपिय
स्येतिलोपंबाधित्वाप्रवृत्त्योचित्यात्। किंचास्तुकथंचिल्लोपस्तथापिरेफस्यैववृद्धिःस्यान्नत्वकारस्य। अन्तरतमपरिभाषापेक्षयातोन्त्यपरिभाषायाः परत्वात्। अपिच
न्तरतमपरिभाषाःसदृशमादेशंप्रावर्तयतिननुरथानिनंनियच्छति। तत्कथंरेफस्यस्थानित्वव्यावृत्तिः। किंच गुणेतन्याय्येतिन्याय्योन्यसंज्ञस्त्वीयएवापरिभाषयोः
परस्परंगुणगुणिभावयोगात्। अत्रेदंतत्त्वम्। नरइतिरान्तलुप्ताकारानुकरणं नरःअःनरःनाचनरश्चतयोरितिव्याख्येयम्। यद्वानरस्यअःनरःकर्तृतत्वत्वरूपम्।
नाचनरश्चतयोर्नरयोः। नरस्यचप्रथमस्यवअकारोगह्यतेनतुद्वितीयः। प्रश्लेषसामर्थ्यात्। अधिकंशब्दकौस्तुभेबोद्धव्यम् ॥ ७ संनियोगशिष्तस्तन्नकारेत्यर्थः
। तत्कथमिति। स्थानेन्तरतमेदृतिसप्तम्यन्तपाठस्यभाष्येकुमार्यत्रेत्यादौयणनापत्त्यादूषितत्वादितिभावः। परिभाषयोरिति। तद्व्याख्यातग्रन्थानुसारेणेदंतद्धि अलोन्त्यस्येत्य
स्यैवबाधोनत्वन्तरतमपरिभाषायाइतिव्याख्यातम्। व्याख्येयमितिनृनरयोरित्यावर्त्ततेएकत्रपञ्चम्यर्थेषष्ठीताभ्यांङीनन्नरोःकारस्यचवृद्धिरित्यर्थइतिभावः। अतस्त्ववा
नरशब्देनातिप्रसङ्गः। यतोनरशब्दान्ङीनन्ततीयरेफान्तसंबद्धकारस्यैववृद्धिविधानात्वानरेनरस्यानर्थक्यात्ततोनङीनितिबोद्धव्यम्। तदाह। अधिकमिति ॥

अमरोक्तेरिति।तत्रस्त्रीत्वबोधेईकारसमभिव्याहारस्तन्त्रम्।केवलाकारान्तपुत्रशब्दस्तुपुंस्त्वविशिष्टस्यैवबोधकोऽतएवसपुत्रदत्यतोनसन्देहः।पुमांसंपुत्रमाधेहीत्यादौपुंस्त्वेनविशेषणंत्वतिशयितपुंस्त्वबोधनायेतिभावः।चिन्त्यमिति।चिन्ताबीजंतुस्त्रादिपुंशब्देभ्यःपरेङीनन्नेतत्पुरुषेपुत्रः पुंभ्यइत्यनेनपुंशब्दात्परपुत्रशब्दस्यान्तत्वपुरुषेपुत्रस्यादिरुदात्तइत्यर्थकेनलिङ्गविशिष्टपरिभाषयापुंशब्दोकारोदात्तत्वम्।पुत्रडादेशेतुननत्वस्वरनिमित्तसानुबन्धकत्वादत्रस्त्रोदात्तनिवृत्तिस्वरेणान्तो

पुत्रशब्दोत्रपठ्यतेशैलपुत्री।पुत्रीषहर्षहृदयेनमोनि।कुर्वेतदुर्वीपतिपुत्रिसर्वम्।नचपुत्रशब्दः कन्यायांनास्तीतिभ्रमितव्यम्।आत्मजस्तनयःसूनुःसुतःपुत्र
स्त्रियांत्वमी।आहुर्ईश्वरुरंसर्वेइत्यमरोक्तेः।अतएवप्रत्ययस्थादितीत्वप्रकरणेवासूतकापुत्रिकावृन्दारकाणामितिवार्तिकंतद्वाष्यादिकंचसङ्गच्छते।यत्त्वत्रहरदत्ते
नोक्तम्।केवलपुत्रशब्दःस्त्रियांनास्तीतितद्वाष्यादिविरोधादुपेक्ष्यम्।इत्वप्रकरणस्थस्वग्रन्थविरोधाच्च।दृदंतुचिन्त्यम्।कारिकत्यागदस्येतिसूत्रेसूतोग्रराजभोज
कुलमेरुभ्योदुहितुःपुत्रङेतिवार्तिकंकिमर्थमिति।यत्तुवदन्तिस्वरार्थमितितन्न।टित्वान्ङीपिकृतेउदात्तनिवृत्तिस्वरेणोदात्तङीनन्नेनतत्पुरुषेपिसमासस्व
रेणान्तोदात्तएवेतिस्वरभेदाभावात्।यद्यपिशार्ङरवादौपुत्रशब्दःप्रक्षिप्तोनतुसांप्रदायिकदृतिनदपिनउदाहृतप्रयोगविरोधात्।वासूतकेत्यादिवार्तिकेकैयटहरदत्तादि
कृताकारप्रश्लेषविरोधाच्चेत्यास्तांतावत्।अम्बष्ठेति।वृद्धेकोसलेतियङ्।कारीषमग्ध्येति।कारीषस्येवगन्धोस्यकारीषगन्धिः।उपमानाच्चेतिगन्धस्येदन्नदेशःतस्यगोत्राप
त्यंस्त्रीअणअणिञोरितिष्यञादेशः॥

ॐ दात्तत्वमिति।नादिन्याक्रोशेपुत्रस्येत्यस्यपुत्रटिअप्रवृत्तिस्तुनफलम्।एतत्संबन्ध्यचःपरस्यरआदिनीशब्दपरत्वासम्भवात्पुत्रटःस्या
निवद्भावेनदुहित्रशब्दत्वेपिनषडितिनिषेधोनास्यक्रन्नेभ्यइतिङीवृमात्रबाधकत्वात्टित्वसामर्थ्याच्चदृदंचवार्तिकंतत्पुरुषेष्वप्रवर्त्ततेकारेसत्येतिसूत्रेउपसंख्यानात्तच्चान्यासंभ
वात्पूर्वोत्तरसाहचर्येणचतत्पुरुषएवाएतेनबहुव्रीहौङीबर्थमिदमित्यपास्तम्।टित्वउपसर्जनत्वेनतत्रङीपोप्राप्तेश्चेतिदिक्॥

ङि·त्करणसामर्थ्यादिति। यङ·श्चेत्यत्रसामान्यग्रहणाविघातार्थङि·त्करणसामर्थ्यादित्यर्थः। योनकत्वाच्चेत्यपिबोद्धव्यम्। अनुक्तानामिति। तेनअल्पार्थेग्रामटिकाद्यः साधवः
दृदन्तुभाष्येनदृश्यते। टापः प्रागिति। ङीबादिषुङ·स्येत्सञ्ज्ञातुचुटुङ· दृतिसूत्रकरणेनसेत्यतिटीबाद्यण्यवातेसन्तुतद्धितान्तत्वात्प्रातिपदिकत्वेपिफिट्स्वरेण प्रकृतिप्र
त्ययविभागशून्येएवतत्प्रवृत्तेः। पकाद्यषकारभिन्नानुबन्धवैयर्थ्यापत्तेश्च। अतएवसिद्धान्तेलिङ्ग·विशिष्टपरिभाषयानात्रफिट्स्वरः। ङाप्प्रत्ययेविज्ञातीबडकारानुबन्धश्च
नकार्यदृत्यपरंलाघवम्। टिलोपस्यनस्तद्धितदृत्यनेनैवसिद्धेः। यस्येतिलोपेदृति। औङः श्यामितिवार्तिकस्याप्युपलक्षणम्। ओर्गुणेति। नचर्दृढृहर्णङीबादिषुतद्धितकार्यभा
सचयद्यपिस्त्रियामेवविहितः तथापिङि·त्करणसामर्थ्यात्तदन्तादप्ययं चापि। पौतिमाष्येति। पूतिमाषशब्दोगर्गादिः। तद्धिताः। बहुवचनमनुक्तानामुपसंग्रहार्थं महासञ्ज्ञाकरणंच
णंयस्येतिलोपेदृढृहर्णंचमास्विति चेत् मैवम्। यट्टीत्यत्रओर्गुणप्रसङ्गात्। शत्रन्तादिति। यौतिमिश्रीकरोतिपत्येतिव्युत्पत्तेः। केचित्तु बाहुलकात्यौतेरौणादिकंकतिप्र
त्ययंवदन्ति। उभयथापियुवतीनांसमूहोयौवनं त्यन्तात्तुअणिपुंवद्भावात्यौवनमित्येव। भिक्षादिपाठसामर्थ्यान्नपुंवदिति। वृत्तिस्तुभाष्यविरुद्धा। भाष्येतत्याठ
स्यप्रत्याख्यानादिति दिक् ॥ * इतिस्त्रीप्रत्ययाः * ॥ संकृष्टनाशिनीविजयतेतराम् ॥ विश्वेश्वरोविजयते ॥
वज्ञापनार्थन्तेनपट्वीत्यादौनोर्गुणइतिवाच्यम्। कुरूरित्यादिसिद्ध्यर्थंस्त्रीप्रत्ययेषुतद्भावज्ञापने आसुरायणीत्यादौष्फेपियस्येतिलोपानापत्तेः। अबण्यवद्दण्डिन्यित्या
दौटिलोपोनेतिदिक्। मिश्रीकरोतीति। आत्मानमितिशेषः। दिगिति। दिगर्थस्तुविकाराभावमात्रतात्पर्यकत्वेवृद्ध्यादीनामप्यभावापत्तिः। अतएवयुवतीकरनिर्मथि
तन्दधीत्यादिप्रयोगसिद्धिः। युवतिशब्देलिङ्ग·विशिष्टपरिभाषयैवप्रातिपदिककार्यसिद्धेः। त्रनद्धितादृतिअधिकारोलिङ्ग·विशिष्टपरिभाषा—नित्यस्त्रीष्णायी
दृतिदिक् * ॥ इतिस्त्रीप्रत्ययाः ॥ * ॥ गुरुचरणारविन्दाभ्यांनमः॥ करवीरपुरवासिन्यैनमः ॥ * ॥

नीलरूपवदिति। प्रत्ययस्यादिति सूत्रस्थेनासुबन्तदृनिभाष्यप्रयोगेणाक्वचिल्लाघवानादरस्यापि सूचनात्कर्मधारयान्मत्वर्थीयोपिक्वचिदिति ज्ञापनाच्चैतत्प्रयोगानुपपत्तिरितिवोद्यम्। नामार्थयोरिति। नामार्थश्चनामार्थश्चेत्येकशेषः। अभेदसंसर्गदृति। यद्यप्यभेदोनसंसर्गः; एहोः शिरइत्यादावौपाधिकभेदेनषष्ठ्युपपादनस्यभाष्येकृतत्वात्तथापिदृतरसंबन्धानवच्छिन्नविशेषणविशेष्यभावसंसर्गस्यतेनशब्देनाभिधानान्नदोषदृतिवोद्यम्। व्युत्पत्तेरिति। नीलमुत्पलमित्यादौतथाकृप्रत्ययादितिभावः। अषष्ठ्यर्थबहुव्रीहाविति। अत्रषष्ठीपदंसप्तम्याअप्युपलक्षणंवीरः पुरुषायसिन्नित्यत्राप्यव्यभिचारात्। एवं च प्राप्तोदकादावित्यर्थः। नचवल्मपेक्षावादेपिप्राप्तपदादिविषयेपचतीत्यादौकृप्रत्ययाग

श्रीः। मात्रशब्देतितस्यचावधारणमर्थः। मात्रंकात्स्न्र्येवधारणेदृत्यमरः। प्रातिपदिकार्थादीन्येवतन्मात्रमित्येवकारेणास्वपदविग्रहः। मयूरव्यंसकादित्वात्समासः। कृष्णदृति। यद्यपिनीलरूपवत्परोयमनियतलिङ्गस्तथापिवासुदेवेभगवतिनियतलिङ्ग एवेतिभावः। ज्ञार्न्नमिति। भावेल्युट्। द्रोणदृति। नचप्रातिपदिकार्थमात्रेग्रंथमेहास्त्वितिवाच्यम्। तथासतिपरिच्छेद्यपरिच्छेदकभावस्यसंसर्गविधयाभानायोगान्नामार्थयोरभेदसंसर्गएवव्युत्पत्तेः। नचाषष्ठ्यर्थबहुव्रीहौव्यभिचारः। एकार्थीभावाभ्युपगमात् ॥

ॐ स्यप्रत्ययार्थप्राधान्यस्वरसोत्यागेनविशेषणविशेष्यभावेपरीत्यस्मिन्नुतयाप्रकारीभूतकर्त्रादिकस्याभेदेनैवान्वयात्कृव्यभिचारदृतिवाच्यम्। नामजन्यप्रतीतिविशेष्ययोरेवान्वयः सचाभेदेनैवेति पदार्थः पदार्थेनेत्येतत्तिङ्योनियमदृतिनामजन्यप्रतीतिविशेष्ययोस्तथान्वयनियमस्यव्यभिचारदृत्याशयात्। पचतीत्यादौतिङंद्योतकतयाप्रत्ययार्थप्राधान्यत्यागेप्यत्रतस्यागेमानाभावदृस्वरसेन। प्राप्तोदकस्यकर्तृतयान्वयः। तस्यकर्मणीलक्षणेतितुनयुक्तम्। अन्यपदार्थस्यदुरुपपादत्वात्। एकार्थीभावेति। एवंचैकैवोपस्थितिर्व्युत्पत्तिप्रयुक्तेयश्चभिन्नोपस्थितिविषयादृतिनदोषदृतिभावः। एतेनराजपुरुषदृत्यादौव्यभिचारः; राजपदार्थपुरुषपदार्थयोः स्वस्वामिभावेनैवान्वयात्संबन्धिलक्षणायांतुनमानत्यपास्तम् ॥

मापीति। घटश्वेत्यादौ समुच्चयस्य घटेभेदसंबन्धेनान्वयादिति भावः। द्योतकेति। घटपदेनैव विशिष्टस्योपस्थितिरिति तत्रान्वयस्यैवाभावादिति भावः। अनएवानुभूयतेदृत्यादौ सकर्मकत्वम्। निपातातिरिक्तत्वेनविशेषणादोषदृत्यन्येदेवतार्थकेति। आमिक्षादेवतायुक्तोवदत्येवंषतद्धितदृनिमीमांसकमतेदृतिशेषः। एकार्थीभावादिन्नमस्माकंतुविशिष्टोपस्थित्यानत्रापीदृशान्वयोदुर्लभएवा द्रोणौव्रीहिमानयेत्यादित्वनभिधानान्नासर्पिःकुडवमात्रमित्यादौषत्वविकल्पोपिव्यवस्थितविभाषयानेतिदिक्। वसुतस्तिङ्समानाधिकरणेप्रथमेतिलक्षणैकवाक्यतयापरिमाणेत्यस्यपरिमाणेवर्त्तमानात्प्रातिपदिकादित्येवार्थः। नचप्रातिपदिकार्थत्वात्सिद्धिः। प्रवृत्तिनिमित्ततदाश्रयद्रव्ययोरेवात्रप्रातिपदिकार्थपदेनग्रहणाद्रोणादिपदानांचद्रोणत्वाद्येवप्रवृत्तिनिमित्तंपरिमाणत्वेनपरिमाणंतुलिङ्गवद्विशेष्यान्वय्येवद्रोणः परिमाणमितितु द्वौब्राह्मणावित्यादिवदुपपन्नम्। द्रोणत्वादिचेयत्ताविनापिनिपातार्थेनिषांद्योतकताभ्युपगमात्। नचसिद्धान्तेपिप्रकृतिप्रत्ययार्थयोरभेदान्वयोदुर्लभः अन्यत्रादृष्टत्वादितिवाच्यम्। देवताार्थकतद्धितादौदृष्टत्वादितिभावेः। वस्तुनंसंख्येतितथैवप्राचांव्यवहारात्। दृहसूत्रेअर्थेलिङ्गेचप्रथमेत्येतावदेवसुवचम्। दृतरत्सर्वंत्यक्तुंशक्यम्। तथाहिअर्थेप्रथमेत्युक्तेकस्यार्थेदृत्याकाङ्क्षायांयस्मात्त्वादिविधिःतस्येतिलभ्यतएवास्वादयश्चप्रातिपदिकाल्लिङ्गप्रत्ययविशिष्टाश्चविधीयन्ते। तदर्थत्वञ्चततोनियतोपस्थितिकत्वमेवा एवंचमृडानीहिमानीत्यादौयुंयोगमहत्त्वादेरपिङीस्त्वान्नियतभानेनप्रथमासिद्ध्यतीतिअपरमनुकूलम् ॥

शेषावच्छिन्नपलादिपरिच्छिन्नधान्यादिपरिच्छेदकलसमानाधिकरणोधर्मः। द्रोणःखारीआढकमित्येवनदृदाहरणंभाष्योक्तंसाधु। द्रोणोव्रीहिरितितुसिंहोमाणवकेदृतिवल्लक्षणयासाधु। लक्षणाचशक्यतावच्छेदकारोपएवा एवंचप्रातिपदिकार्थदृत्यस्यालिङ्गालिङ्गप्रवृत्तिनिमित्तकाश्चोदाहरणम्। अन्येसर्वेलिङ्गाद्याधिक्यस्य। परिमाणग्रहणपरिच्छेदकमात्रोपलक्षणम्। तदृथनयन्नाह। एतावदेवसुवचमिति। नियतोपस्थितिकत्वमिति। तदृच्चप्रवृत्तिनिमित्ततदाश्रयरूपम्। परिमाणञ्चप्रातिपदिकार्थेलिङ्गप्रत्ययविशिष्टार्थेतुलिङ्गंमहत्त्वादिकंचततोनियतोपस्थितिकमितिनत्सर्वंतदर्थत्वेनगृह्यतेलिङ्गोदाहरणंतदस्तटमितिबोद्धव्यम्। अकारान्तप्रातिपदिकात्कस्यापिनियमेनतु

सानस्यादिति।नचलिङ्ग·विशिष्टपरिभाषयासिद्धिः।यथान्यासेप्रातिपदिकार्थशब्देनप्रवृत्तिनिमित्ताश्रययोरेवग्रहणेनलिङ्ग·ग्रहणेनतन्मात्राधिक्यस्यैवग्रहणेनहिमानीत्या
दौमहत्त्वस्याधिक्यसत्त्वेनतदसिद्धिरित्याशयात्।द्रोणादिशब्देभ्यः परिमाणस्यापिनियतोपस्थित्यातदर्थएवेतिनेभ्यः प्रथमासिद्धिः।परिमाणग्रहणस्यमूलोक्तार्थकत्वे
नतथाबोधार्थेतस्याचश्यकत्वेनैतावदेवसूत्रयामित्युक्तेरसङ्गतिः।स्पष्टंबालक्षणार्थेति।दृंस्वरूपकथनंनतुप्रकृतोपयोगिपदस्यस्वार्थएवान्वाख्यातस्यपदान्तरसमभिव्याहृ
तस्यतिसिद्धान्तात्।लक्षणान्तर्भूतेति।सादृश्यसंबन्धमूलकलक्षणायाएवगौणीत्वमितिभावः।इथग्वेति।मीमांसकरीत्येदम्।त्रिकम्।स्वार्थद्रव्यलिङ्गसंख्याः।इत्याश्रीयते
इत्यनेनसूत्रारम्भेस्वानाअर्थशून्यंध्वनितम्।एवंचलिङ्ग·स्यापिसमोमैघुंसकादित्यादिशास्त्रबलेनप्रातिपदिकार्थत्वात्तत्रापिसिद्धिरितिभावः।विचित्रत्वेपीति।कचिल्लिङ्ग·

प्रथान्यासेतुसानस्यात्।यदितुअर्थशब्दोवृत्तिविषयपरःवृत्तिस्तुशक्तिर्लक्षणावागौणीतुलक्षणान्तर्भूता इथग्वास्तु।त्रिकंप्रातिपदिकार्थइत्याश्रीयतेतदालिङ्गे
त्यपिमास्तुलक्ष्मणांविचित्रत्वेपिनक्षतिः।नियमांशत्यागात्।तथाचअर्थेप्रथमेत्येवसारम्।द्रोणोव्रीहिरित्यपिद्रोणशब्दस्यतत्परिमितेरुपचारात्सिद्धम्।गौर्वाहिकद्र
तिवत्।एकोद्वावित्याद्यपिनकेवलाप्रकृतिःप्रयोक्तव्येतिनिषेधादेवसिद्धम्।अनन्वितार्थकप्रयोगापेक्षयाअनुवादकमात्रप्रयोगस्यन्याय्यत्वात्।एवंमात्रग्रहणमपि
व्यर्थम् ॥ ७ स्यनियमेनभानंक्वचिदनियमेनेत्येवंविचित्रत्वेपीत्यर्थः।तदाह।नियमांशेति।नियतोपस्थितिकइत्यत्रनियमांशेत्यर्थः।इत्येवसारमिति।प्रातिपदिकग्रहणस्यसूत्रोप
क्रमेसंख्याविशेषकत्वंचतन्माऽव्ययेभ्योप्राग्जातेभ्योविधानार्थत्वंवदतातद्धितश्चासर्वविभक्तिर्बहुषित्यादिसूत्रेषुअव्ययेभ्यःप्रकारान्तरेणविभक्तिंसाधयतापातिपदिकग्रहणंप्रत्या
ख्यातंभाष्यकृताम्।स्वादीनांप्रातिपदिकादेवविधानेनकस्यार्थेइत्याकाङ्क्षायांयस्मात्स्वादिविधिरस्तदर्थद्रव्यस्यलाभइतिभावः।उपचारात्।द्रोणत्वारोपात्।द्रोणवदिति।अत्रयथाव्रीहिके
गोत्वारोपस्तद्वत्वेनग्रहणप्रत्याख्यानोपायमाह।एकइत्यादि।एतदभिहितइतिसूत्रेभाष्येस्पष्टम्।न्याय्यत्वादिति।दृंचयथान्यासेप्यावश्यकम्।अन्यथाएकादिषुवचनविपर्ययोदुर्वारः

ज्ञापकेनेति।ननु प्रातिपदिकार्थएवेतिनियमात्तदाधिक्येः प्राप्तौकिंज्ञापकेनेतिचेन्न।यथाकर्मण्येवद्वितीयेतिनियमेनकर्मत्वाभावसमानाधिकरणार्थान्तरस्यैवव्यावृत्तिर्नतुत
त्समानाधिकरणार्थान्तरस्यातएवगवादेरप्यिपयदृत्यादावपादानत्वादिशक्तिबोधेपिद्वितीयाभवति।तथाप्रातिपदिकार्थाभावसमानाधिकरणार्थान्तरस्यैवव्यावृत्तिः स्यान्नतुतत्सत्त्वे
स्वकर्मत्वादेरितिभावः।नच प्रातिपदिकार्थाभावसमानाधिकरणार्थान्तरस्याप्रसिद्ध्यानियमव्यावर्त्त्याप्रसिद्धिरितिनियमसामर्थ्यात्तत्समाधिकरणार्थान्तरस्यापितेनव्यावृत्ति
रितिवाच्यम्।प्रातिपदिकार्थेस्वप्रथमानतुनिरर्थकेदृतितद्व्यावृत्तेरेवफलत्वात्तत्सत्त्वेतुकर्मादियोग्यार्थकप्रातिपदिकाद्वेनद्रहितस्वार्थेदृत्यर्थान्नदोषः।संख्याधिक्येतुभव
संबोधनेचेतिज्ञापकेनकर्माद्याधिक्येप्रथमायाअप्रवृत्तेः।यत्तुप्राचोक्तम्।प्रातिपदिकार्थः सत्तेति।यच्चव्याख्यातंयोर्थः सन्नेवकेवलंभासतेनजात्यादिरू
पेनलिङ्गसंख्याकारकयोगीसविवक्षितः।यथाऽव्ययार्थः।अव्ययार्थोहिकेवलमस्तीतिशक्यतेवक्तुंनपुनरीदृशस्तादृशदृतीतिचेन्नाऽद्यैनीचैरित्यादिशब्दानांस
न्नित्याकारकप्रतीतिजनकत्वंसर्वतन्त्रविरुद्धत्वात्।अस्त्यादिसामानाधिकरण्यस्यापिअसत्त्वार्थकेषुदुर्लभत्वात्।नलिङ्गसंख्याकारकयोगीतित्वदुक्तिविरोधाच्च।
पदान्तरेणापिस्यापितस्यअस्तिसामानाधिकरण्यमस्तीतिचेन्न।तस्याव्यावर्तकत्वात्।नपुनरित्यादिवाक्यशेषविरोधाच्च।कृत्स्नःश्रीरित्यादावव्याप्तेश्चानचलिङ्गग्रहणा
न्नसिद्धिः।मात्रशब्देनाधिक्यव्यवच्छेदात्।यदपिप्राचाव्याख्यातंयत्रार्थान्तरानपेक्षणशब्दप्रवृत्तिःससर्वःप्रातिपदिकार्थःशब्दप्रवृत्तिनिमित्तमितियावत्।।७३।।त्येवद्वयोरित्यादिभिर
सैकवाक्यत्वात्।वार्त्तिककृतातुअर्थनियममाश्रित्यमात्रग्रहणंसंबोधनेचेतिसूत्रंलिङ्गादिग्रहणंचप्रत्याख्यातमितिदिक्।जात्यादिरूपदृतिजात्यादिनारूप्यतेदृतिव्युत्पत्त्याजात्यादि
धर्मविशिष्टदृत्यर्थः।ननूच्चैरादीनामप्याधारतात्वविशिष्टाधारताशक्तिर्वाच्येतितदप्रसिद्धिरित्यतस्तद्व्याचष्टे।नलिङ्गेतिईदृशस्तादृशदृति।अमुकलिङ्गादिरित्यर्थः।ननुस
न्नित्याकारकप्रतीत्यभावेपिअस्तिसामानाधिकरण्यंस्यादतआह।अस्त्यादीति।विरोधाच्चेति।सन्नित्यनेनसामानाधिकरण्येकारकत्वस्यदुर्वारत्वादितिभावः।वाक्यशेषविरोधाच्चेति।
नतत्सत्वेलिङ्गादेरपिसाम्यवेननद्विरोधइतिभावः।अव्याप्तेश्चेति।ततः सन्नित्याकारकप्रतीतेरभावादितिभावः।अधिकव्यवच्छेदादिति।कृत्स्नत्वादेःसत्तालिङ्गाभ्यामधिकस्यभानादितिभावः

अलिङ्गे॰ति॰अलिङ्ग॰संख्यावेतौ॰केवलमनाश्रितंनिरपेक्षंलिङ्गादिनिरपेक्षंस्वार्थजात्याद्याहतुरित्यन्वयः॰असंभवीति॰प्रकारतायाविशेष्यनिरूपितत्वात्॰कारकादित्यादिनालिङ्ग॰म्॰
सिद्धान्तादिति॰ओत्सूत्रेकैयटेस्फुटमेतत्॰इदमेवयुक्तंविशिष्टरूपोपादानाभावादस्याअत्रप्रवृत्तेर्द्रोणादिशब्दानांलाक्षणिकत्वेपिगौणत्वाभावाच्चेत्यपिबोद्ध्यम्॰संबोधनपदमि
ति॰अत्रपुरुराजः॰आख्यातेसविशेषणंवाक्यमितिवाक्यलक्षणंतत्रास्यक्रियाविशेषणत्वाभावेवाक्यत्वेनस्यादितिसमानवाक्येइतिप्रकृत्यविहितोनिपातोनस्यादितिभाष्य
यथाउच्चैर्नीचैरिति॰अलिङ्ग॰संख्यावेतौकेवलंजात्यादिनिरपेक्षंस्वार्थमाहतुरिति॰तदपिन॰प्रवृत्तिनिमित्तमिहप्रकारीभूयभासतेतथाचतन्मात्रबोधोसंभवी॰यदिसोपी
स्तर्हिपटादिशब्देभ्योपिस्यादितिसंख्याकारकौद्यनन्वयस्वस्यात्॰यद्यपिद्रोणपरिमितेव्रीह्यादौद्रोणशब्दःसोयमित्यभिसंबध्यात्प्रवर्तते॰तत्रगौणमुख्यन्यायान्नप्रापनीति
परिमाणग्रहणमिति॰तन्न॰पदकार्येषुयेन्यायेननप्रातिपदिकेविनिसिद्धान्तात्॰अन्यथासिंहोमाणवकइत्याद्यसिद्धिप्रसङ्गाच्च॰ यदप्याहुःद्रोणादयःशब्दाःलौहंदारुमयंवा
परिमाणमेवनत्वभिचरन्तिपरिमेयंतुव्यभिचरन्त्येव॰अतस्तस्यप्रातिपदिकार्थत्वाभावादप्राप्तेपरिमाणग्रहणमिति॰तदपिन॰गौणलाक्षणिकेषुसिंहोमाणवकःमञ्चाःक्रोशं
न्तीत्यादिषुन्यायस्यापनेः॰तत्रविशेष्यस्यमाणवकादेर्भेदेपिसिंहसदृशइत्यर्थेगौण्यानियतोपस्थितिकएवेतियदितर्हिव्रीह्यादेर्भेदेपिद्रोणपरिमितोनियतोपस्थितिकएवेति
तुल्यम्॰संबोधनेत्वामात्रग्रहणात्संबोधनाधिक्येनप्राप्नोतीत्यारम्भः॰दृहसंबोधनंप्रकृत्यर्थंप्रतिविशेष्यंक्रियांप्रतिविशेषणमितिसिद्धान्तः॰उक्तंचसंबोधनपदंयच्चतक्रिया
याविशेषणम्॰त्वंजानिदेवदत्तेतिनिपातोत्रतथासतीति॰एवंचरामंमांपाहीतिवाक्यस्यरामसंबन्धिसंबोधनविषयोमत्कर्मकरक्षणमर्थः॰इतिप्रथमा॥ ७ इति॰वस्तुतस्तुएवंसति
नद्यायतकूलेतत्रप्रतीत्याद्यर्थकेनद्यास्तिश्नतिकूलेदत्यादौषष्ठ्यन्तस्यक्रियायांविशेषणत्वाभावात्तद्घटितस्यवाक्यत्वानापत्तौसमर्थसूत्रभाष्यंसंमतनिपातस्यतत्रानापत्तिः॰तस्मात्सविशे
षणमित्यस्यसाकाङ्क्षत्वद्वारायादृशेषणंतत्सहितमित्यर्थोवरंवाच्यः॰एतेनयतःपदात्परस्यपदस्यनिपातादयःक्रियन्तेतयोःपरस्यरान्वयनियमइत्यपास्तम्॰वस्तुतोव्रजानि
देवदत्तेत्यादौजानीहीतिशेषस्तत्रव्रजनस्यकर्मत्वेनदेवदत्तस्योद्देश्यत्वेनान्वयान्नदोषः॰प्राप्तकालेत्रलोदृइतिदिक्॥ इतिप्रथमा॥ शंकरोविजयतेतराम्॥

आप्नोतेरित्यादि। अनेनवाक्यात् क्रियाशब्दएवात्रेप्सितशब्देनलभिप्रेतपरोरूढइतिसूचयति। आप्नुमिति। संबन्धुमित्यर्थः। केनेतिकरणाकाङ्क्षाप्रदर्शनम्॥ विशेषणीभूतेनेति। कर्तृपदार्थविशेषणीभूतेनेत्यर्थः। उपस्थितंपरित्यज्यानुपस्थितकल्पनेमानाभावादितिभावः। लभ्यतेइति। एवंचेप्सितपदेनकर्तृव्यापारप्रयोज्यफलाश्रयउच्यते। यथा तण्डुलंपचतीति। फलस्यापिव्यपदेशिवद्भावेनफलाश्रयत्वात्कर्मत्वम्। अतएवतत्समानाधिकरणेशेभनंपचतीत्यादौकर्मत्वसिद्धिः। वाक्यभिन्नेति। योगविभागेनेत्यर्थः। सञ्ज्ञाविधीयतेइति। तदुक्तंभाष्येकिमिदंकारकमितिसञ्ज्ञानिर्देशइति। वाक्यभेदंदर्शयति। अपायेदित्यादिना। ननुएवमप्येकसञ्ज्ञाधिकारात्पर्यायापत्तिः। नचक्रियाजनकानांसञ्ज्ञिनामासेकर्तुरीप्सिततमंकर्म। कर्तुरितिक्तस्यचवर्तमानेदितिकर्तरिषष्ठी। आप्नोतेःसम्बन्ध्यतिबुद्धिपूजार्थेभ्यश्चेतिवर्तमानेक्तः। मतिरिच्छानतुबुद्धिः पुनर्बुद्धिग्रहणात्। एवंचकर्त्राआप्नुमिष्यमाणंकर्मेत्यर्थः। कर्तृचधातूपात्तव्यापाराश्रयः। सचकेनाप्नुमिच्छतीत्याकाङ्क्षायांविशेषणीभूतेनव्यापारेणेत्यर्थाल्लभ्यते। तदेतदाह। क्रिययेति। कप्रत्ययेनोपस्थितंवर्तमानत्वेनेहविवक्षितम्। तेनकरंकृतवान्करंकरिष्यतीत्यादिसिद्ध्यति। कारकमिति। एतच्चकारकेत्यधिकाराल्लभ्यते। तत्रहिव्यत्ययेनप्रथमार्थेसप्तमी। प्रतिसूत्रंवाक्यभिन्नाकारकसञ्ज्ञाविधीयते। तद्यथा। अपायेध्रुवंकारकसंज्ञंस्यात्। ततः। अपादानम्। उक्तंकारकमपादानसंज्ञंस्यात्। पुनःकारकशब्दानुवृत्तिसामर्थ्यात्विशेषसञ्ज्ञाभिःसहसमावेशः। अन्वर्थाचेयंसञ्ज्ञा॥ करोतीतिकारकमितितेनक्रियानन्वयिनोनभवति ॥ ५५ ॥ पेणतेषांयोगविभागानुवृत्तिभ्यांविनाधिकारकसञ्ज्ञाविधानेनपर्यायेसिद्धेयोगविभागेनानुवृत्त्याप्रतिवाक्यंसञ्ज्ञाविधानंसमावेशार्थमितिवाच्यम्। आक्षेपेक्रियाजनकमात्रस्यसञ्ज्ञापत्तौनरश्रुतमित्यादौस्वरवारणायकारकास्तेत्यादौस्वरितपाठाद्याश्रयणेधिकगौरवादित्यतआह। पुनःकारकेति। विभक्तेषपादानमित्यादिषुतदनुवृत्त्यातदनुवादेनविशेषसञ्ज्ञाविधानादित्यर्थः। समावेशफलंतुग्रामेवासइत्यादावधिकरणत्वात्सप्तमीकारकत्वात्कुत्तरपदप्रकृतिस्वरश्चेतिबोध्यम्। करोतीतिक्रियांजनयतीत्यर्थः। तज्जनकंचप्रत्यासत्यातत्रैवान्वेति। नित्यानन्वयिनइति। तदन्वयप्रयोजकतज्जनकत्वाभाववतइत्यर्थः ॥

ब्राह्मणस्यपुत्रमिति।अत्राकथितंचेत्यनेनसंप्रदानस्यकर्मत्वापत्तिः।क्रियाजनकत्वंतुनस्यापुत्रेणान्यथासिद्धेः।अकथितंचेत्येतत्प्राप्नुवन्नपादानत्वाद्यविवक्षायांसर्वथातदप्राप्नुवन्नेवप्रवर्त्ततेऽतएवास्यनक्रियान्वयइत्याह।नत्विति।करोतीति।स्वजनकत्वेनैतान्व्यपदेशान्करोतीत्यर्थः।तदुक्तंभाष्ये।यावद्ब्रूयात्क्रियायामितिनावत्कारकेइतिक्रियायांविषयइत्यर्थःविषयत्वंचजनकत्वेनेतिबोद्धव्यम्।क्रियान्वयिनामितिक्रियान्वययोग्यतावच्छेदकक्रियाजनकत्ववतामित्यर्थः।गृह्यतेइतिअतएवनटस्मुतमित्यादौनदोषः।क्रियान्वयीत्यर्थइति।तदन्वययोग्यतावच्छेदकक्रियाजनकत्ववदित्यर्थः।यथाश्रुतंतुनयुक्तंकारकाणांभावनान्वयइतिवाक्यस्यब्राह्मणस्यपुत्रंप्रयानंष्टरुतीतिदृहिब्राह्मणःपुत्रविशेषणंनतुक्रियान्वयि।यद्वा।कारकशब्दःक्रियापरःकरोतिकर्मादिव्यपदेशनिमित्तयुक्तेःतथाचअपादानादिसंज्ञाविधौक्रियायोपित्यस्योपस्थित्याक्रियान्वयिनामेवतत्तत्संज्ञाविधीयन्तेकारकादृनमुतयोरित्यादौतुकारकशब्दःस्वर्यतेतेनैतदधिकारोक्तंकर्त्रादिषट्कमेवलभ्यतेअस्मिन्पक्षेवृत्तावपिकारकमित्यस्यक्रियान्वयीत्यर्थःआद्यपक्षेतुकारकसंज्ञास्यात्तच्चकारकंकर्मसंज्ञंस्यादितिव्याख्येयम्।अनभिहितेइतिननुबहुपटुरित्यादौबहुचाद्युक्तार्थत्वाद्यथाकथंचिदन्वयादनेनैवक्रियतेकटइत्यादावपितिङादिभिरुक्तार्थत्वाद्द्वितीयानभविष्यतिकिंचकटंकरोतीत्यादौसावकाशाद्द्वितीयाःकुतःकटइत्यादिषुप्रथमयाबाधिष्यतेनिरवकाशत्वात्।नचवृक्षःलक्षइत्यादिरवकाशः॥ ॐ घटत्ववतांघटत्ववत्तेत्येतत्तुल्यतापत्तेःअतएवभाष्येक्रियाजनकत्वमेवकारकत्वमुक्तम्।तज्जनकत्वंचैषांक्रियोपयोगिक्रियाश्रयत्वेनेतिचोक्तम्।अतएवैषांक्रियान्वयःक्रियाजनकमितिज्ञातेकासाक्रियेत्याकाङ्क्षोदयेनक्रियायाजनकाङ्क्षायाचतत्रैवान्वयस्योचित्यात्।अविद्यमानस्यसंप्रदानस्यापिस्वज्ञानद्वाराक्रियाजनकत्वमित्यलम्।तिङादिभिरिति।तैरेवतस्याःशक्तेरुक्तौकटादिप्रातिपदिकस्यउद्भूततच्छक्तावृत्तेःकर्मणिवर्त्तमानात्प्रातिपदिकादित्यर्थेपितदनापत्तिरितिभावः।अनभिहितसूत्रमपिअभिधानविषयेप्रातिपदिकस्यउद्भूततच्छक्तौवृत्त्यभावदृत्यत्रैवतात्पर्यग्राहकमितिबोद्धव्यम्।सावकाशेति।मात्रग्रहणेनकर्माधिक्येप्रथमायाअप्रवृत्तेरितिभावः ॥

प्रतीयमानामिति। अतएवतिङ्समानाधिकरणेप्रथमेतिवार्त्तिकन्यासः संगच्छते। अनावश्यकत्वादिति। तदभिमानादित्यर्थः। संख्येति। द्वयेकयोः कर्मणिस्वौजसित्यादेरेकवा
क्यतयान्वयेकर्मण्यपि सप्तम्याद्येकयोरितिसूत्रीप्रवृत्तेकत्वाद्युपेतत्वात्कर्मणिपदेकत्वतन्त्रामित्यर्थेहिंसाविभक्त्यर्थदृतिपक्षः। नचगुणानांचपरार्थत्वादितिन्यायेनकर्मणिए
कत्वेचामित्येवार्थेसिद्धे संख्यायाआश्रयापेक्षायांप्रत्यासत्त्याकर्मादेरेवतत्त्वमित्युक्तोर्थोसंगतइतिवाच्यम्। संख्यासंख्येययोर्नियमतः साकाङ्क्षत्वेनेदृशेविषयेगुणयोरपिप
रस्परान्वयाङ्गीकारात्। स्पष्टंचेदमत्रैवकैयटे। तदेकत्वस्येति। प्रधानप्रत्ययार्थस्येत्यर्थः। एवंचाप्रधानकर्मादिविशेषणार्थमावश्यकंसूत्रमुक्तोर्थानामितिन्याय्यश्चप्रधाना
तत्रापिप्रतीयमानस्यास्तिक्रियांप्रतिकर्तृत्वेनतृतीयाप्रसङ्गात्। अथनीलमिदंनतुरक्तमित्यादौविशेषणान्तरनिवृत्तितात्पर्यकेअस्तिक्रियामाअनावश्यक
त्वात् प्रथमायाअवकाशंब्रूषेतर्हिविप्रतिषेधात्प्रथमास्तु। एवंचानभिहिताधिकारोवृथेतिचेत्मैवम्। संख्याविभक्त्यर्थदृतिपक्षेसूत्रारम्भात्तथाचान
भिहितेकर्मणिपदेकत्वतन्त्रामितीयेकवचनमित्यर्थः। सूत्रानारम्भेचकर्मणिपदेकत्वतन्त्रद्वितीयैकवचनमम्दृतिहिवाक्यार्थः। तथासतिकृतःकटद्
त्यादौचकृतेनकर्ममात्रोक्तावपिनदेकत्वस्यानुक्ततयाअमुदुर्वारः। परत्वात्प्रथमैत्यपिनाकर्तव्यःकटइत्यादौततोपिपरत्वेनकृद्योगलक्षणषष्ठीप्रस
ङ्गात् ॥ ७ ॥ र्थविषयएवेतिभावः। कर्त्तव्यःकटइति। नचात्रद्वितीयातः परत्वात्प्राप्तामपिप्रथमाबाधित्वापरत्वात्प्राप्तायाः षष्ठ्याः कृत्यानामिति विभ
क्तसूत्रेणनिषेधापत्तिस्तदधिकारभावेउभयप्राप्तेः सत्त्वादितिवाच्यम्। अधिकारभावेसर्वत्रैवोभयप्राप्तिविषयसत्त्वात्कर्मण्येवषष्ठ्यापत्तौकर्तृकर्मणो[illegible]सूत्र
स्यकर्तृग्रहणस्योभयप्राप्तावितिसूत्रस्यचवैयर्थ्यापत्त्यात्मनेपदेचोभयोः प्रयोगएवोभयप्राप्तेर्वाच्यतयाप्रकृतेनोभयप्राप्तिरि
त्याशयात्। आकृष्टस्य ग्रामंगच्छेत्यत्रकृत्यानामितिविभक्तसूत्रस्यभाष्योदाहरणेआश्चर्यपदकर्तृपदेअद्याहत्योभयप्राप्तिर्निरूप्या। दृत्यादाविति। आदिनो
भवतोलाभोस्वंःकट्त्येतत् ॥

कारकमिति। संख्यायाः सर्वत्र विशेषणतयाभानादेकत्वेयत्कर्मेत्यर्थः। वृक्षेशाखेतिवदेकत्वेदृतिसप्तमीआधेयस्याधारत्वविवक्षया। एवंचैकत्वविशिष्टकर्मणीत्यर्थः। तिभावः। प्रत्याख्यातमिति। न्यायसिद्धेरितिभावः। अनेनपञ्चकंप्रातिपदिकार्थपक्षेप्यावश्यकतासूचिता। तत्रयथाप्रातिपदिकेनोक्तेकर्मत्वादौभवतितथातिङादि। पिस्याद्दतस्तद्धारणार्थमिदम्। एवंसंख्यातिरिक्तंचतुष्कंप्रातिपदिकार्थः संख्यामात्रंविभक्त्यर्थइतिपक्षेप्यावश्यकंतत्। एवंचकारकस्यविभक्त्यर्थत्वेयत्रयत्रपक्षे तत्रतत्रानावश्यकमितिसूचितम्। प्रीतेरितिनतत्प्रीतिरेवंचशुभफलजनिकेतिभावः। क्रियायाप्यत्वेनेति। क्रियासंबन्धित्वेनेत्यर्थः। तज्जन्यफलाश्रयत्वंहित्वम्। एषमेति। धात्वर्थएवविशेष्यइत्यर्थः। इच्छातुविशेषस्तत्रफलांशेविशेष्यः कर्त्तरितुर्व्यापारांशइति। अतएवसुपआत्मनइतिसूत्रेभाष्यमिष्यतेपुत्रइत्यर्थेपुत्रीयतीतिनप्रयोगोमि[illegible]त्यादि

कारकंविभक्त्यर्थइतिपक्षेतुसूत्रेसंख्यातमाकरे। हरिंभजतीतिभजनक्रिययाहरौप्रीतेरुत्पादात्प्रीतिविशिष्टतयाक्रियायाप्यत्वेनहरिः कर्मातद्विशिष्ट[illegible]र्थः। क्यार्थः। हरिःसेव्यतेतत्राप्येवमेव। क्रियाप्रधानमाख्यातमितिसिद्धान्तात्। धात्वर्थस्यतिङर्थंप्रतिविशेष्यानतुकृदर्थंप्रतीवविशेषणमितिहितस्यार्थः। अ[illegible]पचकोव्रजतीतिवत्पचतिव्रजतीतिनैकंवाक्यम्। पाककर्तृकर्तृकंगमनंहिपाचकइत्यादेरर्थः। एककर्तृकापरक्रियागमिक्रियाचपचतिव्रजत्योःएयगेवार्थः॥

तियदाक्रियाफलस्यप्राधान्यंप्रतिपिपादयिषितंतदावाक्यमेवव्यापारप्राधान्येतुक्यजितिकैयटग्रन्थश्चयद्यप्ययमर्थः प्रतीकान्तरेकैयटेनोक्तस्तथाप्यत्रापिसएवार्थउचितः। अत्रैव वेत्यन्यविस्तरः। ननु। न्यायादिग्रन्थेप्रथमान्तविशेष्यकबोधस्यैवानुभवप्रदर्शनान्तथैवयुक्तमित्यतआह। क्रियाप्रधानमिति। इदंचरूपसूत्रेभाष्ये। क्रियेति। धात्वर्थाशब्दायस्यापिक्रियात्वेनव्यवहारोदृष्टइत्यर्थः। तस्यार्थइति। आख्यातशब्देनात्रनियमेनजनकाकाङ्क्षविभक्त्यन्तमाख्यातमाख्यातेनेत्यादौवत्यर्थः। रूपसूत्रेकैयटोपिआख्यातात्कालसंख्यासाधनत्वावगमेपितद्यक्रियाप्रधानत्वमिति। नामान्याख्यातजानीतिशाकटायनोक्तेरिति। आख्यातावयवधातुजानीत्यर्थः। अतएवसर्वेनामधातुजमाहेतितत्समानार्थकमुणादयइति सूत्रेभाष्येपठितम्। नैकंवाक्यमिति। साधुदृतिशेषः। प्रथमान्तविशेष्यकबोधेतुतस्यतत्त्वंदुर्वारमितिभावः ॥

एवंचअस्यसाध्यत्वोपपत्तेश्च।भावप्रधानमिति।भावकालकारकसंख्याश्चत्वारोऽर्थाआख्यातस्यतत्रभावः प्रधानमितितद्दर्शयतिभाष्यकारआह।नामानीति।नामपदेनसुबन्तमितिचतद्व्याख्यस्पष्टम्।तच्चाव्ययातिरिक्तमित्यन्यत्रनिरूपितम्।नमस्याख्यातार्थंप्रतिविशेषणीभवन्तीतिनामानीतितद्व्युत्पत्तिर्निरुक्तभाष्येदर्शिता।किंचैतन्निरुक्तोत्तरंयत्रोभेभावप्रधानेभवतइतिनिरुक्तेउक्तम्।यत्रोभेनामाख्यातेभवतोवाक्येतत्रतेभावप्रधानेक्रियाप्रधानइत्यर्थकतयाचतद्भाष्यितद्व्याख्यातम्।अतःपूर्वंनिरुक्तस्यव्याख्यानान्तरंनोदाहरणीयम्।किंचकर्तृविशेष्यकबोधेःपचतीदंनदेवदत्तंपश्यतिप्रयोगःशतृविधायकभाष्यकैरयोरापादितः।यद्यप्यतरङ्गःप्रथमातथापिप्रधाना

एवंचप्रथमान्तविशेष्यकोबोधइतिनैयायिकोद्दोषोभाष्याद्यनुसारिभिर्नादर्तव्यः।यास्कोप्याह।भावप्रधानमाख्यातंसत्त्वप्रधानानिनामानि।पश्यमृगोधावतीत्यादौतुमृगकर्तृकंगमनंदृष्टिक्रियायाकर्मप्रधानंदृष्टिक्रियैवउक्तंचासुबन्तंहियथानेकंतिङन्तस्यविशेषणम्।तथातिङन्तमप्याहुस्तिङन्तस्यविशेषणमितिएवंपचतिभवतीत्यस्यपचिक्रियाभवतीत्यर्थः।अयंतुविशेषःतिङन्तोपस्थितायाःक्रियायाःक्रियान्तरंप्रतिविशेषणत्वेपिशब्दाद्याह त्वादेकर्मत्वंसंसर्गएवनतुप्रकारः।अपदार्थत्वात्।अर्थाद्याहारत्वादेतुप्रकारत्वेपीष्टापत्तिः ॥ ॐ नुरोधिनीहितीयांबलवतीतितदाशयः।तदनुसारेणाह।पश्येतिमृगस्यकर्मत्वेप्रधानानुरोधिनीहितीयैवस्यादितिभावः।उक्तंचेति।हरिणेतिशेषः।तिङन्तसुबन्तशब्देनतदर्थक्रियादिः।पचिक्रियाभवतीत्यर्थइति।स्पष्टंधात्वादिसूत्रेभाष्ये।योग्यमेधेनयजतेसब्रह्महत्यांतरतीत्यादौयत्कर्तृकायागक्रियातत्कर्तृकातरणक्रियेत्येवबोधइत्यन्यत्रविस्तरः।अपदार्थत्वादिति।तच्चयेपदजन्योपस्थितिविषयस्यैवप्रकारत्वविशेष्यत्वस्वीकारात्पदाद्याहारस्यानांसंभवादितिभावः।प्रकारत्वेपीति।अपिनासर्वपदेविभक्त्यर्थस्यसंसर्गत्वमितिसमर्थसूत्रषष्ठीसूत्रभाष्योक्तःसिद्धान्तःसूचितः।शब्दोपस्थितस्यापिसंसर्गत्वंपक्षीयासर्वैरङ्गीकृतमेवबहुभिः ॥

फलस्यापीति।अपिनापक्षेदित्यादौव्यापारस्यसंग्रहः।तत्रतस्यफलंप्रतिविशेषणत्वात्।इत्थमेव।कर्मत्वभानविषयेउक्तप्रकारेणैवेत्यर्थः।व्यवस्थेति।सर्वसम्मतेतिशेषः।तदुत्पत्तिकृतेपीतिभावः।वस्तुतस्त्वत्रापिसंसर्गतैवघटपदेघटघटत्वयोःसमवायस्यैव।उपस्थितिपूर्वकंएतद्गाकाङ्क्षायाअदर्शनेनाद्याहारस्योक्तिसंभवाभावादितिद्वेयम्।अतएवफलस्यकर्मत्वादेर्वाच्यत्वेति।तत्रतस्यकरणत्वेनान्वयादितिभावः।दृष्टान्तेदृति।शोभनंपचतीत्यादौतत्रनव्यनैयायिकवैयाकरणयोरुभयोरपिम

पचतीत्यादौधातूपात्तफलस्यापित्यगेवमतभेदेनव्यवस्था।अतएवतत्समानाधिकरणेशोभनंपचतीत्यादौद्वितीयैकवचनोत्पत्तिः।अग्निष्टोमेनयजेतेत्यादौतृतीयोत्पत्तिश्चसंगच्छते।नचदृष्टान्तेविशेष्यसमर्पकाद्दार्ष्टान्तिकेविशेषणसमर्पकाच्चकर्मत्वादिवाचिकायाःसुविभक्तेःप्रयोगोस्त्वितिवाच्यम्।धातुतिङन्तयोरप्रातिपदिकत्वात्तेषांतुस्यादेषदोषः।तथाहि।धावन्तंमृगंपश्येतिवत्धावतिमृगमित्यपिस्यात्।नचाप्रथमासामानाधिकरण्येशतृशानचोर्नित्यत्वान्नैवंप्रयोगइतिवाच्यम्।एवमपिद्वितीयानुत्पत्तेर्दुरुपपादत्वात्ननुतत्रवाक्यभेदएव।पश्येत्यत्रतमितिकर्माद्याहारात्पचतिभवतीत्यादितुपाकोभवतीत्याद्यर्थेअनिष्टमेवेतिचेत्।नैवम्।अद्याहारेगौरवात्।तस्यचमुनिवचनविरोधेनाप्रामाणिकत्वात्।तदीयनिच्छामात्रस्यार्किंचित्करत्वात् ॥

तेफलव्यापारयोःपरस्परान्वयस्यसत्त्वेनतस्यदृष्टान्तत्वौचित्यात्पश्यमृगइत्यादौधावनदर्शनयोरन्वयस्यनैयायिकासम्मततयासाद्यत्वेननदृष्टान्ततलमितिबोद्यम्।दार्ष्टान्तिकेपश्यमृगोधावतिपचतीत्यादौ।विशेषणसमर्पकादितिअन्वयबोधकालेइत्यादिः।दुरुपपादत्वादिति।एवंचतथाप्रयोगविलयएवस्यादितिभावः।गौरवादिति।एकवाक्यतयान्वयेसंभवतिअद्याहारेणवाक्यभेदेगौरवमितिभावः।ननुप्रामाणिकंगौरवंनदोषायेत्यतआह।तस्यचेति।शतृसूत्रस्थेनभूवादिसूत्रस्थेनचमुनिवचनेनविरोधादितिबोद्यम्।अकिंचित्करत्वादिति।ऋषीणामेकवाक्यतयाबोधेसाधुत्वस्येच्छासत्त्वेइत्यादिः ॥

नास्तीति।एवंचतत्रद्वितीयादुर्वारेतिभावः।नचेदृशेस्थलेविशिष्टस्यदेवदत्तमृगादेःकर्मत्वंविशिष्टवाचकंचनप्रातिपदिकमितिनदोषः।श्रुत्यामेतन्माहात्म्यंतथाचोत्त
त्तयःशुभाद्दृष्टिमादितिवाच्यम्।नीलत्वविशिष्टघटस्यकर्मत्वेप्रतिपादनीयेनीलंघटमित्यादौद्वितीयानापत्तेः। श्रुत्येत्यादित्वार्षमित्यलंमुनिविरुद्धविचारेणाक्रियाप्रधानमित्य
त्रक्रियायाःप्राधान्यमाख्यातघटकप्रत्ययार्थापेक्षयैवबोद्धव्यंतोदश्यादिकंप्रतिधावनादेर्विशेषणत्वेपिनक्षतिरितिदिक्।भाष्येति।भूवादिसूत्रस्थंभाष्यंपचादयःक्रियाभ
वतिक्रियायाःकर्मेभवन्तीतितत्रोक्तम्।वार्तिकम्।शतृविधायकस्थम्।तस्याक्रियाविशिष्टक्रियाबोधस्यकर्मत्वस्वीकारेइति।क्रियान्तरनिरूपितत्वस्वीकारेइत्यर्थः।कारकस्याकरणा
अपिच।अपाणिनीयदेवदत्तोवेद्मित्यादौशत्रादेःप्रसङ्गएवनास्ति।एकवाक्यत्वंचभाष्यवार्तिकादिसकलसंमतम्।नचतिङन्तस्थलेक्रियाविशिष्टक्रियान्तरबोधोनजा
यतएवेतिवाच्यम्।तथैवव्युत्पन्नानांतादृशबोधस्यदुर्वारत्वात्।ईदृशेर्थेसाधुत्वंनेष्टमित्यपिनासाधुत्वानुशासनार्थंप्रवृत्तेरेवतत्स्वीकारात्।धातुसंबन्धाधिका
रव्युत्पादितेपुरीमवस्कन्दन्तीतीतस्यावश्यकत्वाच्च।ननुसिद्धान्तेआख्यातवाच्यक्रियायाअपिकर्तृत्वकर्मत्वस्वीकारेतस्याअसत्त्वरूपत्वंभज्येतेतिचेन्न।लिङ्गसंख्ययोः
कर्तृकर्मतुरकारकस्यचाश्रयमात्रेणातथात्वोपपत्तेः।कर्मत्वस्यप्रकारतयानभ्युपगमादित्यन्यत्रविस्तरः।अभिहितेत्विति।नन्वेवंपक्वमोदनंभुङ्क्तेदत्रापिद्वितीयानस्या
दितिचेत्।मैवम्।इहहिपचिभुज्जिनिरूपितेदृकर्मत्वशक्तौ।तत्रप्रधानक्रियानिरूपितामनभिहितांशक्तिमादायद्वितीयोत्पत्तेः।उक्तंचहरिणा।प्रधानेतरयोर्यत्रद्रव्यस्यक्रिययोः
ष्टथक्।शक्तिर्गुणाश्रयातत्रप्रधानमनुरुध्यते ॥ ॐ दिकारकशक्तेःहरिणमेक्षतसुखंयायादित्यादौहेतुहेतुमद्भावेनान्वयेनक्रियाकारकभावेनेतिनदोषः।स्ववाचकधात्वर्थंप्रतितुकर्मत्व
चयःकरणत्वान्वयश्चनासत्त्वरूपतांप्रतिबध्नाति।कः शोभनंपचतिज्योतिष्टोमेनयजेतेत्यादौदर्शनात्।अन्यत्रेति।कर्मत्वस्यसर्वत्रसंसर्गतैवेतिभाष्यसंमतपक्षेत्वाद्यमेवसारम्।अ
भिहितेत्विति।तिङादिभिःकर्मादिशब्देरभिधानेप्रातिपदिकार्थोद्भूततच्छक्तिकेर्थेवर्त्तमानत्वाभावात्द्वितीयादेःकर्मादिशब्देभ्यद्वाप्राप्तिरितिभावः।नस्यादितीति।
पंचधातूत्तरनिष्ठयाऽभिधानादितिभावः।गुणाश्रया।गुणनिरूपिताप्रधानम्।प्रधानक्रियानिरूपितांशक्तिम् ॥

अनुरोधमेवविशदयति।प्रधानविषयेति।गुणेनुक्तापितद्वदुक्तवत्प्रतीयते।तुल्यन्यायादुणनिरूपिताउक्तापिप्रधाननिरूपितानुक्तशक्तिवत्प्रकाशतइति।अतएवप्रासादेआसेदित्यादौसप्तम्यनिरूपिताधिकरणत्वेनोक्तेप्यासिनिरूपितस्थानभिधानेनानभिहितत्वात्प्रथमैसिद्धिः।इदंचस्वादुमिणमुलितिसूत्रेभाष्येस्पष्टम्।तत्रत्यभाष्यार्थानुवादिन्यौचेमेहरिकारिकेइत्यन्यत्रप्रपञ्चितम्।एतेसुभयनिरूपितशक्तेरनभिधानेगुणत्रितीनिरूपितशक्तेरप्यभिधायिनीविभक्तिर्भवति।यथाग्रामायगन्तुमिच्छतिग्रामंगन्तुमिच्छतीतिच।दृष्यतेग्रामोगन्तुमित्यादौप्रधानक्रियानिरूपितशक्तेरभिधानेगुणनिरूपिताया अप्यभिधानान्नकदापिचतुर्थीद्वितीयेगमेर्ग्रामःकर्म ह्येतेसूभेकर्मणीतितत्सूत्रेभाष्येस्पष्टम्।एवंचोभयत्राप्याकृत्याशब्दोन्वयदृत्येवप्रतीयते।अत्रप्रयोगेगमिक्रियापेक्षेद्वितीयाचतुर्थ्यौनकदापिभवतइतिकैयटात्।एवंचेतद्वैरोधादोदनंपक्त्वेत्यपाष्टमेवेतियत्केनचित्

प्रधानविषयाशक्तिः प्रतीयतेऽपि प्रयुज्यते।यद्गुणेनदातद्वदनुक्तापिप्रतीयतेइति।अतएवपक्त्वौदनोभुज्यतेइत्यत्रभुजिप्रत्ययेनाभिहितेप्रथमैवापवेरप्राधान्यात्।वस्तुतस्तु।पक्त्वाभुज्यतइत्यादौकर्मणश्चाभिभुजिभ्यांनयुगपच्छाब्दोन्वयः किंत्वन्यतरेणशाब्दोपरेणार्थः।तत्रचप्रथमाद्वितीयेव्यवस्थितएव।तद्यथापक्त्वाभुज्यतेऽौदनः।किंपक्त्वा।अर्थादोदनम् ॥ ॐ प्राचीनेनवस्तुतस्तुपक्त्वेत्यादिनासाधित्यन्तेनोक्तंतदितुच्छमितिबोधपन्स्वरूपव्याकियेचयराक्रियेतिन्यायेनतथैवानुवदति।वस्तुतस्त्वित्यादिना।अतएव स्वादुमीतिसूत्रेभाष्येतुनक्तगुणमुदाहृत्यः स्वान्वयिनासमभिव्याहृतेनानुप्रयुज्यमानेनसमानाधिकरणेतद्वाचकेवक्तव्याःतेनपक्त्वौदनोभुज्यतइत्यादावोदनेद्वितीयानाअन्यथाकृत्वादस्यकर्तृत्वापत्तौपक्त्रिक्रियाकर्मत्वस्यानाभिधानात्तास्यादेवेत्युक्तानवकाशत्वम् अन्ययकृतांभयेविधानादित्युक्तम्।अनेनहिभाष्येणोभयत्रशाब्दान्वयएवलभ्यते।तत्रवचनारम्भेएषांप्रयोगगाणामुपपत्यभावात्प्रत्ययस्यानेपिहर्युक्तरीत्यासनादिसूत्रस्थभाष्यसम्मतयशभावएवोचितः।एवंचकैयटोक्तंसुधेप्रतिहन्तुंशक्यमित्यप्यसाध्येव वचनारम्भोसिद्धेः।तुमुनाद्यन्वयिकियानिरूपितशक्तेरयंस्वभावोयत्तत्समानाधिकरणगुणभूततुमुनादिप्रकृत्यर्थनिरूपितशक्तेःस्वबोधितत्वेनानभिहितत्वेनेनवाप्रकाशइतिसुधियोविभावयन्तु अन्यतरेणसहेति।इदंप्रागुक्तवस्तुतस्त्वित्यादिरीत्योक्तंतद्देवेतिबोद्धम् ॥

मैवमिति। ग्रामंगच्छतीत्यादौ दृष्टितत्रस्थोपलक्षितमुद्देश्यत्वंभासतेएवतत्सूत्रबोध्यकर्मत्वशक्तेरुद्देश्यतासमानाधिकरणत्वात्। अनएवकर्मणायमभिप्रैतीतिसूत्रेकर्मणेत्यस्याभावेगां दुहतीत्यत्रगोरप्युद्देश्यतयातत्रैवपर्यायेणसंप्रदानसञ्ज्ञास्यादितिभाष्यकैयटोक्तंसंगच्छते।चतुर्थ्याउद्देश्यत्ववाच्यमितत्समानाधिकरणशक्तिर्वेतिसर्वसंमतमितिभावः। फलान्तरमप्याह।अग्नेरिति। ईप्सिततमपदाभावेवारणार्थानामित्यस्यैवतदपवादत्वापत्तेः। नचायोतश्चरितार्थम्।तस्यापितदुपस्थाप्यसंयोगरूपफलाश्रयत्वात्वारयतेश्चसंयोगाद्यनुकूलव्यापाराभावात्तदनुकूलव्यापारोऽर्थः।तत्रापीप्सितशब्दः क्रियाशब्दएवेप्सितततमेत्युक्तोईप्सितमात्रेसावकाशस्यपरत्वादीप्सिततमेनानेनबाधः।ईप्सिततमत्वंचप्रकृतधात्वर्थप्रयदातुभोदनंपक्त्वाभुञ्जतेतदिनंप्रभुञ्जतेतदाभुञ्जतइत्यत्रअर्थादोदनइतिगम्यते।एवंचविवक्षाभेदेनपूर्वमपितुंशक्यतेहरिर्हरिंवेत्युभयंसाधु।प्राप्तानन्दइति।आनन्दकर्तृकप्राप्तिकर्मीभूतइत्यर्थः।यदुक्तं प्रायेणेतितस्यफलमाह।क्वचिदिति। विषवृक्षइति। यदितुवर्धिच्छ्योरन्यतरेणसहकर्मतयान्वयोविवक्ष्यतेतदाद्वितीयास्यादेवेति द्वेयमातृणंस्पृशतीति। यथास्पृशमानस्यगङ्गादेरीप्सितस्यक्रियायायोगः।तज्जन्यसंयोगादिफलाधारत्वात्।तथैवानीप्सितस्यतृणादेरपीतिभावः।स्यादेतत्।धातूपस्थाप्यफलशालिकर्मत्वेवास्तुकिमीप्सितानीप्सितयोः।दृष्यकूथनेनेतिचेन्।मैवम्।अग्नेर्माणवकंवारयतीत्यत्रवारणार्थानामितिसूत्रेणमाणवकस्यापादनत्वेप्रेप्सितद्वाधनायकर्तुरीप्सिततममितिवक्तव्यमेव।एवंहेयोदासीनयोःसंग्रहार्थंतथायुक्तमित्यस्याप्यावश्यकत्वात्।अनीप्सितग्रहणंतुस्यष्टार्थमेवन त्वावश्यकम्।इदंत्ववधेयम्।ईप्सितानीप्सितयोःशब्दबोधएककरूपएवईप्सानीप्सादेरर्थीद्वादितत्तत्प्रकृतावुपयोगेद्विहितायावाच्यकोटावप्रवेशात्।अनन्यलभ्यस्यैवशब्दार्थत्वात्कर्मणिद्वितीयेतिसूत्रेद्वितत्तत्सूत्रैर्यावत्कर्मसञ्ज्ञाविहितातेनैवतेनतेनरूपेणोपस्थितः॥ धात्वनीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वम्।अतएवाग्नेर्नोद्देश्यत्वप्रतीतिरित्यत्रेतिभावः।नत्वावश्यकमितिः। हेयसंग्रहोपेक्षाव्यावृत्तेरेवभविष्यतीतिभावः।तस्यापीप्सितत्वमनीप्सितत्वंचैकरूपएवेतिदृच्छाविषयत्वानिच्छाविषयत्वभानकृतंवैरूप्यरहितमित्यर्थः।तदाहेप्सानीप्सादेरिति।इच्छाविषयत्वानिच्छाविषयत्वयोरादिनाईप्सामतप्रकर्षस्येत्यर्थः।उपयोगेतिरूपतः।सतमेतिभावः।तदुपलक्षितमुद्देश्यत्वादिकंतुभासतएवतदाह।अनन्यलभ्यस्यैवेति।भासमानोद्देश्यत्वतदभावाभ्यामर्थतइच्छाविष

आधारवाचिकेति। द्दमुपलक्षणंदिकैयोगेकरणवाचकत्वात्आधारपदेनचात्राधारताशक्तिमानुच्यतेकर्तुरीप्सिततममिति लक्षणेविशिष्टस्यप्रवेशात्त्वामाणिकंगुर्वेवशक्य
मितिन्यआह।क्रियायाद्दति। फलस्यव्यापारस्येत्यर्थः।देवदत्तादिशब्दैरिति। आदिनातिङ्ङन्तम्।नन्वेवमाधारस्यधर्मिणोपिप्रकृत्यालाभः आधारत्वेनालाभद्दत्यस्याधारत्वंनल
भ्यमितित्यत्रैवपर्यवसानात्तस्यैवशक्तिविशेषरूपस्यवाच्यत्वंयुक्तंतस्यधर्मिसाकाङ्क्षत्वाविशेषणत्वञ्चयुक्तमितिचिन्त्यम्।अभेदद्दति। विशेष्यविशेषणभावद्दत्यर्थः।वाक्यार्थद्दति।
हरिंभजतीत्यत्रेतिशेषः।फलमिति।कर्तुरिप्सिततमंविक्लित्तिकर्मसञ्ज्ञकविषयेफलमित्यर्थः।व्यापारद्दति। कर्तृविषये।स्वाश्रयेति।स्थाल्यांपचतितन्दुलमित्यत्रकर्मद्वाराऽधिकरणं
भूतलेदेवदत्तःपचतीत्यादौकर्त्तृद्वाराधिकरणम्फलीभूतेद्दति।पदजोपस्थितावविशेषेपितत्फलभूतेशब्दबोधेद्दत्यर्थः।द्दमुपलक्षणंसञ्ज्ञार्थस्यनिमित्तत्वेतत्तत्सञ्ज्ञाप्रका
तेष्वविधीयमानाद्धितीयाऽप्रकृत्यधिका।लपवात्क्रियायाधातुनाकर्तुश्चदेवदत्तादिशब्दैर्लाभात्।दृष्टतमत्वादेस्तुभानाभावात्। प्रकृतिप्रत्ययार्थयोश्चभेदद्दह
संसर्गः।तथाचहर्योधारिकाऽपीतिस्तदनुकूलोव्यापारोवाक्यार्थः।यद्यपिकर्मणिकर्त्तरिअधिकरणेचविहितानांद्वितीयादीनामाधारोर्थद्दतितुल्यम्।तथापितन्नि
रूपकंफलंव्यापारःस्वाश्रयद्वारातदुभयंचेतिफलीभूतेशाब्दबोधेवैलक्षण्यंसंगच्छते।नचाधारतैववाच्येतिमन्तव्यम्।तन्निष्ठधर्मस्यवाच्यतावच्छेदकतापत्त्याऽतिगौर
वात्।कर्मणिद्वितीयेत्यादिसूत्रस्वरसभङ्गापत्तेश्च।अतएवभाष्यकारआह।सुपांकर्मादयोप्यर्थाःसंख्यावैवतथातिङामिति।नचतिङ्पिधर्ममात्रमर्थः।कर्तरिकृत्।लःक
र्मणिचानयोरेवकर्त्र्यक्तखलर्थाद्दतिसूत्राणांवैरूप्यापत्तेः॥ ॐ रिकैवोपस्थितिरितिकर्मत्वादिनैवोपस्थितेस्तत्रापिवैलक्षण्यमस्तीत्यन्यत्रविस्तरः।तन्निष्ठधर्मस्येति।आधारेत
रावृत्तित्वेसतिसकलाधारवृत्तिस्वरूपस्येत्यर्थः।आधारतातुशक्तिविशेषरूपाखण्डैवेत्याशयः।नन्वाधारतैवनिरूपकाश्रयसंबन्धभेदेनभिन्नाआश्रयतात्मकखण्डमितिनगौरवमतआ
हाकर्मणीति।लोकेकर्मादिपदानांधर्मिपरतायादृष्टत्वेनसूत्रेपितत्परतैवोचितेतिभावः।आधारस्यशक्यत्वेनानन्ताधारतानामाधारतात्वेनानुगमानशक्त्यानन्यमितिवोद्धव्यम्।कर्मादयोपि
तिअपिनासंख्या।सूत्रवदेवात्रापिकर्मपदस्यधर्मिपरता।शक्तिरप्येतैर्धर्म्यभेदमापन्नैवोच्यतेद्दतिवोद्धव्यम्।संख्याचेतिचेनकर्त्तृकर्मणोर्वैरूप्यापत्तेरितिकृद्विषयेधर्मिपरतातिङ्विषये

कृतांधर्मिवाचकत्वेबीजमाह।पाचकदित्यादिस्त्रीकारादिति।कृतामितिशेषः।प्रपञ्चितमिति।लादेशशत्रादेस्तिङांचवैषम्यंसर्वथादुरुपपादमित्यादीतिभावः।तेननटस्येति।अपादानादि
विशेषैरविवक्षाचासक्तस्यबुद्धिपूर्वमविवक्षासर्वथाऽप्रसक्तस्याविवक्षावेत्युभयविधापिगृह्यते।प्रकृतेचान्याऽगीतद्वाराचतस्याख्यातोपयोगदृतिशास्त्रकृप्रक्रियाजनकत्वम्।न
चतस्यकर्मयुक्त्वाभावः।तदंशस्यापिपरिगणनलभ्यत्वात्।नचनटान्निस्सरत्नंशब्दंशृणोतीत्यर्थात्प्राप्तापादानत्वाविवक्षैवात्रेतिवाच्यम्।आख्यातोपयोगदृतिसूत्रेउपयोगग्रह
णेनानुपयोगेआख्यातेनिर्दिश्यमानस्यापादानत्वस्यानिष्टत्वबोधनादितिभावः।गोसंबन्धीति।गोकर्मकंपयः कर्मकंचेत्यर्थः।तत्रपयसएवेमिततमत्वेआह।तथायुक्तमितित्यजनोपसर्ग
पाचकोदेवदत्तःपक्वौदनदत्यादौसामानाधिकरण्यानुरोधेनधर्मिवाचकतास्त्रीकाराच्च।तस्मादिहघटादिशब्दानामिवविशिष्टमेववाच्यम्।आकृत्यधिकरणाभ्युपगमेतु
कृत्वपिधर्ममात्रंसर्वथापिनैथाप्यकर्मीयुक्तमर्थजरतीयंहेयमेवानहितिङ्कृतोर्वैलक्षण्यंसूपपादम्।प्रपञ्चितञ्चैतच्छब्दकौस्तुभेस्माभिरित्यलमियत्ता।परिगणन
मितिातेननटस्यशृणोतीत्यादीनाप्रसङ्गदतिभावः।गांदोग्धीति।गोसंबन्धिपयःकर्मकंदोहनमर्थः।स्यादेतत्।कर्तुरीप्सिततमंकर्मतथायुक्तंचानीप्सितमितिसूत्राभ्यांगतार्थमे
तत्।तथाहि।त्यजनोपसर्गेत्वजनदुहर्थः।दापनमङ्गीकारणंचयाचेः।विक्लेदनंपचेरित्यादि।एवंचधातूपात्तव्यापारविषयीभूतंयत्त्यजनदानाङ्गीकारादितदाश्रयत्वंगत्वादीनांस्पष्टमे
व।अतएवहिअणौकर्तुर्णौकर्मत्वस्यन्यायसिद्धतयागत्यादिसूत्रेनियमार्थमितिप्राचांसिद्धान्तः।अतएवंचाकडारसूत्रेअपादानमुत्तराणि।गांदोग्धिपयदत्यत्रपरत्वात्कर्मसञ्ज्ञेतिभाष्यं
संगच्छते।पञ्चकंप्रातिपदिकार्थदृतिपक्षेत्वर्थैकदेशान्वयोयुंगपत्विवक्षायांचेत्यत्रावधिभूतायागौः तन्निष्ठोयःपयःस्रवणानुकूलव्यापारस्तद्विषयिणीगोपनिष्ठप्रेरणेत्यर्थात्।
तथाचाकथितंचेतिसूत्रेनैयर्थ्यमितिचेत्॥ नामिधिगोःपयःसृजतिगवापयस्त्यानयतीतिप्रतीतेरितिभावः।न्यायसिद्धतयेतिव्यापारहार्यत्वेनोक्तसूत्रद्वयसिद्धतयेत्यर्थः।प्राचाम्।हेतुमतिचेति
सूत्रभाष्यकृताम्।परत्वादितिग्रामादायातीत्यादिसूत्रान्तरापाप्तावपादानत्वंसावकाशम्।कर्मसञ्ज्ञातुग्रामं गच्छतीत्यादौ।भाष्यमितिएवंतच्चभाष्यंनाकथितंचेत्येतद्विषयम्।अस्यापादानत्वाविवक्षा
यांप्राप्तायांपरत्वादित्युक्तसंगतेश्चधनयेनाह।यञ्चेत्यादिअवधिर्लेदि । अपादानत्वकर्मत्वशक्त्योरित्यर्थः।दृष्टेचविषयेआकडारसूत्रतद्भाष्यबलादुभयोरपिद्वितीयैवबोधिकेतिभावः ॥

दृतिस्थितमिति।प्राचां ग्रन्थेदृतिशेषः।अत्रोच्यते।विहितानुवादयोर्निष्ठविभागानुकूलव्यापारएवधात्वर्थस्तदपादानत्वादिविवक्षायामन्येनासिद्धेः।कर्मत्वार्थमिदमावश्यकमेवमन्येष्वपि।किं
च।दुर्दुरित्यपिषष्ठ्यपवादत्वात्।तद्भावेतदिषेरपिषष्ठ्यभावएवप्राप्तेरतःषष्ठ्यपवादत्वमात्रेणनसंबन्धत्वेनबोधकतोचिता।तस्मादत्रापिक्रियाजनकतासमानाधिकरणकर्मत्वशक्तिमत्त्वेने
बोधदूत्वेवोचितमन्यान्तरहृयार्थत्वेकनुरोधेनेतरभिन्नत्वेनापिद्विकर्मकत्वमस्त्येवयथाप्रयोगंबहूनांधातूनांतत्रयेव्यापारहृयार्थत्वेनद्विकर्मकास्तेषांप्रधानकर्मणिलादयःप्रधान
कर्मण्यास्येयेलादीनाहुर्द्विकर्मणामित्युक्तेः।प्रधानत्वंचमूलंचकर्तृप्रत्ययसमभिव्याहारेकर्तृनिष्ठप्रधानधात्वर्थव्यापारमात्रविशेषणफलाश्रयत्वम्।एवन्तविषयेदृष्टएषाप्राधान्यस्यैवग्राह्य
त्वात्।गर्गाःशतंदण्ड्यन्तामित्यादौगर्गाणांमेवतत्त्वमितितत्रैवकर्मणिलादयः।उद्देश्यत्वरूपमार्थप्राधान्यंतुशतस्येत्यनुद्देश्यत्वेनाप्रधानगर्गानुरोधान्नक्षतावृत्तिरितिनवृद्धिसूत्रस्थभाष्य
अत्रोच्यते।कर्मणःशेषत्वविवक्षायांनमाषाणांमश्नीयादितिवत्षष्ठीप्राप्तावाधितुमिदंसूत्रम्।तथाचेहषष्ठीवत्संबन्धमात्रंद्वितीयार्थइतिस्थितम्।अपादानत्वमात्रविव
क्षायांतुपञ्चम्येव।गोःक्षीरविशेषणत्वेतुषष्ठीतेनगोःपयोदोग्धीत्यपिप्रयोगःसाधुरेव।एवमग्रेप्यूह्यम्।यत्तुप्राचोक्तम्।दुह्याच्यजर्थरुधिप्रच्छिविभाषासुजिकर्मयुक्।नीहृकृ
ष्णवहदण्डग्रहमुष्णचकर्मणीतिसूत्रेकृष्णग्रहेःपाठोनिर्मूलः॥ ७७ विरोधः।एकव्यापारार्थकदुह्यादियोगेतुप्रधानकर्मणि।अप्रधानत्वंचात्वोक्तप्रधानकर्मभि
न्नत्वम्।तच्चतत्रार्थेगवादीनामेवेतिफलाश्रयत्वाभावात्।एवंचभाष्यानुक्तानांपरिगणनेपाठोयुक्तःअर्थनिबन्धनेयंसञ्ज्ञेतिचायुक्तम्।एवंद्व्यर्थत्वेनद्विकर्मत्वातिप्रसङ्गस्त्वन
भिधानेनवारणीयइतिदिक्।अपादानत्वमात्रेतिविभागानुकूलव्यापारमात्रार्थकत्वविवक्षायामितिभावः।गोःक्षीरेतिनचक्रियान्वयेपिशेषत्वविवक्षायांसेनिवाच्यम्।षष्ठ्यन्तार्थकस्य
स्यान्वयेगौण्यार्थकक्रियासमभिव्याहारेतत्रैवान्वयव्युत्पत्तेः।अतएवतण्डुलानामोदनंपचतीत्यादौद्व्यर्थत्वेपिविविक्षायांतण्डुलविकारमोदनंपाकेननिर्वर्तयतीत्यु
क्तंभाष्येनतुपाकान्वयेषष्ठीत्युक्तमितिदिक्।निर्मूलइति।अपादानत्वाद्यविवक्षायांतत्संबन्धिनःकर्मत्वेमूलंनास्तीतिभावः।द्विकर्मत्वंतुयदीष्टंतर्हिव्यापारहृयार्थत्व
मावेद्यम्॥

उदाहरणमप्ययुक्तमिति। शक्नोत्यनुरुञ्छग्राहेत्येवप्रतीतेः। पराक्रमातिशयद्योतनायजहारयुनरुमित्यस्यैवोचितत्वाच्चेतिभावः। द्विकर्मकत्वमिति। अकथितसूत्रविषयतयेत्यर्थः। कैयटमाधवादिसंमतत्वादितिभावः। अतस्तद्दोषस्यैवदूषणमाह। एवंचेत्यादिना। प्रधानमिति। उद्देश्यत्वादितिभावः। तस्योद्देश्यत्वेमानमाह। अर्थिनश्चेति। ननुनिग्रहार्थद्दति। शारीरदण्डाद्यर्थमुत्सर्गः। तस्मादेववाक्यशेषादितिभावः। एतत्सर्वंमाधवादिरीत्यालाद्युत्पत्तिनियामकंयदिप्रागुक्तंप्रधानकर्मत्वंतदेदंसर्वमसंगतमित्युक्तदिशेत्यम्। द्विजग्राहद्युतरुंशक्नोत्युञ्छग्रहणमप्ययुक्तम्। दूतरेणतुद्विकर्मकत्वंयद्यपिप्रामाणिकंतथापिसंदर्भशुद्धिः। तथाहि। दुह्यादीन्याद्यैर्द्वाभ्यांयेनेहपठित्वाभावकर्मप्रक्रियाशेषेलकृत्यक्तखलर्थाः किंद्विकर्मकेभ्योमुख्येकर्मणिस्युःगौणेवेत्याकाङ्क्षायांस्वयमेवपठितम्। ण्यादयोण्यन्तनिष्कर्मगत्यर्थामुख्यकर्मणि। प्रत्ययंयान्तिदुह्यादिर्गौणेन्येतुयष्यारुचीति। एवंचदण्डिमन्थिभ्यामपिमुख्येगुणतोनगर्गाःशतंदण्ड्यनामितिभाष्यंविरुद्धेत। शतंह्यत्रप्रधानंनगर्गाः। अर्थिनश्चराजानोहिरण्येनभवन्तीतिवाक्यशेषात्। दण्डिश्चेद्ग्रहणार्थोनन्वनुग्रहार्थः। अतएववस्त्रंतस्मादायेवाक्यसमाप्तिः। गुणानुरोधेनप्रधानाक्षेपसंभवात्। तथामन्थेरपिप्रधानेस्यात्। द्दश्यतेतुगौणेतथाचभारविः। येनाविद्धसल्लिलस्फटिनागसन्नाहेवसुरैरमृतमम्बुनिधिर्मन्थेदिति। अत्रामृतंमुख्यम्। उद्देश्यत्वात्। अम्बुनिधिस्तुगौणः। यदपिव्याख्यातारआहुः। द्विकर्मकेषुपक्वेरप्रामाणिकःपाठइति। तद्भ्रमात्। तथाहि। कर्मवत्कर्मणेतिसूत्रेद्विहपच्योर्बहुलंसकर्मकयोरितिवार्तिकेनद्वाभ्येवपचेर्द्विकर्मकतालभ्यतेकैयटहरदत्ताभ्यांचतत्रैवस्फुटीकृता। माधवोप्याह। जयतेःकर्षतेर्मन्थेर्मुषेर्दण्डयतेःपचेरितिादि। उदाजहारचातन्दुलानोदनंपचतीतिमत्वाकथितश्चेतिसूत्रेहरदत्तेनोक्तम्। अकथितशब्दोयद्यप्रधानार्थोगृह्येततदापाणिनाकांस्यपात्र्योदोग्धिपयइत्यत्रपाणिकांस्यपात्र्योरप्यस्यात्कारणाधिकरणयोस्तुपचत्यादिरवकाशः। नहितत्रास्यप्रसङ्गोदुह्यादिपरिगणनादिति॥ ७ कर्मकेषिति। अकथितसूत्रेत्यर्थः। पचेरप्रामाणिकत्वदूषणंकैयटाद्यनुरोधेनेतिध्वनयन्नाह। कैयटेति। अत्रातण्डीजंतुपचेर्व्यापारद्वयार्थत्वेकर्तुरीप्सितमितिकर्मणोवृत्तस्यैकव्यापारपरिस्पन्दानेकर्तृत्वविवक्षयापिभाष्यस्यसूपपादत्वेनैतत्सूत्रविषयत्वेनमानमिति "

न्मतान्तरेति।पूर्वोपपादितभाष्यसंमतमतेत्यर्थः।भाष्यानुक्तानांसर्वेषांग्रहणमप्रमाणमित्यनेनसूचयति।उदाहृतस्वपरग्रन्थांश्च यास्मृतकेयटानुसारेणेतिचध्वनितमित्यन्यत्र
विस्तरःकैयटइति।अत्रारुचिबीजमुक्तमृदितिभावइति।अर्थनिबन्धनेयंसञ्ज्ञेतिवदंतकैयटादीनामित्यादिः।द्विकर्मकत्वंतुव्यापारद्वयार्थत्वेनसिद्धमितितत्त्वम।कुरुपाञ्चालादिरिति
न्यास्त्वनानार्थेवभाष्योदाहरणाच्चेतिभावः।नवैयर्थ्यमितिशीङादेरधिशयनपूर्वकेव्यापनेरत्याकर्तुरित्येवकर्मत्वस्यास्यादियोगद्वयसिद्धत्वादितिभावः।एवंचैवंकल्पनयोक्तदेशादीना
तन्मतान्तराभिप्रायेण।अन्यथाउदाहृतस्वपरग्रन्थविरोधादित्यर्थांतात्पर्यात्।शत्रंजयतीतिजिअभिभवे।यत्तुजिजयदृतिव्याख्यातंतन्नातस्याकर्मकत्वात्।यद्यपिजयत्यादयोभा
ष्येनपठितास्तथापिचकारेणसंगृह्यन्तदृतिकैयटः।अर्थनिबन्धनेतिनतुस्वरूपाश्रया।अहमपीदमचोद्यंचोद्यदृतितद्राजसूत्रभाष्येएच्छिपर्यायस्यचुदेरपिद्विकर्मकत्वदर्शना
दितिभावः।तथाचभट्टिः।स्यादुस्रोरुमुखोजगादमारीचिमुच्चैर्वचनंमहार्थम।कालिदासोपि।शिलोच्चयेपिप्सितपालमुच्चैःप्रीत्यातमेवार्थमभाषतेव।भारविश्चाउदारचेतागिर
मित्युदारांदूपायनेनाभिदधेनरेन्द्रदृति।एवंचनाध्यात्यादयोबहवोद्विकर्मकाबोद्धाः।देशदृति।कुरुपञ्चालादिरेवेहगृह्यतेतेनाधिशीङ्स्यासामित्यादेर्नवैयर्थ्यम।गोदोहदृति।
नचेहकालत्वात्सिद्धिः।लोकेकालस्यैवप्रसिद्धत्वेनैवग्रहणात्।तेनघटमास्तेदृत्यादिनभवति।यत्तुप्राचोक्तम।अकर्मकधातुभिर्योगेदेशःकालोध्वभावेभ्योद्वितीयेतिकेचि
त्।नदीमास्तेदृत्यादि।अत्रेदंवक्तव्यम।कर्मसञ्ज्ञायाअनुक्तत्वात्कर्मणिलादयोनस्युःआस्यतेमासदृतियथा।केचिदित्यप्यसंगतम।द्वितीयायाभाष्यसंमतत्वात्।नदीमित्युदाहरणमप्यसं
गतम।ग्रामसमूहकुर्वाद्विनदेशेनतुप्रदेशमात्रमातेनग्रामंस्वपितीत्यत्रनभवतीत्याकरात्।अध्येतिचत्वनम।अध्वानंस्वपितीतिप्रसङ्गात्।अतएवाकरेअध्वागन्तव्यत्वेनविशेषितः।ग
न्तव्यत्वेनप्रसिद्धोनियतपरिमाणःक्रोशादिरितिव्याख्यातम॥ ७७ मेवकर्मत्वंनान्येषामनभिधानादितिसूचयति।प्रसिद्धस्येतिक्रियायाःकालोपाधित्वमेवप्रसिद्धमितिभावः।तेनेति।देशादी
नांग्रहणेनेत्यर्थः।यत्तुमासादेरेवग्रहणेनेत्यर्थदृति।तच्चाजन्यमात्रस्यकालोपाधित्वेपिकालत्वाभावात्।यदितुजन्यमात्रस्यकालत्वमितिमतमस्तितदाघटत्वादिनानत्वस्यकालतांकिं
नुमासत्वादिनैवेतिभावः।एतच्चनापूर्ववचनमित्याकरेस्थम।अध्वानंस्वपितीति।स्वापमात्रार्थकोत्रस्वपितिः ॥

कार्मसंप्रत्ययादिति।कार्यसंप्रत्ययस्यौचित्यादित्यर्थः।ननुकर्तरिकर्मेतिसूत्रेक्रियायाअपिकृत्रिमकर्मत्वोक्तेरिदमसंगतमतआह।कर्मेति।प्राञ्चइति।हेतुमतिचेत्यत्रभाष्यकृतइत्यर्थः।गुणक्रियायाम्।णिच्प्रकृत्यर्थक्रियायाम्।स्वातन्त्र्यादित्यस्यस्वधर्मेणाभिधानेहेतुत्वंकर्मसञ्ज्ञानियमस्यचाप्रेषणेऽप्यर्थेतृतीययेतिस्वधर्मेणेत्यस्यस्वकार्येणेत्यर्थः।विशिष्टक्रियायाःसंबन्धेहेतुमाहहेतुमतीति।अन्तरङ्गत्वादिति।एवंचपरत्वादित्युभयोः।अस्यविधित्वमित्ययंपक्षआकाङ्क्षारसूत्रेभाष्येऽपिनतद्त्यभिमानः।तत्रहिपरंकार्यमितिपाठेगत्यादीनांप्यन्तानांकर्मकर्तृसञ्ज्ञमपिप्राप्नोतिआरभ्यसामर्थ्यात्कर्मसञ्ज्ञापरगतिबुद्धिप्रत्यवसानार्थशब्दकर्मकाणामितिशब्दःकर्मकारकंयेषांतेषामित्यर्थः।नचिहकर्तरिकर्मव्यतिहारइतिवत्कर्मशब्दःक्रियापरः।कृत्रिमेकार्यसंप्रत्ययात्।कर्मग्रहणसामर्थ्याच्चअन्यथागतिबुद्धिप्रत्यवसानशब्दार्थकर्मकाणामित्येवात्रस्यात्।नियमार्थंचैतत्सूत्रमितिप्राञ्चः।णिजर्थेनाप्यमानस्यदिभवतिनहिगत्यर्थानामेवकर्तुरिति।तेनपाचयतिदेवदत्तोयज्ञदत्तेनेत्यत्रप्रयोज्येप्रकृत्यर्थेप्रतिकर्तृत्वस्यैवनिरपवादत्वेनावस्थानात्तृतीयासिद्धेति।उक्तञ्च।गुणक्रियायांस्वातन्त्र्यात्प्रेषणेकर्मताङ्गतः।नियमात्कर्मसञ्ज्ञायाःस्वधर्मेणाभिधीयतइतिकर्तुःस्वधर्मेणतृतीययेत्यर्थः।ननुणिजर्थेप्रतिकर्मत्वंबाधित्वाप्रकृत्यर्थप्रतिकर्तृत्वंपरत्वादेवसिद्धम्।अन्तरङ्गत्वाच्चास्वकारकविशिष्टाहिक्रियाणिजर्थेनसंबद्ध्यतेहेतुमतिणिजिवधानात्।कर्तृप्रयोजकस्यहेतुत्वात्।अतएवोपजीव्यापिकर्तृसञ्ज्ञा।एवंचपरत्वादन्तरङ्गत्वादुपजीव्यतयापिचप्रयोज्यस्यास्तुकर्तृत्वङ्गत्वादेर्विधितोचितेतिचेत्।अस्त्येवमूलसूत्रस्यनिर्बाधत्वात्।नियमसूत्रमिदमितियत्रस्थानाकागतिरितिचेत्।शृणु।णिजर्थस्यशब्दंप्राधान्यंपुरस्कृत्यप्रधानानुरोधिन्याःकर्मसञ्ज्ञायाःप्राबल्यात्विप्रतिषेधएवनास्ति।अन्तरङ्गेपजीव्यत्वेऽपिप्रधानंप्रतिनंप्राबल्यंप्रयोजयतदुक्तन्यायेनग्रन्थानामुक्तिसंभवः।।अर्थप्राधान्यपुरस्कारेतुविधायकत्वमेवोचितमितिद्वेयम्॥ ७॥कार्यत्वाच्चकर्तृसञ्ज्ञाप्राप्नोतीत्युक्तमनन्तरंसामर्थ्यादित्यस्यगत्यादिसूत्रारम्भसामर्थ्यादित्यर्थमन्यतेपुरस्कारेत्यिति।तुनाऽरुचिःसूचिता।प्रयोजकव्यापारेऽन्यानधीनत्वलक्षणार्थंप्राधान्यस्यशब्दप्राधान्यस्यचसत्त्वेनोद्देश्यत्वलक्षणार्थंप्राधान्यस्यप्रयोज्यव्यापारनिष्ठस्यपुरस्कारेणयुक्तइति।किंचकर्तृग्रहणंधात्वर्थप्रधानीभूतव्यापाराश्रयरूपस्यतल्लक्षणंनतुतत्सञ्ज्ञकपरम्।अतउपजीव्यत्वंदुरुपपादम्।आकङ्क्षारसूत्रस्थस्यारम्भसामर्थ्यादित्यस्यैतन्नियमारम्भसामर्थ्यादित्यर्थः।किंचपरंकार्यमितिपाठेविरोधाभावात्सर्वत्रसञ्ज्ञाद्वयप्राप्तावस्यनियमार्थतैवोचिता।एषाकर्मसंज्ञैवेतिनियमस्तुनप्राक्कडारादितिशास्त्रबा

नच्चिहेति।तथायुक्तमित्यनेनापिनन्त स्थानीप्सितत्वाभावात्ततत्रापिकर्तुरित्यनुवृत्तेश्चालक्षणांविनेति।कर्तृपदस्यस्वतन्त्रेलक्षणांविनेत्यर्थः।अतएवसार्थाद्दीयतेदत्यत्रकर्तुरपाठनत्वेपिक
र्मत्वप्रयुक्तलकारसिद्धिरितिसंप्रदानसञ्ज्ञासूत्रेकैयटेस्पष्टम्।तत्रयोजकोहेतुरितिसूत्रेण्येवमेवेतण्वणिञ्सिद्धिः।भवत्येहीति।किंचप्रयोजककर्तृव्यापारप्रयोज्यसंयोगरूपफला
श्रयत्वेनाक्षतंकर्मत्वम्।किंचणिजुत्पत्तेःप्रागेवस्वर्गादीनांकर्मत्वप्रवृत्तिस्तस्यामवस्थायांकर्तृत्वसम्बन्धात्।अकृतव्यूहादितिवत्याना स्त्येवा।प्रापणमिति।उत्तरदेशसंयोगानुकूलव्या
पारानुकूलव्यापारोहितत्।तप्तापीति।अतएवप्रतिषेधोयथाकथंचिद्दूत्यर्थानामण्यत्रग्रहणमितिभावः।प्राप्तिमत्वाति।नवेतिसूत्रेभाष्येहृक्रो।रित्यस्योभयत्रविभाषात्वमुक्त्वाप्राप्ते
शत्रूनिति।स्वर्गकर्मकंशत्रुनिष्ठंयदूमनंतदनुकूलोयन्निष्ठोव्यापारःसश्रीहरिर्मेगतिरित्यर्थः।नन्विहकथंस्वर्गस्यकर्मत्वंकर्तुरीप्सिततमंहिकर्मनचशत्र
वःकर्तारः।तेषांगत्यादिसूत्रेणकर्मत्वादितिचेन्।मैवम्।कर्मसञ्ज्ञायांहिकर्तृग्रहणंस्वतन्त्रस्योपलक्षणम्।स्वातन्त्र्यंचधातूपात्तव्यापाराश्रयत्वमेव।तच्च
प्रयोजकसंनिधानेपिप्रयोज्यस्यास्त्येवेतनुपोपलक्षणत्वेप्रमाणाभावः।प्रधानकर्मण्याख्येयेलादीनांहृदिकर्मणाम्॥अप्रधानेदुहादीनामित्युक्त्वा प्यस्ने
कर्तुश्चकर्मणइतिवदनोभाष्यकृतएवतत्रप्रमाणत्वात्।नहिलक्षणांविनाणिजन्तानांहिकर्मकतालभ्यते येनण्यन्तेकर्तुरितिवचनंसावकाशंस्यात्।ननु
स्वतन्त्रसंकेतितस्यतत्रैवलक्षणाकथमितिचेत्संज्ञान्तरानुपहितेसंकेतितस्यतदुपहितसाधारणेस्वतन्त्रमात्रेसेत्यवधेहि।नीयह्योरिति।यद्यप्यनयोःप्राप
णमर्थोनगतिस्तथापिगतिरपिविशेषणीभूयप्रापणमर्थेप्रविष्टेत्येतावन्मात्रेणप्राप्तिमत्वाप्रतिषेधउक्तः ॥ अभ्यवहरतिमुदाहृत्याप्राप्तेहरतिभारंदेवदत्तोहार
यतिभारमित्युदाहरणात्।विपूर्वोहरतिर्गत्यर्थोभ्यवपूर्वःप्रत्यवसानार्थइतिनत्रत्यकैयटाच्चनगतीतिसूत्रेभाष्येहवयोरप्रतिषेधःसंप्रहरन्तेराजानइतिहिंसार्थेरावभाष्येउदाहरणाच्चन
त्रैवहिर्नैगत्यर्थःदेशान्तरप्रापणंहिवहेरर्थइतिभाष्येणप्रापणस्यगतित्वाभावबोधनाच्चनगत्यर्थत्वेनतेषांग्रहणम्।प्राप्तिसंबन्धमात्रंनसंयोगएवासुरंवप्राप्तोधनंप्राप्तोभूःप्राप्तेत्यादिष्यवहा
रात्।आदिकर्मणिचकर्तरीप्सितःदेशान्तरप्राप्तेःपरंगतिंविनाऽनुपपत्त्याकचिन्नान्तरीयकतयागतिप्रतीतिरस्त्येवतादृशमपिगत्यर्थकत्वमभिमत्यवार्तिकारम्भवःस्तुतोप्राप्तिरेवेतिअनेनसूचितम्।

हिंसेति। हिंसाङ्गे भक्षणे च भक्ष्यतेर्ग्रहिर्बोद्धा । भाष्यप्रयोगादेवेति। आद्यानार्थकघटादिभिन्नस्मरतेरेवयोगेतद्भाष्यप्रामाण्यात्कर्मत्वाभावोघटादेस्तुभवत्येवकर्मत्वमितिभावः। परास्तादितिदूरंचकैयटानुरोधेनोक्तम्।वस्तुतः शब्दक्रियाणामितिपक्षेभाष्येह्वयतिशब्दयतिक्रन्दयतीनांनिषेधउक्तोनतुशब्दकर्मकाणामितिपक्षेएवंचतत्रपक्षेशब्दायतौप्र

नियन्त्रिति। नियन्तापशुप्रेरकोनतुसारथिरेवतेनत्वाह्वयतिबलीवर्दान्यवान्इतिसिद्धयति।अनिषेधदिति। प्रयोज्यःकर्मेतिवक्तव्यमितिफलितोर्थः।सूतइति।नियन्ता प्राजिता यन्ता सूतः सत्ताचसारथिः।आद्यतीति।अकर्त्रभिप्रायेफलेशेषात्कर्त्तरीतिपरस्मैपदंकर्त्रभिप्रायेतुणिचश्चेत्यात्मनेपदमेवातदपवादस्यनिगरणचलनार्थेभ्यश्चेत्यस्यअदेःप्रतिषेधदितिनिषिद्धत्वात्।सस्यमिति। सेत्रस्थानांयवानांभक्ष्यमाणानांहिंसादृष्ट्यातस्यामवस्थायांतेषांचेतनत्वात्।स्मारयतीति।यत्तुणेरणाविति सूत्रेस्मरयत्येनंवनगुल्मस्वयमेवेत्युदाहृत्यनेतत्रभाष्यप्रयोगादेवकर्मत्वंबोद्धम्।शब्दायतेरिति।शब्दंकरोतीत्यर्थेशब्दवैरेत्यादिनाक्यङ्।ततोहेतुमतिचेतिधात्वर्थेति।एतेनशब्दायतिसैनिकैरिपूनितिकर्मप्रयुञ्जानाःपरास्ताः।यत्तुप्राचांअयंक्रन्दशब्दायह्वयांनेत्युक्तम्।तत्रायतेरुक्तिस्तावन्निर्मूलैवाक्रन्दह्वेञोस्तुशब्दक्रियत्वमात्रेणप्राप्तिसंभावनात्।वस्तुतस्तुनाशौसूत्रार्थदत्युक्तम्।यद्यपिग्रहदृशामिनिकर्मत्वमुक्तम्।तत्रदृशिग्रहणंप्रामाणिकमेवाभृणोतेस्तुशब्दकर्मकत्वात्सिद्धम्।ग्रहेस्तुदिकर्मकत्वंयद्यपिसुधाकरादीनांसंमतंतथापिबहूनामसंमतम्।अतएवअजिग्रहत्तंजनकोपनुस्तरितिभट्टिप्रयोगमजिग्रहत्बोधितवानितिव्याचख्युः।तथाअयाचितारंनहिदेवदेवमद्रिःसुतांग्राहयितुंशशाकेत्यत्रग्राहयितुमुद्वाह्यत्वेनबोधयितुमितिव्याचख्युः।युक्तंचैतत्।ग्राहेर्द्विकर्मकत्वेहिजायाप्रतिग्राहितगम्यमात्मानमित्यत्रक्तेनप्रयोज्यायाधेनोरभिधानंस्यात्।ण्यन्तेकर्तुश्चकर्मणइत्युक्तेः ॥ ॐ तिषेधानुत्थाःकर्मकशब्दायतिसत्त्वेनमानम्।शब्दस्यार्थेनसंगृहीतत्वेपिबहिर्भूतपुत्रादिकर्मीभावेनमानमितिबोद्धम्।व्याचख्युरिति। तेनबोधनातिरिक्तार्थस्यनद्विकर्मकत्वम्।अन्यथाःप्रसिद्धार्थपरिग्रहोव्यर्थएवस्यादितिभावः।ग्राहेः।बोधनातिरिक्तार्थग्राहेः ॥

ततश्चेति।एवंचज्ञधिकरणत्वादन्यपदार्थाभावाच्चबहुव्रीहिर्नस्यादितिभावःप्रतिग्राहितेदृति।अस्यजायपेत्यदिः।तत्रजायाप्रतिग्राहितशब्दयोस्तृतीयातत्पुरुषंकृत्वाबहुव्रीहिःकार्यइतिभावः।बहुव्रीहिणात्तृतीयातत्पुरुषस्तुदुर्लभोविधायकाभावात्।अवयवेनसामर्थ्येपिसमुदायेनतृतीयान्तस्यासामर्थ्याच्चतदाह।जायानिष्ठेति।ननुद्विकर्मकेधिनेतुरूपप्रयोज्यकर्मणःकर्मत्वाविवक्षायांगन्धमाल्यरूपकर्मण्येवक्तेदृष्टसिद्धिरितिचेन्न।णिजुत्पत्त्यर्थंप्रयोजकजायायाहेतुत्वावश्यकत्वेनहेतोश्चकर्तृप्रयोजकत्वरूपत्वेनप्रयोज्यायाधेनोःकर्तृत्वार्थंजायानिष्ठप्रेरणविषयीभूतव्यापाराश्रयत्वविवक्षायाआवश्यकत्वेनेदृशार्थस्यैवैतत्कर्मसञ्ज्ञानिमित्तकोटौप्रवेशेनेदृशविषयेकर्मत्वाविवक्षायाउपपादयितुमशक्यत्वात्।कर्मत्वशक्तेरपितत्समनियतत्वेनाविवक्षायाअसंभवदृत्यभिमानात्।नचनिरुक्तप्रेषणप्रतिग्रहधातोर्णिनितश्चजायागन्धमाल्येप्रतिग्राहितामितिस्यात्।सिद्धान्तेतुप्रतिग्राहितेगन्धमाल्येयमेतिविग्रहः।जायानिष्ठप्रेरणविषयीभूतंगन्धमाल्यकर्मकंयत्प्रतिग्रहणंतत्कर्त्रीमित्यर्थः।अन्यपदार्थान्तर्भावेणेकार्थीभावेविशेषणविशेष्यभावेपरीत्येनैवैकार्थीभावकल्पनात्।अभिवादयतेरुपसृष्टादृशेस्तुप्रेक्षाविभाषेयम्।अभिनि।नेल्याच्चतरत्वेनपूर्वनिपातेकर्तव्येप्रियंतोजारणभाइत्यसमुदायविवक्षार्थमित्याह।संपातपूर्वकस्येतिनेनेहनानिविशतेयदिभूक्तशिक्षायदेदृति।क्वचिन्नेति।एषवर्षेषाभिनिविष्टानामितिभाष्यप्रयोगस्त्वेहमानम्।उपपदविभक्तिमाह।उभसर्वतसोरित्यादिना ॥ ॐ गन्धमाल्यकर्मण्येवक्तेदृष्टसिद्धिर्णीमापदेनषष्ठीसमासदृतिवाच्यम्।प्रकृत्यैवतदर्थलाभेणिजुपादानस्यापुष्टतापत्तेः।ननुगवादिपदानांविग्रहेस्वार्थमात्रपराणांसामानाधिकरण्येनान्यपदार्थपरत्वमिवप्रतिग्राहितशब्दस्यधेनुपरत्वेपिस्वौगन्धमाल्यपरत्वंभविष्यतीत्यतआह।अन्यपदार्थेति।तदन्तर्भावेणेकार्थीभवस्यसूत्रस्थत्वादिबलेनाङ्गीकारेप्यन्यान्तर्भावेणतत्स्वीकारेमानाभावदृतिभावः।अभिवादयतेरितिवदिअभिवादनदृतिण्यन्तस्येत्यर्थः।व्याख्यानात्तङ्गतग्रहणेस्थितेव्याख्यानेबीजाभासंदर्शयति।पूर्वनिपातेति।निविशतेदृति।अतएवसत्रेनिविशतेदृतिभाष्यप्रयोगःसंगच्छतेभाष्यप्रयोगदृति।समर्थसूत्रस्थदृतिशेषः ॥

उभसर्वयोस्तसाविति।उभांशेउभशब्दघटितसमुदायोद्देश्यकत्वंषष्ठ्यर्थइतिबोध्यम्।उभशब्दस्यशब्दपरत्वाद्वृत्तिविषयेविनायचवार्त्तिके।उदाहरणेतुअन्तरङ्गत्वात्पूर्वमेवंत्यवि
तउभयशब्दान्तस्यापितदघटितसमुदायोद्देश्यकत्वमस्त्येवेतिनदोषः।वृत्तिविषयेदृति।वृत्तौरूढतायामित्यर्थः।प्राचीनैर्हिउभौसाभ्यासस्येतिनिर्देशेनवृत्तिघटकेपरतएवा
यजितिव्याख्यातंतदाह।उभशब्दादित्यादि।एवंचतेषांलक्षणाप्रयणंव्यर्थमितिभावः।अविभक्तिकइति।अनुत्पन्न विभक्तिकइतिदर्शइतिव्याख्यातारः दृष्टान्तबलेनतथैव
उभसर्वयोस्तसौउभसर्वतसौतदन्तयोर्योगेद्वितीयाकार्यैत्यर्थः।अत्रप्राञ्चः।उभशब्देनोभयशब्दोलक्ष्यते।अन्यथातसोसंभवादित्याहुः।वस्तुतस्तु।वृत्तिविषये
अयच्प्रवृत्तावपिउभशब्दाद्विहितोयस्तस्तदन्तमस्त्येवेतियथाश्रुतंसाधु॥धिगित्यविभक्तिकोनिर्देशः।गवित्ययमाहेतिवदितिप्राञ्चः।तन्नातथासतिअपदा
न्तत्वाद्दशान्तेलोपःशाकल्यस्येत्यस्यैवदार्ष्टान्तिकेजश्त्वस्यापिअप्रवृत्तिप्रसङ्गात्।नचायंगकारान्तएवेतिभ्रमितव्यम्।कस्यचिद्दृतिसूत्रेधकिदित्युदाहरणस्या
संगतिप्रसङ्गात्।तस्मात्तूधिगितिविभक्त्यन्तमेव।प्रकृतिवदनुकरणमित्यतिदेशात्सुपोलुक्।उभयतःकृष्णमिति।कृष्णस्यपार्श्वद्वयोरित्यर्थः।आद्यादित्वात्तसिः।ष
ष्ठ्यर्थेद्वितीया।एवमुपपदविभक्तेःसर्वत्रबोध्यम्।नाम्नोद्वित्वैवसंबन्धःसर्ववाक्येष्ववस्थितः।सामानाधिकरण्येनषष्ठ्यावापिक्वचिद्वेतद्दृत्तिस्थेतौषष्ठीग्रहणंत
दपवादविभक्तेरप्युपलक्षणम्।द्वित्वेत्युक्तिःसामानाधिकरण्यवैयधिकरण्याभ्यांनिर्वाह्या।षष्ठीतूपपदाद्योरेकस्मिन्नित्यादौ।धिक्कृष्णाभक्तमिति।तस्यनिन्द्यतेत्यर्थः।कथं
धिङ्मूर्खेतिसंबोधनपदस्यक्रियान्वयइतिप्रागेवोक्तत्वाधिक्शब्दयोगाभावात्।क्रियापदंचकुत्रचिदाक्षिप्तमित्यन्यदेतत्॥श्लाघाद्यभिप्रेत्याह।जश्त्वस्येति।अतिदे
शादिति।अतिदेशेनाव्ययत्वादित्यर्थः।आद्यादित्वादिति।कृत्स्नसंबन्धिपार्श्वद्वयाभ्यामागताद्यर्थेपञ्चम्यास्तसिलित्यन्ये।सामानाधिकरण्येन विनापिसंबन्धंविशेष्यविशेषणभा
वेनाषष्ठ्येतिभेदसंबन्धपूर्वकविशेष्यविशेषणभावेनेत्यर्थः।नाम्नोरित्यनेनक्रियाकारकयोःक्रियाकारकभावरूपकारकविभक्त्यर्थसंबन्धेनान्वयइतिसूचितम्।वैयधिकरण्येतिषष्ठ्यास्त्व
तद्वैयधिकरण्योपलक्षणमितिभावः।क्रियान्वयदृतिबोधनीयक्रियान्वयमदित्यर्थः।धिक्शब्दयोगाभावादितिसंबोधनस्यक्रियान्वयात्तक्रिययैवधिकोयोगोनतेनापीतिभावः ॥

व्याख्यानमिति।तातेत्यादेर्हाशब्देनसंबोधनेनयोगदृतिभावः।हापदस्यचाध्याहृतत्वामित्यनेनमामित्यनेनवाऽन्वयदृतितात्पर्यम्।।कारकविभक्तित्वमिति।कर्तृकारकविभक्तित्वमित्यर्थः।संबोधनपदार्थस्यदेवस्यतत्वमित्यनेनसहाभेदेपिशब्दतः क्रियाश्रयत्वादिप्रतीतेरुपपदत्वस्याशक्यतयाकर्तृत्वंदुर्लभम्।वास्तवक्रियाश्रयत्वमादायकर्तृत्वेतुबहूपपन्नवदृतिभावः।नास्यप्रवृत्तिरिति।अतएवसर्वेषामंघमस्माभामुपर्युपरिवर्त्ततदृत्यादेर्नद्वितीया।अत्रह्युपर्यधीत्यस्यातिशयोर्थोनसामीप्यम्।वीप्साद्विर्वचनंचात्रेतिबोद्धम्।उपसर्गदृति।बुभुक्षितान्वितप्रत्यर्थसंबन्धस्यतथोचमूर्खसंबोद्धृकंनिषिद्धाचरणादिनिन्द्यमितिवाक्यार्थः।एतेनहेतातहादेविधीरभवेत्यादिव्याख्यातम्।यत्त्वाहुः।उपपदविभक्तेःकारकविभक्तिर्बलीयसीतिसंबोधनेप्रथमैवभवति।संबोधनपदस्यकर्तृकारकत्वाविलादिति।तन्मन्दम्।संबोधनपदस्यकर्तृकारकत्वेउक्तिसंभवाभावात्।देवप्रसीदेत्यादौवस्तुगत्यादेवएवकर्तेतिचेन्नैतावताकारकविभक्तित्वं लभ्यते।किंचदेवत्वांभजेत्वांभजन्तीत्यादौसंबोद्धृस्यवास्तवमपिनकर्तृत्वमित्यस्तंतावत्।उपर्युपरीति।कथंतर्हिउपर्युपरिबुद्धीनांचरन्तीश्वरवदृषः।उच्यते।उपरिबुद्धीनामुत्तानबुद्धीनामुपरिचरन्तीत्यर्थः।एवंचआम्रेडितलाभावान्नद्वितीया।यद्वा।प्रतिपदोक्तस्यैवपर्यद्यधसःसामीप्यदृतिरुक्तद्विरुक्तस्यात्रग्रहणम्।तेनवीप्सायोद्विर्वचनेसतिनास्यप्रवृत्तिः।अन्यत्रापिदृश्यतदृत्युक्तंतदृर्शयति।अभितःपरितदृति।प्रतिभातीति।एषप्रतिशब्दःक्रियाविशेषकत्वादुपसर्गः।नतुकर्मप्रवचनीयः।अन्तरात्वांमामिति।तवममचमध्येदृत्यर्थः।सामर्थ्यादिति।अतएवहेतुत्वपर्यन्तमपिशब्दबोधेविषयदृतिस्वीक्रियतदृतिभावः।नदीमन्विति।द्वितीयायाःसंबन्धोर्थः।सचेहसाहित्यरूपदृतिअनुनाद्योत्यते।लक्षणेत्यम्।वृक्षंप्रतीतिवृक्षसंबन्धिद्योतनमर्थः।संबन्धश्चलक्ष्यलक्षणभावदृतिप्रत्यादेद्योतयन्ति।भक्तोविष्णुंप्रतीति।विष्णोर्भक्तेश्चविषयविषयिभावःप्रत्यादिद्योत्यः।लक्ष्मीरिति।लक्ष्मीरूपस्यभागस्यहरिणासहसस्वामिभावःहरंहरमिति।द्रवीप्साद्विर्वचनेनैवद्योत्यते।परिशब्दस्तुक्रियायासंबद्यतेकर्मणिद्वितीया।कर्मप्रवचनीयसञ्ज्ञयाउपसर्गसञ्ज्ञायाबाधात्फलेन ॥७ क्रियागतत्वात्तुभुक्षितस्यनभातीत्यन्वयदृतिभावः।मद्वेदृति।अन्तरदृतिहिमद्वेदृत्यर्थकम्।लक्ष्यलक्षणेतिवृक्षप्रकाशेनविद्युद्विद्योतनज्ञानाद्वृक्षोलक्षणंविद्युद्विद्योतनंलक्ष्यम्।कर्मणीति।वृक्षपदार्थस्यसेचनंप्रतिकर्मत्वात्।अतएववृक्षस्यप्रतिसेवनमित्यादौषष्ठीतिभावः ॥

विषयेनयेति। अन्यद्योत्याया अपि वीप्सायाः सञ्ज्ञाप्रतिनिमित्तत्वादिति भावः। इतरेलक्षणादयस्तुद्योत्याएवेति वोद्यम्। इतितुनभवतीति। विशिष्टक्रियासंबन्धेविशेषणेनापिसंबन्धा
त्प्राप्तिरितिभावः। एतत्सर्वंहरदत्तानुरोधेनाकर्मत्वाविवक्षायामपिद्वितीयार्थेसञ्ज्ञायाआवश्यकत्वात्। किंचपरैः क्रियाविशेषकत्वेनव्यर्थत्वेनकर्मप्रवचनीयत्वस्यैवानापत्तिरित्यन्यत्र
विस्तरः। नन्वत्रार्थेभागाइतीत्याकर्थंनिषेधोऽतआह। अत्रचेति। अर्थतोभागेपर्यवसानमादायनिषेधप्रवृत्तिरितिभावः। कालाध्वेति। येनकालेनाध्वनावात्यन्तसंयोगस्तद्वृत्तिभ्यामित्यर्थः।
एतदर्थमेवलक्षणादयोविषयतयोपात्तादितिव्याख्यातमाकरे। पञ्चम्यपाङ्परिभिरितितुनभवति। वर्जनार्थेनापेत्यनेनसाहचर्यात्। ममाभिष्यादिति। ममभागः स्यादित्यर्थः। माम
भिष्यादित्यपिप्राञ्चः प्रत्युदाहरन्ति। तन्नमांप्राप्नुयादित्यर्थः। उपसर्गवशेनअस्तेः सकर्मकत्वान्नामितिद्वितीया। अत्रचममभागइत्यर्थतः पर्यवसानात्। अभागेइतिकर्मप्रवचनी
यत्वेनिषिद्धेउपसर्गप्रादुर्भ्यामितिषत्वम्। पूजायांचेति। सुः पूजायामितिपूर्वसूत्रात्पूजाग्रहणमनुकृष्यते। कालाध्वनोः। अन्तेविराममतिक्रान्तोऽत्यन्तः सचासौसंयोगो
निरन्तरसंनिकर्षइत्यर्थः। द्वितीयास्यादिति। श्रुतत्वात्कालाध्ववृत्तिभ्यामेव। मासस्येति। कृत्योर्थप्रयोगेकालेऽधिकरणइतिषष्ठीत्याहुः। तन्न। तत्रशेषग्रहणानुवृत्त्या
द्विरह्नोभोजनमितिकृदन्तेनसहसमासवृत्तेरेवफलत्वात्। तस्मादिहषष्ठीशेषइतिसूत्रेणैवषष्ठीतितत्त्वम्॥ इतिद्वितीया॥ स्वतन्त्रःकर्ता। प्रधानीभूतधात्वर्थप्र
तिआश्रयत्वंस्वातन्त्र्यम्। आहच। धातुनोक्तक्रियेतिस्वंकारकेकर्तृतेष्यतइति। साधकतमंकरणम्। प्रकृष्टेति। यद्व्यापारादनन्तरंक्रियानिष्पत्तिस्तत्प्रकृष्टम्। उ
क्तंच। क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्। विवक्ष्यतेयदायत्रकरणंतत्तदास्मृतमिति। विवक्षतइत्वनेनस्थाल्यादीनामपिवैवक्षिककरणत्वमस्तीति
ध्वनयति॥ ७ तस्मादिति। अन्तरङ्गत्वाच्चेत्यपिवोद्यम्। एतेनशेषग्रहणानुवृत्तौतेनैवेतिपरास्तम्॥ इतिद्वितीया॥ प्रधानीभूतेति। प्राधान्यंचकर्तृप्रत्य
यसमभिव्याहारेधात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयधात्वर्थत्वम्। धातुनोक्तक्रियेकारकेनित्यंकर्तृतेष्यतेइत्यन्वयः। यद्व्यापारादिति। अनन्तरशब्दयो
गेदूरान्तिकार्थैरितिसूत्रेणपञ्चमीयत्रनेषांकारकाणांमध्येइत्यर्थः॥

वस्तुतदृति।वस्तुनीत्यर्थः।सार्वविभक्तिकस्तसिः।तत्कर्तृत्वादिकमनिर्देश्यम्।इदंवस्तुकर्त्रैवेत्यादिक्रमेणनिर्देश्यमित्यर्थः।हियतोवस्तुनतत्तद्रूपेणव्यवस्थितम्।तामेवाव्यव
स्थान्दर्शयति।स्थाल्येत्यादि।कारकत्वमिति।विशेषणत्वादियथास्वञ्जकुञ्चादावव्यवस्थितम्।एवंकारकत्वेतद्व्याप्यमधिकरणत्वादिकंचेत्यर्थः।तण्डुलानोदनंपचतीत्य
त्रकारकस्यापितन्दुलस्यतण्डुलानामोदनंपचतीत्यादावोदनपदार्थान्वयेनषष्ठ्यन्ततादर्शनात्कारकत्वस्यचभिचारोद्रष्टव्यः।प्रकृतव्यक्त्युपात्तेति।प्रकृतधातुव्यक्तीत्य
र्थः।अनेकधात्वमेवदर्शयति।एवंचपचेरिति।तण्डुलधारणादिपरत्वेदृति।आदिनाआपाकस्थाग्निधारणम्।अवयवविभागादीति।आदिनारोटिकादावयवमेलनम्।न
आहच।वस्तुनस्तद्देनिर्देश्यंनहिवस्तुव्यवस्थितम्।स्थाल्यापच्यतइत्येषाविवक्षादश्यतेयतदृति।अयंभावः।कारकत्वंतद्व्याप्यकर्तृत्वादिषट्कंचवस्तुविशेषे
विशेषणविशेष्यभावबन्धव्यवस्थितंहिगौस्सर्वप्रतिगौरेवनतुकंचित्स्वस्मैगौरितिवत्।विशेषणंविशेषणमेवेतिसुवचम्।तथाचकथंचित्धातुव्य
क्त्याउपस्थापितेःर्थेकिंकर्त्रादिकमितिप्रश्नेप्रकृतव्यक्त्युपात्तव्यापाराश्रय तमाविवक्षितःकर्ता।व्यापारव्यधिकरणफलाश्रयःकर्म।कर्तृकर्मद्वारकसंबन्धेना
श्रयोधिकरणम्।पच्यर्थेव्यापाराश्रयेनेकधा।स्वंचपचेरधिश्रयणतण्डुलावपनेधोपकर्षणादितात्पर्यकत्वेतदाश्रयोदेवदत्तःकर्ता।ज्वलनतात्पर्यकत्वेरधाकर्त्ता
रः।तण्डुलधारणादिपरत्वेस्थालीकर्त्री।अवयवविभागादिपरत्वेतण्डुलाःकर्तारः।स्थाल्यापचतीत्यत्रतृतीयोपात्तव्यापाराश्रयोपिस्थालीकरणमेवनतुकर्त्री।देवदत्ता
दिव्यापारस्यैवतदुपात्तत्वात्।तथा।आदिस्वादिभ्यासुपात्तेर्थेप्रयोज्यःकर्ता।तस्मिन्नेवार्थेभस्यतिनोपात्तेकर्म।अधिपूर्वैःशीङादिभिरुपातेःर्थआधारःकर्मकेवलै
रुपात्तेअधिकरणमित्यादि ॥ तण्डुलाःकर्तारइति।कर्मकर्तरीत्यर्थः।संप्रदानापादानयोस्तुनकर्तृत्वविवक्षाशब्दशक्तिस्वाभाव्यात्तद्व्यापरेधातोरनुक्तेरितिबोद्धव्यम्।उपास्ते।उक्तैकदृत्य
र्थैः।स्वप्रकाशत्वे।ज्ञानविषयत्वे।कर्तृकर्मविरोधदृति।अभेदेआधाराधेयभावस्यविषयविषयिभावस्यचाभावादितिभावः।शब्दविशेषोपाधिकस्यशब्दविशेषनिमित्तकस्यक
र्तृकर्मशब्दयोराश्रयविषयोपलक्षकत्वे स्वप्रकाशत्वेदृत्यस्यस्वप्रकाशपदव्यवहार्यत्वेदृत्यर्थेवालक्षणेवदोषदृतिबोद्धव्यम् ॥

परेति।कर्मत्वाभिमतापेक्षयापरेत्यर्थः।गम्यादिकर्तृत्वेतिग्राप्तिवारणायेदम्।अपादानेदृति।प्रयागात्काशीगच्छतीत्यादेस्तस्यापिक्रियाजन्यविभागाश्रयत्वादितिभावः।धात्वर्थतावच्छेदकेति।संयोगस्यैवतथात्वेनतुविभागस्येतिभावः।तत्त्वेवेति।ण्यन्तधात्वर्थतावच्छेदकत्वेवेत्यर्थः।वचनबलात्।गत्यादिनियमबलात्।ननुविभागस्यतत्त्वेनकर्तुरितितथायुक्तमितिचन्नेतिअपादानप्रकरणेवद्व्यन्वयिनोविभागस्यधात्वर्थतायावश्यमाणत्वादित्यतआह।एकसञ्ज्ञेति।सावकाशादृति। विषंभुङ्क्ते दृत्यादौसावकाशमादृत्यर्थः।कर्तुरितिकर्मसञ्ज्ञयापा

एतेनज्ञानस्यस्वप्रकाशकत्वेकर्तृकर्मविरोधदृत्यादिपरास्तम्।शब्दविशेषोपाधिकस्यकर्तृत्वादेःप्रत्यक्षादौउक्तिसंभवाभावात्।एतेनपरसमवेतक्रियाजन्यफलशालित्वं कर्मत्वंचेत्।अपादानेऽतिव्याप्तिमाशङ्क्यधात्वर्थतावच्छेदकफलशालिकर्मेतिपरिष्कुर्वन्तोपिप्रयुक्ताः।ग्रामंगमयतिदेवदत्तमित्यादौगन्त्यर्थमात्रेः।तन्मतेगम नस्यप्रकृत्यर्थत्वेपित्याज्ञानवच्छेदकत्वात्तत्रणिजोव्यापारार्थकत्वंनप्रकृतेः।नसेवापाचयत्यादिप्रयोज्यकर्तृपतिमाप्तेः।तत्रपरिभाषिकमनुशासनोपयोगिकर्मत्वंवचनबलाद्व्यवस्थितमि तिचेत्।अपादानेपितर्हितिचास्तीत्यवधेहि।एकसञ्ज्ञाधिकारेऽनवकाशयासावकाशायाबाधात्।अतएवात्मानमात्मानेत्यादौपरयाकर्तृसञ्ज्ञयाकर्मसञ्ज्ञाबाधमा शङ्क्याहंकारादिविशिष्टात्मभेदमाश्रित्यसमाहितंभाष्ये।रामेणेति।इहयद्यपिविभक्त्युपस्थितानांकारकाणांक्रियांप्रतिविशेषणतैवतथापिकृदुपस्थितानांवि शेष्यतैव।सत्त्वप्रधानानिनामानीत्युक्तेः।धातूपस्थाप्ययोःफलव्यापारयोरपिकर्मकृत्समभिव्याहारेविशेषणविशेष्यभावव्यत्यासः।तथाचरामनिष्ठोयोव्यापा रस्तद्विषयीभूतबाणव्यापारसाध्यप्राणवियोगाश्रयोवालीतिवाक्यार्थः ॥

ञ्च दानसञ्ज्ञायाःपरत्वाद्बाधिका।अतएवग्रामंगच्छतीत्यादौद्वितीयासिद्धिरितितात्पर्य्यम्।अ पादाननिष्ठविभागीयसंबन्धस्यफलतानवच्छेदकत्वान्नदोषदृत्यपिवोद्यम्।अतएवाएकसञ्ज्ञाधिकारेसञ्ज्ञयोर्बाद्यबाधकभावादेव।अहंकारादीति।आदिनाशरीरम्।विभक्त्युपस्थि तानामिति।विभक्त्यर्थस्यसंसर्गतयैवेतदन्तोपस्थितानामित्यर्थः।व्यत्यासदृति।तद्व्यत्यासेनैवधातुतस्तदुपस्थितिरित्यर्थः।तत्रव्यापारजन्यफलमेवधात्वर्थदृतिभावः ॥

तदिष्टापनीति।तत्रकृत्यर्थक्रियायामधिकारकाणामन्वयादितिभावः।तत्रैवमानमाह।कर्त्रित्यादि।यत्तुभवतिक्रियायांप्राथमिकान्वयेनतत्तद्विभक्तीकृदन्तेनपार्श्विकान्वयात्तेषांवारितार्थ्यमिति।तन्नाभवतिक्रियायांकर्त्तृत्वेनान्वयेकर्तुरुक्तत्वात्तृतीयानापत्त्याहरिणात्रातइत्यसिद्ध्यापत्तेः।करणत्वेनान्वयेपार्श्विकस्यापिहरिकर्त्तृकत्राणकर्मणोबोधानापत्तेः।कर्तृतृतीयान्तेनसमासविधायकासंगतेश्च।यत्कर्त्तृककृतिकर्मविश्वमितिविग्रहवाक्यजबोधादिन्नबोधस्वीकारेनमानमतआह।अथषष्ठ्यर्थेति।आकृतीति।दृढंचयथायथंसर्वविभक्त्यपवादः।नाम्नेति।नामसंबन्धितीयन्तत्ववानित्यर्थः॥करणशब्दानुवृत्त्येति।एकसञ्ज्ञाधिकारेणचेतिबोद्यम्।ननुमनसादेवदृत्यसङ्गतंकृद्योगलक्षणषष्ठीप्राप्तेः।नचकर्तृयत्नवाजपेयाधिकरणेमीमांसकैरुक्तंकाष्ठैःपाचकइत्यपिस्यादितिवाच्यम्।कर्तृकरणेकृताबहुलंकर्तृकर्मणोःकृतीत्यादिसूत्राणांकृत्यकृत्यर्थेनकारकान्वयंविनोक्तिसंभवेस्वेवाभावादितिसुधीभिरालोचनीयम्।अनभिहितेकिम्।हरिःकरोतिजीवन्त्यनेनजीवनः।शाब्दिकःशब्दंदर्दुरंकरोतीतिठक्।कृतंविश्वंयेनकृतविश्वः।विश्वकर्मककृत्याश्रयइत्यर्थः।अषष्ठ्यर्थबहुव्रीहौसुत्यन्तरस्वीकारात्।यथाचैतत्तथावक्ष्यते।प्रकृत्यादिभ्यइति।आकृतिगणोयम्।तेननाम्नासुतीयन्तश्चरितेनदान्तइत्यादिबोद्यम्।द्वयोर्द्रोणयोःसमाहारःद्विद्रोणम्।पात्रादित्वात्क्लीबत्वाभावः।द्रोणद्वयसंबन्धिधान्यमित्यर्थः।चादितिकरणशब्दानुवृत्त्यापरिक्रयणेसंप्रदानमित्युत्तरसूत्रस्थान्यतरस्यांग्रहणापकर्षणेनवासञ्ज्ञयोःपर्यायेलब्धेसमावेशार्थश्चकारः।तेनमनसादेवदृत्यत्रकर्मण्यण्करणेतृतीयाचेत्युभयंसिद्ध्यतिमनसःसञ्ज्ञायामित्यलुक्।किंचासैर्देवयतेयज्ञदत्तेनेत्यत्रसकर्मकत्वाद्दणिकर्तुर्णौकर्मत्वेनाभणाद्यकर्मकादितिपरस्मैपदंचनेतिसिद्धान्तः॥ ॐ साहचर्यात्तत्रमुख्यव्यवहारेणधात्वर्थाश्रयस्यैवकर्मणोग्रहणम्।अतस्तोकंपाकइत्यादौषष्ठीनेतिवाच्यम्।धात्वर्थभेदेनान्वयिकर्मग्रहणेनैवतदुपपत्तावत्राप्रवृत्तौमानाभावात्।ध्वनितंचेदमाकडारसूत्रेकैयटे।तादृशसञ्ज्ञात्वेदृढतरमानाभावश्चेत्यरुचेराह।किंचेति।कर्मत्वेनेति।नचवैकल्पिकत्वेप्यत्यन्ताविद्यमानकत्वाभावात्कर्मत्वाभावःसिद्ध्दतिवाच्यम्।तत्रात्यन्ताविद्यमानकर्माणामेवग्रहणेमानाभावस्यात्रनिरूपितत्वादितिभावः॥

फलान्तरमाह। णाविति। दीव्यतैरैर्दत्तेनेनिभावेलकारोभावः फलमित्यपिबोद्यम्। करणत्वाच्चतृतीयेतिसमावेशाफलम्। द्वितीयेति। अक्षान्दीव्यतीत्यत्राक्षपदस्याक्षज्ञेयधनेलक्षण
नचतदाकरणत्वमक्षैरित्यर्थेक्षा नितिनभवतिद्वयन्ये। एकैवह्यत्रशक्तिरिति। द्विरूपत्वर्थनिरूपितसाधकतमत्वशक्तिरित्यर्थः। सहयुक्ते। अत्राप्राधान्येनामशब्दगुणाद्यन्वयित्वाभावद्त्या
ह। पितुरत्रेति। आर्यद्तिपुत्रसाहित्यवान्यिंताआगतदतिबोधेसाहित्यस्यपुत्रेणागमनसंबन्धएवसंभवद्तिपश्चान्मानसस्तत्संबन्धोपदर्शनिभावः। शब्दत्वंचविवक्षानिबन्धनमेवं
चैषुशब्दत्वरूपविशेषणाभावकृतोविशिष्टाभावः। सहेत्यपुत्रैर्दशभिः भारंवहतीत्यादौविद्यमानतावाचिसहशब्देनेकक्रियान्वयित्वरूपविशेष्याभावकृतोविशिष्टाभावोदशानांपुत्राणांवि
द्यमानत्वेपीत्यर्थद्त्यत्रविस्तरः। अन्तरङ्गत्वादिति। प्राचीनैरन्तरङ्गत्वमूलकतयोक्तादुपपदविभक्तेरितिन्यायादित्यर्थः॥ वस्तुतस्तुतद्वाचकमेवेत्यन्तरङ्गत्वंतन्न्यायोपलक्षणंवोद्यम्। प्रथमा
मनु प्राचा कर्मसञ्ज्ञावास्यादिनिञ्चारभ्यातमेतदाकरविरोधादपेक्ष्यमास्यादेतत्। करणसञ्ज्ञायाअवकाशःदेवनाअक्षाःकरणेत्युट्। कर्मसञ्ज्ञायास्तु दीव्यन्तेअक्षाःकर्मणिनट्। अक्षैर्दीव्य
तीत्यत्रतुसञ्ज्ञाद्वयप्रयुक्तकार्यद्वयप्रसङ्गेपरत्वात्तृतीयैवस्यान्नतुद्वितीयेतिचेत्। अत्राहुः। कार्यकालपक्षेकर्मणिद्वितीयेत्यत्रपरस्योपस्थानंतस्यान्यकार्यत्वाद्द्वितीयेति। ननुदीव्यन्तेअक्षा
द्त्यत्रकर्मण्यभिहितेपिकरणत्वस्यानभिधानात्तृतीयास्यात्। तथादेवनाअक्षाद्त्यत्रल्युटाकरणस्याभिधानेपिकर्मणोनभिधानात्द्वितीयास्यात्। मैवम्। एकैवह्यत्रशक्तिःसञ्ज्ञाद्वययोगि
नीतयाचरुभयत्राप्यभिधानमेवनतुनभिहितत्वमासहयुक्ते। पुत्रेणेति। पितुरत्रक्रियासंबन्धःशाब्दः। पुत्रस्तुआर्थद्तितस्याप्राधान्यम्। अप्रधानग्रहणंशक्यमकर्तुमानचैवंपितुरपित्
तीयापत्तिः। तत्प्रातिपदिकार्थमात्रेअन्तरङ्गत्वात्प्रथमोत्पत्तेः॥ ७ यात्रकारकविभक्तित्वमनभिहितपदेभाष्येबहुशःस्पष्टमस्यत्रप्रपञ्चितंच। अन्तरङ्गत्वंतुनयुक्तम्। षष्ठ्यपवादत्वमिवप्रथमापवादत्वस्याप्युपपदविभक्तीनामापत्तेः। अनन्तरस्येतिन्यायेनचप्रथमापवादत्वस्यैववापत्तेः। उपपदविभक्तेरितिन्यायेनचवाचनिकेसर्वतोबलवत्त्वेकारकविभक्तेर्वोपितेर्यौक्तेषषष्ठ्यपवादत्व
मुपपदविभक्तीनामवतिष्ठते। किंचउपपदविभक्तेःपदान्तरनिमित्तकत्ववत्कारकविभक्तेःक्रियानिमित्तकत्वात्तत्वंदुरुपपादमनचसंबन्धस्यक्रियाकारकभावमूलकत्वेनतत्प्रयुक्तकार्यं
बहिरङ्गपुत्रेपितृतीयानापनेरन्तरङ्गक्रियाकर्तृत्वमूलकत्वात्साहित्यस्याक्रियायाःप्राधान्यात्तन्निमित्तिकाविभक्तिःप्रबलेत्यपिनयुक्तम्। अप्रधानक्रियायामपिकारकान्वयदर्शनात्॥

सामान्यतएवषष्ठीसमासनिषेधयोः प्रवृत्तिरितिवेतण्डिकमतमभ्युपेत्याह । यद्वेति।सञ्ज्ञायामितिसमासइति।हलदन्तादित्यलुकृतुनालुकिसञ्ज्ञात्वभङ्गापत्तेः। कृतालुकः स ञ्ज्ञात्वेहितेनतस्यसाधुत्वान्व्याख्यानम्।अतएवरघुनाथदीक्षितेनसर्वनामानीत्यत्रनिपातनाच्छ्रुत्वाभावइत्यस्यत्वयमाशयः।स्यायत्तसञ्ज्ञाकरणेशास्त्रानुमतायाएवकर्त्तुमौचित्येना कृतणत्वस्यैवसञ्ज्ञात्वेनोच्चारणंतादृशस्यैवसाधुत्वार्थम्।तदुक्तम्।बाधकान्येवनिपातनानीतिसञ्ज्ञायांनहिजइत्यादितुनेष्यतएवअभिधानलक्षणाःकृतद्धितसमासाइत्यक दृतिद्वित्वचनविभज्येतिसूत्रेकैयटः।यद्वापुरुषेषूत्तमइतिनिर्द्धारणसप्तम्याःसञ्ज्ञायामितिसमासः।नचैवंननिर्द्धारणइतिव्यर्थम्।स्वरभेदात्।सप्तमीसमासेहिपूर्वपद प्रकृतिस्वरः।षष्ठीसमासेतुअन्तोदात्तत्वंस्यात्।पूरणगुणाअत्रप्राचोक्तम्।तदर्थैःषष्ठीनसमस्यतइति।तन्न्यूनम्।एवंहिसुहितान्नानामेवग्रहणंस्यात्।तावतामेवार्थशब्दे नसमस्तत्वादितिध्वनयन्नाह।सदादिभिरिति।अत्रव्याचख्युः।पूरणार्थशब्दःप्रत्ययएवगृह्यतेकृत्रिमेकार्यसंप्रत्ययादिति।तन्मन्दम्।नहिप्रत्ययविशेषाणांपूरणार्थत्वं दिगुभादित्वत्सञ्ज्ञासूत्रेलक्ष्यमस्तियेनोक्तपरिभाषावकाशमासादयेत्।कृतस्तर्हिपूरणप्रत्ययान्ताःषष्ठ्यादयएवेहगृह्यन्ते।ननुपूरणेमट्नादिशब्दादितिचेन्नोयेचेत्पूरणमि तिनिर्देशाद्विधेयेवहि।तेनकुम्भपूरणभवःपटुरुष्ट्रैरित्यादिसिद्धम्।कथंतर्हिनान्युक्तषष्ठाङ्गुलेरुतानीति।प्रमादएवायमित्येके।वस्तुतस्तुउञ्छेषुषष्ठःउञ्छषष्ठकः षष्ठइतिवाव्याख्ये यम्।अनपूरणेतिस्वर्यतेनेनाधिकारावगतिः।अयंतुभागार्थकात्प्रत्ययान्तइति।तन्न।अनुप्रत्ययान्तेचाविनिषेधस्यहितीयतृतीयेतिसूत्रेभाष्येएवस्पष्टत्वात्।अतएवमिश्राद्वितीय मित्यादावन्यतरस्याग्रहणंसामर्थ्यान्नसमासइतिनत्रोक्तम्।ननुब्राह्मणस्यभुक्तादित्यत्रसमासप्रसङ्गएवनास्ति।ब्राह्मणशब्दस्यदत्तेरेवान्वयात्।ब्राह्मणस्येदन्नंदत्तंभुक्तमितिदृत्यर्थो दत्तइत्यादेतिभुक्तशब्दएवहविशेष्यसमर्पकइतिभावः ॥

तदिदंचकारकेइत्यत्रभाष्येकैरितिदिक्। पूरणार्थत्वम्। तत्सञ्ज्ञकत्वम्। कृत्रिमाकृत्रिमन्यायस्यसञ्ज्ञाविषयत्वादितिभावः । —— उञ्छेषुइति।अधिकरणेसप्त मी।षादपूरणमितिनिर्देशेनपूरणेननिर्वृत्तेषष्ठ्यन्तसमासलाभायतेनकुम्भपूरणइत्यादिउञ्छेषष्ठेत्यादिचमिथूमित्यन्येभाष्येएवेतिन्यञ्चस्वरितत्वकल्पनंभाष्यविरुद्धमितिभावः ।

तन्स्थैश्चगुणैरिति।द्रव्यषष्ठीतिसूत्रेभाष्येतत्रगुणमात्रेनिष्ठन्तिवाचकतयानगुणिनितेनतत्स्थास्तैर्गुणैः गुणबोधकैः शब्दैरित्यर्थः।गन्धत्वेनेति।गन्धशब्देनेत्यादिः।गन्धशब्देनेनरूपे
णप्रतीयमानोगन्धः शुक्लादिशब्दाच्छुक्लगुणद्रवनगुणिसामानाधिकरण्येननहिशेषणतयाप्रतीयतेकिंतुस्वप्रधानःस्वनिष्ठविशेष्यतावानेवप्रतीयतइत्यर्थः।तात्स्थ्यमिति। गु
ण सामानाधिकरण्येनैवगुणवाचकत्वमित्यर्थः।अदर्शनादिति। गन्धंमालतीकुसुममित्यप्रयोगादित्यर्थः।नतत्स्थेति।घटः शुक्लद्रव्यादौगुणिसमानाधिकरणगुणस्यापि
चन्दनगन्धद्रव्यादौतुनिषेधेप्राप्तेतत्स्थैश्चगुणैरितिवचनेनसमासः प्रतिप्रसूयते।गन्धत्वेनहिप्रतीयमानेगन्धोनकदापिगुणिसमानाधिकरणः।किंतुस्वप्र
धानएवेदमेवतात्स्थ्यमनुवर्ततेजलमियंविनष्टिगन्धानितिप्रयोगादर्शनादुक्तमिदमितिचेन्न। तत्रहिगन्धानितिनगुणशब्दः मालतीकुसुमादिष
दर्शनात्।किंतुचन्दनजातिजातिनिमित्तोन्यएवसः।तस्माच्चन्दनगन्धद्रव्यत्रतत्स्थत्वंसुस्थमेव।एवंघटरूपमित्यादावपि।सुरभिशुक्लादयः शब्दा
स्तुनतत्स्थगुणप्रतिपादकाः।एवमपिशौक्ल्यसौरभादिभिः शब्दैः सहसमासोदुर्वारइतिचेन्नैवम्।तैर्हिशुक्लत्वादिप्रकारकएवगुणबोधः।तद्रूपवन्नां
द्रव्यसामानाधिकरण्यमस्त्येव।शुक्लःसुरभिरित्यादावितिदिक्।फलानामिति।करणस्यशेषत्वविवक्षायांषष्ठी।ब्राह्मणस्यकृत्वेति।तादर्थ्यरूपसंब
न्धसामान्यरूपेण विवक्षायांषष्ठी।ब्राह्मणसंबन्धेनोक्तक्रियातदनन्तरमित्यर्थः।इत्यादीति।तथाचभट्टिः।यत्कृतेरीप्सिगृह्णीमःआदेयाःकिंकृतेभो
गाःकुम्भकर्णत्वयाविनेत्यादि।अनेकमन्यपदार्थेद्रवतिसूत्रेसर्वपश्चादितिभाष्यप्रयोगादिहानुकूलः ॥ ॐ तैःप्रतिपादनादित्यर्थः। शौक्ल्येति।तैः सर्वदागु
ण्यसामानाधिकरण्येनैवगुणस्यप्रतिपादनादितिभावः।सामानाधिकरण्यमस्त्येवेति।गुणिसामानाधिकरण्येनप्रतिपादकशब्दावाच्यगुणवाचकत्वंतत्स्थत्वंचैवंशौक्ल्यादिशब्दस्ये
गुणिसामानाधिकरण्येनप्रतिपादकशुक्लादिशब्दवाच्यगुणवाचकत्वादितिदिक्।तादर्थ्यरूपसंबन्धस्येति।अतएवगुर्वर्थशब्दस्यगुरोरिद्मितिविग्रहप्रदर्शनेभाष्येसर्वपश्चादितिभाष्यप्रयोगोआद्यादित्वात्यञन्तात्तसोपपत्तौतद्योगेपञ्चमीकल्पनेमानाभावदतिभावः।भाष्यप्रयोगोपीति।प्रकृतसूत्रस्थभाष्यस्वरसोपीत्यस्याप्युपलक्षणमिदम् ॥

कैयटेति। उक्तमत्रारुचिबीजमूतत्वेनेति। यद्यपि शेषषष्ठ्यानत्वरभेदस्याधिकारकषष्ठ्यामस्त्येव समासनिषेधश्चाविशेषादुभयोरपीतिभावः। सतिसमासेइति। षष्ठ्यां सत्यां समासे
इत्यर्थः। षष्ठन्तत्वेनोभयोरपि प्रथमानिर्दिष्टत्वेनोपसर्जनत्वादितिभावः। पाठक्रमादर्थक्रमोबलीयानितिअप्रधानमुपसर्जनमित्यन्वर्थतामाश्रित्येत्येतत्तत्रषष्ठीसमासेपिसुवच
मित्रेत्युदाहृत्यव्याख्येयतेइति। पूर्वनिपातस्यव्याख्येयतेइत्यर्थः। तत्रेति। तद्व्यवस्थारूपंवस्तित्यर्थः। अप्रधानमुपसर्जनमित्यन्वर्थतामाश्रित्यषष्ठीसमासेपिसुवचमितियोजना
एवंचसाध्यभावेबाहुलकात्वीकार्यइतिभावः। तत्रकौण्डिन्येति। आसदित्यादाहरणंतु सम्बन्धइतिभूतेक्तइतिवाच्यमसुरासुरैः पूजितोस्तीत्यादेर्दोषात्। तेनेतीति। अन्यथावर्तमानेक्तप्रत्य
यस्यापि। कैयटहरदत्तौतुअव्ययप्रतिषेधेवृत्तस्योपरीत्युदाहरन्तौअकृदव्ययेनापिनिषेधमन्येते। स्वरेभेदइति। कृदुत्तरपदप्रकृतिस्वरेणतित्स्वरस्यैवावस्थानात्। अन्न
स्वरितइतेः। तत्रेनतुमद्योदात्तत्वंस्यादितिभावः। तक्तकस्येत्यादि। यत्तुप्राचामुदाहरणम्। राज्ञोनलस्येत्यादिचसमर्थेनसतिसमासेपूर्वनिपातानियमःस्यादितिशेषणसमास
स्तुस्यादेवेतिअत्रेदंबोध्यम्। विशेषणविशेष्यभावेकामचारादव्यवस्थायांप्राप्तायामप्रधानमुपसर्जनमित्यन्वर्थतामाश्रित्यद्रव्याश्रितत्वेनगुणादीनामप्राधान्याद्द्रव्यापेक्ष
यागुणादीनांविशेषणतेतिव्यवस्थेयतेतत्रषष्ठीसमासेपिसुवचमितिकिंतन्निषेधेनोक्तेनचपूजायाम्॥ पूजायाग्रहणमुपलक्षणमितिवाच्यम्। इष्टंतुद्वीतिभूतइतिनचवक्र
तौण्डिन्यन्यायेनभूतादिभ्यःक्तस्यवर्तमानकालोभूतकालतोबाधतइतिवाच्यम्। तेनेत्यधिकारेउपज्ञातइतिनिर्देशेनाबाधज्ञापनात्॥ ७ येक्तस्यचवर्तमानइतिकर्मणिषष्ठ्यादुवारत्वेनो
पज्ञातएवद्योगेतृतीयान्तत्वासंभवः। नचेयमर्थान्तरेतृतीयापूर्वोत्तरत्वेकर्तृतृतीयायाएवनिर्णयात्। सामान्यविषयकत्वंसैवेति। विधेयविषयएवसन्यायोनानुवाद्यविषयेइतिसामान्यतोज्ञा
प्यतइत्यर्थः। परेत्वाहुः। तक्तकौण्डिन्यन्यायेवर्तमानेक्तेनभूतेक्तोबाध्यतइतिवक्तुमयंयोग्ययतस्तक्तकौण्डिन्यन्यायोयेननाप्राप्तेइत्यनेनसमानविषयःनाप्राप्तेरधिकानेतक्तदानमारभ्यतेइ
तितेनयुक्तोदधिबाधः। प्रकृतेतुनसःअप्राप्तापामेवान्योपधावृद्धेश्चामादिवृद्धिरारभ्यतेसोभुतइत्यादावनोनतक्तकौण्डिन्यन्यायेनतयातयोर्बाधइतितद्धितेष्वचामितिसूत्रभाष्योक्तेः। अतोवर्तमा
नक्तस्यभूतक्तेनाप्राप्तेनारम्भात्वर्तमानत्वभूतत्वयोर्युगपद्विवक्षायाअसंभवात्। यत्तेदंनस्यात्वर्तमानेलट्स्यादितिततस्यैवायमपवादोन्यायेनानुभूतेक्तस्येतिदिक्॥

अनुन्यासकारदृति।मत्यादिसूत्रेकैयटोप्येवमाकारकषष्ठ्याएवेति।क्तादियोगेतस्याःप्रतिपदविहितत्वादितिभावः।एतेनेति।उक्तप्रकारद्वयेनेत्यर्थः।कथंतर्हीति।किमोत्यधिकरणमित्यर्थाभिप्रायेणप्रश्नः।त्यदादीतिकर्त्रर्थतृजकाभ्यांकर्मषष्ठ्येवसमासप्रतिषेधस्तेनेतिभावः।परिशेषितेनेति।कर्मातिरिक्तेनिषेधेनकर्मणिपरिशेषितेत्यर्थः।विधिरूपेणेति।अयमेवपक्षोयुक्तस्तत्रप्रपञ्चितमाउपरञ्जकत्वमात्रम्।बाधाभावेनसंभवमात्रम्।जयादित्यदृति।अनेनारुचिःसूचिता।तद्धीजंकर्मणिचेतिसूत्रस्थभाष्यविरोधेनत्वज्ञानार्थएवज्ञापकम्।पूजितोयैःसुरासुरैरित्यादिप्रयोगानुरोधेनसामान्यविषयकत्वेवन्याय्यत्वादित्यनुन्यासकारः।अन्येतुकारकषष्ठ्याएवसमासनिषेधोयम्।शेषषष्ठ्यानुसमासदृत्याहुः।एतेनकलहंसएममहितःकृतवानितिभट्टिप्रयोगोव्याख्यातः।दृदमेषामिति।क्तोधिकरणेचेतिक्तः।अधिकरणवाचिनश्चेतिकर्त्तरिषष्ठी।अधिकरणेचेत्येवसिद्धेसूत्रेयेषिग्रहणंस्पष्टार्थम्।कथंतर्हिकिंकृत्यंदृत्तमिति।नायमधिकरणेक्तः किंतुकर्त्तरि। किमाकृतंनिष्पन्नमित्यर्थे कर्मणिच। यद्यत्रयाकाचनकर्मणिषष्ठ्यागृह्येततर्हितृजकाभ्यांनिषेधोनर्थकःस्यात्।नह्यस्मादव्ययानामनेकार्थत्वादितीत्यर्थेचशब्दोयम्।तदाहकर्मणीतियाषष्ठीति।सप्रत्येकवचनान्तंपदमुद्धार्ययाषष्ठीविहितापरिशेषितावेत्यर्थः।नियमसूत्राणांविधिरूपेणनिषेधरूपेणवेतिहेधाप्रवृत्तेःस्वीकृतत्वात्तृजकाभ्यामुदकर्तरीत्यकस्यैवविशेषणमानतुतच्चःअव्यभिचारात्तथापिउपरञ्जकत्वमात्रमभिप्रेत्याह।कर्त्रर्थेतिजयादित्वस्तुकर्तृषष्ठ्यादृतिन्यायेनकर्त्रर्थदृतिकल्प्यंस्यात्।किंचकर्तृग्रहणंतृजकयोरेवविशेषणमितियुक्तंतयोःश्रुतत्वात्।नतुषष्ठ्यादृतिभावः।शेषषष्ठ्येति।केचित्तुजनिकर्तुःप्रकृतिस्तत्रयोजकोहेतुश्चेतिनिर्देशादनित्योयंनिषेधइत्याहुः।न्यासकारस्त्वाह।तन्नान्तमेतत् ॥

यैः।नत्रहिकर्मषष्ठीमात्रेणनिषेधेःस्वयैवपर्य्यालोचादितम्।आहुरितिअत्रारुचिर्बीजंतान्याभ्यांकारकषष्ठ्येवनिषेधदृतिप्रत्यासत्तिलभ्यार्थस्यैवज्ञापनमुचितम्।एतत्।त्रिभुवनविधातुरित्येतत्।सानुबन्धकस्येति।तस्यदितनेत्यावर्त्यदृतिभावः।मतान्तरेसानुबन्धनिर्देशःकर्त्तरीतिवत्स्यष्टार्थः।अन्यपक्षेत्वाहचर्यात्कर्त्रर्थकस्यैवग्र

अतएवेति। अन्यथानकर्मधारयान्मत्वर्थीयदर्शनेनेत्यनिहाकल्पनलाघवमूलकेनपसनस्यादितिभावः। अतएवाष्ठयुशब्दान्मत्वर्थीयेनेतिरक्षतदृतिसूत्रभाष्येउक्तंरूढ
लेंसुनदोषः। कर्मधारयान्मत्वर्थीयेकृतेऽर्थः प्रतीयतेतस्मिन्बहुव्रीहिणालभ्येहिलाघवचिन्तानास्त्येवेतितात्पर्यम्। कृसरसर्पवानिति। अत्रहिजातिविशेषवान्प्रतीयतेन
तयाप्रतीतिर्बहुव्रीहौ। सर्वधनीत्यादितुव्रीह्यादिपाठात्सिद्धएवअदण्डीअवाग्मीत्यादेर्मत्वर्थीयान्तेननञ्समासः बहुव्रीहिणादण्डसंयोगनिषेधस्यसम्यग्बहुभाषित

नलोकेतिषष्ठीनिषेधस्त्वनित्यः। अकाभ्यामितिवक्तव्येतुचः सामुच्चयकस्यग्रहणाज्ज्ञापकादिति। पूर्वापरा। एकदेशशब्दोऽवयवेरूढः। अतएवतत्सक
र्मधारयस्तेपितनोमत्वर्थीयः कृसरसर्पवान्वल्मीकदृतिवत्। यद्यपीहएकगोपूर्वादितिठञ्प्राप्तस्तथापिअतएवनिर्देशादिनिस्तदेतदाह। अवयविनेति। ननु
किमनेनसूत्रेणकर्मधारयेणैवपूर्वकायदृतिसेत्यति। गर्हुकायवत्। समुदायेवृत्ताःशब्दाःअवयवेष्वपिवर्तन्तेदृतिन्यायादतआह। षष्ठीत्यादि। नचैवंकाथपू
र्वदृत्यादिप्रयोगःस्यान्नवेसूत्रमितिभावः। नन्विहषष्ठीतुदुर्लभा। अन्यारादितिपञ्चमीप्रसङ्गात्। तत्रहिदिशिदृष्टःशब्दादिकृशब्दइतिन्यायेनसंप्रत्यदि
ग्वृत्तिष्वपियोगेपञ्चमीस्वीकृतेतिचेत्सत्यम्। अवयववृत्तिभिर्योगेषष्ठ्येवेष्यतेतत्परमार्डितमितिलिङ्गात्। पूर्वेनाभेरितिनाभेर्यः पूर्वोभागः संकायस्यावयवइत्यर्थः। ना
भेरितिदिग्योगलक्षणपञ्चमी। अत्रपूर्वस्यभागस्यनाभिरवधिः नत्वेकदेशिनी। अतोनाभ्यासहसमासोनेत्यर्थः। कायेनतुस्यादेवपूर्वकायोनाभेरिति। पूर्वशब्दस्यनित्यसापे
क्षत्वात्साभाव्याच्च ॥

॥ लनिषेधस्यचानवगमात्। असुब्वतोङ्गस्येतिप्रत्ययस्यात्सूत्रस्थभाष्यप्रयोगेणक्वचिल्लाघवानादरोपीत्यन्यत्। उर्ध्वावयवेकायशब्दप्रवृत्तौबीजमाह। समुदाय
इति। तथाचेति। इदंतत्सादृश्यानुसारेणसूत्राशयवर्णनमात्रम्। परवल्लिङ्गमितिसूत्रस्थभाष्यानुसत्यभिधानेषष्ठीसमाद्दृत्यतएवेति लभ्यतेतच्चोपरिष्टात्सुटीभविष्यति। नाभेर्यदृतिनाभ्यव
धिकदृत्यर्थस्तदाह। दिग्योगलक्षणेति। ननुपूर्वशब्दस्यनाभिसापेक्षत्वात्कथंसमासेतआह। पूर्वशब्दस्येति। प्राधान्याच्चेति। प्रधानस्यसापेक्षस्यापिवृत्तिरितिभावः ॥

समुदायेति। क्वात्रसमुदायावयव पूर्वदृतिवोक्तः। एकदेशिसमासंविनेति। लक्षणप्रतिपदोक्तपरिभाषयैकदेशपूर्वकत्वस्यैवतत्रग्रहणमितिभावः। दृतिवदृतिदृत्य
भिमानदृत्यर्थः। यथाश्रुतसूत्राशयवर्णनाभिप्रेतानां ज्ञापकवादिनामितिभावः। एतत्सूत्रप्रत्याख्यातभाष्यरीत्यातुतत्रलक्षणप्रतिपदोक्तपरिभाषायानप्रवृत्तिः। कर्मधार
येणैवसर्वप्रयोगसिद्धेः। तत्रैवार्थेचसाधुत्वेयथोत्तरंमुनीनांप्रामाण्यात्षष्ठीसमाससूत्रहिषयेनभिधानाद्दारणीयः। यद्देशएवसः ज्ञापकस्यचनोपयोगः। बहुधनयन्वस्यति
पूर्वस्कात्राणामिति। समुदायसमुदायिसंबन्धेषष्ठी। बहुवचनंतूद्भूतावयवभेदसमुदायविवक्षया। यथाक्वात्राणांपञ्चमदृति। तत्रस्कात्राणामे
कदेशित्वेसत्यपिएकत्वसंख्यावैशिष्ट्याभावान्नसमासः। सर्वोपीति। पूर्वादिभिन्नोपीत्यर्थः। ज्ञापकादिति। नह्यन्यथासायपूर्वत्वमहस्योपपद्यतेन
चोद्भूतावयवत्वमानाधिकरण्येननिर्वाहःशङ्क्यः। अहःसर्वैकदेशेत्यादिनाविहितस्यसमासान्तस्यचअह्नोह्न एतेभ्यदृत्यह्नादेशस्यचैकदेशिसमासंवि
नानुपपत्तेरिति भावः। दृत्याद्दरिति। नचैवंदिनमद्योरात्रिमद्येत्यादिनसिद्धेदितिवाच्यम्। ज्ञापकसिद्धस्यसार्वत्रिकत्वात्। यत्तुप्राचोक्तम्। सर्वेणैकदे
शेनाह्नःसमासदृतितन्नाएकदेशस्यतृतीयानिर्दिष्टस्यपरनिपातापत्तौधर्मिग्राहकमानविरोधात्। यदपिपाठान्तरम्। सर्वेणएकदेशिनाह्नदृति। तदपिनाअह्न
रेवह्नोकदेशिनचतेनैवतस्यसमासदृतिसंभवति। अर्द्धनपुंसकम्। नित्यंक्लीबदृति। अर्द्धमितिनिर्देशादेवक्लीबत्वेलब्धेनपुंसकग्रहणंनित्यनपुंसक त्वार्थमित्यर्थः। ख
ण्डमात्रवाचीतुत्रिलिङ्गः। भिन्नशकलखण्डेवापुंस्यर्द्धोर्द्धंसमेशकेदृत्यमरः। अत्रवापुंसीतिपूर्वोत्तराभ्यांसंबद्ध्यते। तत्रशकलखण्डेनिरूपभेदात्क्लीबत्वेनिर्णीतेवावचना
त्पुंस्त्वविकल्पेःस्त्रियामितिफलितम्। नचखण्डेदृतिस्त्रीलिङ्गनेवकिंनस्यादितिवाच्यम्। भिन्नलिङ्गानांनद्वन्द्वदृतितेनपरिभाषितत्वात्। शकलश्चास्त्रीतिनिर्देशेनैवनिर्णया
त्॥ ७॥ एषांप्रत्याख्यानमितिदिक्। निर्देशादेवेति। नचशब्दपरत्वेपितुर्यार्णातिवन्नपुंसकोच्चारणसत्त्वेनतेनक्लीबग्रहणसिद्धिरितिवाच्यम्। योगविभागपूर्वकमर्थ
मितिनिर्देशेनतल्लाभदृत्याशयात्। भिन्नलिङ्गत्वमुपपादयति। शकलश्चेति। निर्देशेनेति। शकलखण्डेदृतिनिर्देशेनेत्यर्थः॥

सम्येतदुक्तिः।तेनखण्डमित्यत्रापिनलिङ्गत्वंसिद्धम्।अतएवदन्तार्थमाख्यातमितमित्यादयःप्रयोगाउपपद्यन्ते।अवयववाचीपुल्लिङ्ग इतिभाष्यंतूपलक्षणमितिभावःअन्यैतुभाष्यानुरोधेनकोशेवापुंसीतिपूर्वंचखण्डेत्रदन्तार्थमित्यादौसमांशत्वारोपाभिप्रायेणपुंसकत्वम्।शरीरार्धंहरमितिवत्षष्ठीसमासः।स्त्रियांप्रयोगादर्शनाभावेत्याहुः।अर्द्धंपिप्पल्याइतिनञ्योक्तविग्रहेनिषेधमितिभावः।ननुपिप्पलीमांबहुत्वाद्बहुवचनंकुतोनेत्यतआह।परवदिति।विशेष्यैक्यादिति।अर्द्धस्यविशेष्यस्यैकत्वादित्यर्थः।मा

अर्द्धइतिरूपभेदात्पुंस्त्वावगतौसत्यामपिवापुंसीतिविकल्पेनाविशेषात्क्लीबपुंसकेलभ्येते।प्राग्वदिति।अवयविनासमस्यतेइत्यादीत्यर्थः।अर्द्धंपिप्पलीनामिति।इहार्द्धंपिप्पलीतिप्राप्तंपरवल्लिङ्गातिदेशेषिवचनातिदेशाभावात्।विशेष्यैक्याच्चेतिभावः।कथंतर्ह्यर्द्धंपिप्पल्यइति।अर्द्धानिपिप्पलीनामितिविग्रहेमाभूत्।खण्डसमुच्चयेतुभविष्यति।अर्द्धंपिप्पलीत्वार्द्धंपिप्पलीचेत्यादिविग्रहात्।एकदेशिनेतिकिम्।अर्द्धंपशोर्हरतस्वामीनत्वंवयतीतिनतेनसमासः।एतत्सूत्रंपरवल्लिङ्गमित्यत्रभाष्येप्रत्याख्यातम्।तथाहि।अर्द्धंपिप्पलीतिकर्मधारयेणसिद्धमसमुदायेदृष्टःशब्दाअवयवेपिवर्तन्तेइतिन्यायात्।समप्रविभागादन्यत्रहितार्थेनगतिः।अर्द्धाहारः।अर्द्धनरतीयम्।अर्द्धवैशसम्।अर्द्धोक्तमर्द्धविलोकितमित्यादिदर्शनात्।नचसमप्रविभागेषष्ठीसमासंबाधितुमिदंसूत्रमितिवाच्यम्।षष्ठीसमासस्यापीष्टत्वादिति।तथाचकालिदासः।प्रायुङ्क्त।प्रेमणाशरीरार्द्धहरांहरस्येति।द्वितीयतृतीयानिषेधंबाधित्वेति ॥

भूदिति।अवयविनैकत्वाभावादितिभावः।खण्डसमुच्चयेतितिएकशेषेणेतिभावः।एतत्सूत्रमिति।एतस्यैकदेशिसमासस्यविधायकंसूत्रमित्यर्थः।जातावेकवचनेनसूत्रत्वमित्यर्थः।अर्द्धपिप्पलीत्युदाहरणस्यैकदेशिसमासेनैवसंभवादितितन्नभाष्येऽनुक्तमात्।दृष्टत्वादितितथाचतत्रैवभाष्यम्।द्व्यतएवपिप्पल्यर्द्धमितीतिनपुंसकत्वेपिगरूपेतद्व्यवहारोपपत्तेरर्धपिप्पलित्यत्रैकदेशिसमासेनैवसंभवतीतिद्वितीयेतिसूत्रस्थंभाष्यमेकदेश्युक्तिरितिआहुः ॥

द्विगुप्राप्तेति। तद्विरुषतत्पुरुषेषु परवल्लिङ्गतानिषेधकम्। तत्पुरुषग्रहणप्रत्याख्यानेऽर्थादेव प्रत्याख्यातं नञ्तत्पुरुषेति भाष्यः। त्रिसूत्रीमिति। उक्तरीत्या तत्पुरुषे सिद्धे स्त्रियेत्यर्थः। एवं हि तत्र भाष्ये तत्पुरुषग्रहणं न करिष्यते एकदेशिग्रहणात्सिद्धम्। हूस्वैकदेशिनोरिति वक्ष्यामि। तदेकदेशिग्रहणं कर्तव्यं न कर्तव्यमिति। एवं समासो न [redacted] ते। कथमर्द्धपिप्पलीति समानाधिकरणे भविष्यति। अर्द्धं चासौ पिप्पली चेति। षष्ठीसमासोऽपि प्राप्नोति। दृश्यते एव षष्ठीसमासः। अपूपार्द्धं पिप्पल्यर्द्धमिति दृश्यते। भक्त्यादिषु स्त्रीलिङ्गैः

भाष्यकारस्तु परवल्लिङ्गमिति सूत्रे तत्पुरुषग्रहणं द्विगुप्राप्तेत्यादि वार्त्तिकं पूर्वापरेत्यादि त्रिसूत्रीं च प्रत्याचख्युः। तन्मते भिक्षाद्वितीयादिसिद्ध्ये पूरणे त्यादिनिषेधस्यानित्यत्वमाश्रयणीयम्। सङ्ख्याप्रमाणत्वादित्यादिनिर्देशान्नसामान्यापेक्षत्वापकात्। एवं सति तान्युञ्छषष्ठेत्यपि सिद्धम्। प्राप्तापन्ने। अत्र च कारेणविधेयसमुच्चयार्थेनाकारश्लेषानुमानात्। प्राप्तापन्नेसमस्येते। अत्र। अल्पं च तयोस्मादिति भाष्येस्थितम्। अत्र च कारात्पूर्वमेवाकारः किन्तासौ त्रत्वात्रकृतिभावेनेति प्राज्ञाः। इमं क्रेशं परिहरन्नाह। द्वितीयया अद्वति। प्राप्तास्त्रीति। एकादेशस्य पूर्वान्तत्वेन ग्रहणाल्लिङ्गविशिष्टपरिभाषयावा प्राप्तापन्नयोष्टाबन्तयोरपि समासः। कालाः परिमाणिना परिमीयते परिच्छिद्यते येनतत्परिमाणं परिच्छेदकं तद्वान्परिमाणी तदाह। परिच्छेद्यवाचिनेति। कालादिति। कालविशेषवाचकादित्यर्थः। कालसामान्यस्यापि परिच्छेदकत्वात्। मासोजातस्येति। षष्ठीसमासेप्राप्तेरिदं वचनम्। ननुजातः पुरुषस्यचूडस्तवित्रस्यादिकं परिच्छेदकं न कालस्तस्यकिमात्रपरिच्छेदकत्वादितिचेत्सत्यम्। साक्षात्क्रियांपरिच्छिन्दन्नपिकालस्तद्द्वारा देवदत्तंपरिच्छिनत्ति। मासंहिजननादूर्द्धंमासोगतः समासजात इतिव्यवह्रियते ॥

स्तुर्य्यादिशब्दैरनभिधानात्स मासएवनेतित्रैकदेशिसमासेचतुर्थीमिश्रेतिकर्मधारयेतुपुंस्त्वेचतुर्थमिश्रेतिभेदइतिनशङ्क्यम्। इत्यादीति। आदिनालोपेचैत्यादेः संग्रहः। इमंक्रेशमिति। नचात्रपक्षेतस्यमत्रहितप्राप्तापन्नाभ्यामन्वयबोधः सौत्रत्वकल्पनयेतिवाच्यं क्रेशलिप्सयभिमानात्। तद्वानिति। परिच्छेदस्यर्थः। तद्द्वारेति। तत्परिच्छिन्नक्रियमहिपुरुषस्यपरिच्छेदइत्यर्थः। तदाह। यस्यहीति ॥

परिच्छिन्नस्यैवेति।तावत्कालातीतजननाश्रयत्वेनेतिभावः।द्योतयितुंयस्यसदिति।गुणीभूतमपिपच्छब्दार्थंनच्छब्देनपरामृश्यतस्यमासजातपदप्रतिपाद्यतांप्रदर्शयन्
द्योतनमितिभावः।यस्यसमासजातपदार्थदृतिहिविग्रहवाक्यात्बोधः।मासजातोदृश्यतामित्यादौजातस्यैवदर्शनकर्मत्वादिप्रतीतेः।नत्वेतावताऽन्यपदार्थप्रधानेऽयमि
तिभ्रमःकार्यदृतिबोद्धव्यम्।नास्यप्रवेशदृतितत्रविशेष्यविशेषणभाववैषम्येनैकार्थीभावाऽयोगादितिभावः।व्यत्यासेनेति।जातपरिच्छेदकोमासदृतिवाक्यार्थोमासपरि

तत्रव्यवहारकालजननलक्षणयोरन्तरालभावीमासोजननद्वाराजातमपिपरिच्छिन्नस्येव।दृहविग्रहेषष्ठीनिर्दिष्टस्यापिवृत्तौप्राधान्यंद्योतयितुंयस्यस
दृत्युक्तम्।अलौकिकेतुप्रक्रियावाक्येनास्यप्रवेशः।एवंचबहुव्रीहावपि।एतावान्भेदोविशेषः।दृहजातशब्दात्षष्ठीचित्रगुरित्यादौतुद्वाभ्यामपिशब्दाभ्यां
प्रथमेवासमानाधिकरणाबहुव्रीहिरितिवक्ष्यमाणत्वात्।विशेषणविशेष्यभावव्यत्यासेनैकार्थीभावदृतितुल्यम्।यत्तुमीमांसकाश्चित्राणांगवामयमितिविगृ
हन्ति।तत्रेदंवक्तव्यम्।उक्तरीत्यावृत्तिवाक्ययोःकथंचित्प्रधानार्थसाम्यलाभेपिअषष्ठ्यर्थबहुव्रीहौपञ्चविधेपिकर्मकरणादिप्राधान्यस्याभिमतस्योक्तविग्रहाल्लाभा
दृत्तिवाक्ययोर्महान्विप्रकर्षःस्यात्।कृतविश्वःप्राप्तोदकोग्रामदृत्यादौकर्तृकर्मणोःसमासेनाभिहितत्वान्नकारकविभक्तिरित्यादिसिद्धान्तस्यनिर्विवादत्वा
त्।किंचालौकिकेप्रविष्टानामेवपश्चान्तरेपरिनिष्ठितानांलौकिकेपिप्रवेशसंभवेउपस्थितपरित्यागेनानुपस्थितकल्पनमन्याय्यमसांप्रदायिकंच ॥

च्छेदोजातदृतिवृत्त्यर्थदृतिभावः।विगृह्यन्तीति।वृत्तिविग्रहयोःप्रधानार्थसाम्यायेतिभावः।अषष्ठ्यर्थबहुव्रीहावित्यस्यविप्रकर्षःस्यादित्यनेनाप्यन्वयः।पञ्चविधेति।कर्मकरणसंप्र
दानापादानाधिकरणरूपे।तत्रप्राप्तस्योदकस्यायमितिविग्रहेपितत्कर्मत्वादिनाबोधात्।निर्विवादत्वादिति।त्वदीयानांन्यासकृदादीनांचेतिशेषः।किंचेति।षष्ठ्यन्तानान्तुना
लौकिकेप्रवेशःशेषदृत्युक्तेरिष्यतेऽनुपस्थितकल्पनम्।षष्ठ्यन्तकल्पनम्।असांप्रदायिकंचेति।सर्वादीनीतिसूत्रेसर्वआदिर्येषान्तानीतिभाष्येविग्रहप्रदर्शनादितिभावः ॥

पदान्तरेति। सदृत्येतदित्यर्थः। अतएवेत्यस्यदृढसम्मतदृत्यनेनान्वयः। प्राच्येन। सदृत्यतः पूर्वेण। चित्रागावो यस्येत्यादिना। अर्पिते। बोधिते। विषये। वाक्यार्थे। नतत्पटकेयच्छब्दे
र्थेतत्पदंदातुम्। तत्त्वदेनतंपरामृष्टुम्। वाक्यभेदेनेति। यस्यचित्रागावः सन्तिसचित्रगुपदवाच्योभवतीत्येवंवाक्यभेदेनेत्यर्थः। दृयंकारिकाग्रन्थकर्तुरेवास्त्वयतामिति। वा
क्येगवामेवप्राधान्यंवृत्तौतुसबन्धिनदृतिनास्त्येववाक्येनप्रधानार्थसाम्यमित्यर्थः। क्वचित्गुणेति। अर्थानांवृत्तिविग्रहयोर्गुणप्रधानत्वंसमानमितियत्तद्विवक्षितमितित
दर्थः। यतस्तद्धितार्थोपदर्शकेआख्यातेवृत्यपेक्षयागुणप्रधानभावस्यविपर्ययोवैपरीत्यंक्रियाप्रधानत्वादिरूपंदृष्टमित्यर्थः। तदाह। विग्रहवाक्यानीहेति। परेतुपाद
गोगुणप्रधानभावोर्थानांलोकेदृष्टःसक्वचिद्विवक्षितस्तद्धितार्थविग्रहवाक्येतिङन्तेलोकदृष्टस्यक्रियाप्रधानत्वस्यवैपरीत्यंकर्तृप्रधानत्वंदृश्यतइतिहरिश्लोकार्थः।
तदनुगुणतयैवपदान्तरपक्षेपगोरत्वंतुफलमुखत्वान्नदोषावहम्। अतएववाक्यार्थेतत्पदंदातुंप्राच्येनविषयोर्पिते। लौकिकोवाक्यभेदेनविग्रहोवृद्धसंमतः। अथवा
मास्तुतच्छब्दःप्रधानार्थसाम्यमपिऔत्सर्गिकमिहत्यज्यताम्। तथाचहरिणाक्वचिद्गुणप्रधानत्वमर्थानामविवक्षितमित्युपक्रम्य। आख्यातेतद्धितार्थेस्वयंक्वचिदुपदर्शक
म्। गुणप्रधानभावस्यतत्रदृष्टोविपर्ययदृत्युक्तम्। तद्धितग्रहणंकृतामप्युपलक्षणम्। तेनआसिकः वैयाकरणः पाचकदृध्मप्रवृश्चनःदृत्यादीनां विग्रहवाक्यानीहो
दाहरणम्। स्यादेतत्॥ ॥ तद्धितेत्युपलक्षणंवृत्तिमात्रस्यैवंचवृत्तिसमानार्थकमेवतदर्थबोधकत्वेनदृश्यमानंवाक्यमितिभावः। तदेवप्राधान्यंतच्छब्देनदर्श्यतेतच्चस
र्वनाम्नामुत्सर्गतःप्रधानपरामर्शकत्वात्तच्छब्देनदर्शितंभवति। चित्रगोसंबन्धीयःसचित्रगुपदवाच्यदृत्यर्थादतएवतद्वहतीतिसूत्रेभाष्येतत्सेदमित्येवसिद्धेदृदंव्यर्थमित्या
शङ्क्यवहतिवोढेतिशब्दस्यभेदान्नतेनविधिरित्युक्तेशब्दभेदेप्यर्थसामान्यात्सिद्धम्। यएवार्थोरथंवहतीतिसएवरथस्यवोढेतीत्युक्तम्। तत्रशब्दभेदादित्यस्यवहतीतिक्रि
याप्रधानंवोढेतिकर्तृप्रधानमित्यर्थः। अर्थसामान्यादित्यस्यवृत्त्यर्थोपदर्शकेवहतीत्यत्रापिविशेषणविशेष्यभावव्यत्यासाद्वहनकर्तेत्येवार्थदृत्यर्थः। वर्त्तमानकालश्चा
विवक्षितः। एवमन्यत्रापूह्यम्। कालःपरिमाणिनेतिसूत्रेभाष्येपिस्फुटमिदंसूक्ष्मदृशामित्याहुः ॥

हेतुकहिम्बिति।तद्धितार्थोत्तरपदेतिबिहितेत्यर्थः।वार्निकेउत्तरपदेनेतिहेतौतृतीयेतिभावः।नियमभङ्गेनेति।दृदञ्चकैयटानुरोधेन।यद्वाएतत्साधारण्येतदञ्चय
द्वारैवतत्क्रियान्वयदृतिशौण्डादेरस्तिक्रियाचयेनतद्वारातदन्विताप्तस्यापितदन्वयदृतिप्रकारान्तरेणापितदभङ्गसम्यवानद्धर्भावेनमानम्।अलंकुशलद्
त्यादौतत्सक्तत्वाद्यप्रतीतेश्चेत्यर्थः।आधेयप्रधानदृति।अधिशब्दस्याधिकरणवृत्तिरित्यर्थः।ईश्वराधीनदृत्यत्रेश्वररूपाधिकरणवृत्तिरित्यर्थः।स्पष्टंचेदंखविधाय

चित्रगुर्दण्डीतिरूपासतद्धितस्योरलौकिकेप्रक्रियावाक्येपिचचित्रागोर्दण्डः एतेशब्दाः षष्ठ्यन्तास्त्रयेति मीमांसकाशयदृतिचैवमेव म्।शेषोबहुव्रीहिःत्रिकतः
शेषःअस्तिसामानाधिकरण्येमतुप्।समर्थानांप्रथमादित्यादिसूत्रभाष्यविरोधेनवृत्तेरेवतत्रदुर्लभत्वादितिदिक्।प्रकृतमनुसरामः।उत्तरपदेनेति।परिमाण्यु
त्तरपदहेतुकहिगुसिद्धयेबहूनांतत्पुरुषोवक्तव्यदृत्यर्थः।सुप्सुपेत्येकत्वस्यविवक्षितत्वाद्प्राप्तेवचनम्।अद्वादेशदृति।त्रिपदस्तत्पुरुषानन्तरमुत्तरपदेप
रतोःवान्तरहिगौस्त्रीतिभावः।सप्तमीशौण्डैः।बहुवचननिर्देशाद्गुणपाठसामर्थ्याच्चाद्यर्थीवरातिरित्यभिप्रेत्याह।शौण्डादिभिरिति।शौण्डः प्रवीणःइ
दृतिआसक्तिरूपाक्रियावृत्तावन्तर्भवतितद्वारकंचसामर्थ्यम्।यथादद्योदनंगुडधानादौ।तेनकारकाणांक्रिययेवसंबन्धदृतिनियमस्यभङ्गेनेतिबोद्धम्।अधिशब्द
दृति।आधेयप्रधानदृतिशेषः।अधिकरणप्रधानस्यतुअव्ययीभावस्वअधिहरीतियथाअन्तःशब्दोप्यन्नपठतेसचाधिकरणप्रधानःमद्धेदृत्यर्थात्तद्योगेऽवयविन
आधारत्वविवक्षायांसप्तमीयंवृक्षेशाखेति।वनेन्तःवनान्तर्वसति।वस्तुअधिकरणत्वमात्रवृत्तिरन्तःशब्दस्तस्यविभक्त्यर्थस्त्वव्ययीभावोनित्यसमासः।प्रनिरन्तरिति
णत्वमतर्वणम्॥

केभाष्येअधिकरणप्रधानस्येति।अधिकरणशक्तिमात्रबोधकस्येत्यर्थः।अधिकरणप्रधानदृति।मद्धगताधिकरणत्वशक्तिप्रधानदृत्यर्थः।तदाह।
मध्येदृत्यर्थादिति।वनेःन्तरिति।वनवृत्तिमद्धभागेदृतिबोधः।अधिकरणत्वमात्रेति।नतुमध्यालिङ्गितत्वदृतिरित्यर्थः॥

असङ्गतेरिति। अव्ययीभावनित्यत्वेनव्यपेक्षायास्तत्रासम्भवादितिभावः। अन्यथा। अतोधिकार्यतनिताप्यव्ययीभावस्वीकारे। अतिप्रसङ्गाच्चेति। चोहेतौ। अन्यथाऽन्यथेतिपदोपात्तसाद्ये
हेत्वन्तराकथनेनतदसङ्गतिः स्पष्टैव। अवयविनइति। स्त्रीत्वामद्यगताधारत्ववचनत्वेपिवनगताधारत्ववाचकत्वंनतस्येतिभावः। अधिकरणप्रधानइति। शक्तिमत्प्रधानइत्य
यत्तुहरदत्तेनोक्तम्। तत्पुरुषस्यैवैकल्पिकत्वात्यक्षेःव्ययीभावइति। तच्चिन्त्यम्। तत्पुरुषस्यैवैकल्पिकत्वेपिअव्ययीभावस्यनित्यत्वाद्वनेअन्तरितित्वदुक्तविग्र
हस्यैवासंगतेः। किंचविभक्त्यर्थमात्रवृत्तेरव्ययीभावोवचनग्रहणसामर्थ्यात्। अन्यथावृक्षस्योपरीत्यादावतिप्रसङ्गात्। तत्कथंमद्यवाचिनःप्रसङ्गः। किंचप्र
क्रियावाक्यान्तर्गतविभक्त्यर्थवृत्तेरेवाव्ययस्यसमासःसन्निधानात्। तन्नाप्यर्थादेतिपदेनाभिहितेपिसप्तमीतिस्थितम्। नचैतदिहास्ति। अवयविनआधारत्वविव
क्षायांसप्तमीतित्वयैवोक्तत्वादितिदिक्। यदप्याहुः। अन्तःशब्दोधिकरणप्रधानः तत्सामानाधिकरण्याद्वनात्सप्तमीवनरूपेमद्येवृत्त्यर्थात्। वनेऽन्तर्वनान्तर्वस
ति। पूर्वपदार्थप्राधान्येतुअव्ययीभावः वनस्यान्तरन्तर्वणमिति। अत्रेदंवक्तव्यम्। सामानाधिकरण्येसप्तमीत्यसंगतंव्यधिकरणसमासप्रकरणात्। विशेष
णंविशेष्येणेत्यनेनागतार्थत्वात्। किंचमद्यवाचिनाव्ययीभावोदुर्लभः। लक्षणाभावात्। अथाव्ययमितियोगविभागेनकथंचित्उपपत्तिंवूषेअपदिशमि
तियथा। तर्हिसप्तमेवेहापिनित्यसमासत्वादविग्रहत्वंस्यात्। तथाचवनस्यान्तरितित्वदुक्तिर्विरुद्धेत। दिक्शब्देसंज्ञायाम्। नियमार्थमिति। कथंनर्द्धित्रिलोक
नाथेनसतांमरवद्विषद्भतिकालिदासः। त्रिलोकशब्दस्यासंज्ञात्वान्नचसमाहारेद्विगुः। द्विगोरितिङीपप्रसङ्गात्। नचपात्रादित्वंकल्प्यम्। यदित्रिलोकीगण
नापरास्यादितिप्रयोगविरोधात्। नचोनरपदइतिसमासः। त्रिपदतत्पुरुषस्येहदुर्लभत्वात्। अत्रोच्यते। लोकशब्दोत्रलोकसमुदायपरः। अवयवोलोक
स्त्रिलोकः ॥ ॐ ॥ र्थः। असङ्गतेमिति। विशेषणसमासेनैवगतार्थत्वात्तदाह। व्यधिकरणेति। एवंचैतत्सकरणेतथार्थकथनमनुचितमितिभा
वः। इह। शास्त्रे। दुर्लभत्वादिति। सुप्सुपेतिउक्तेरितिभावः ॥

शाकपार्थिवादिरिति।नचकैयटोक्ततत्प्रत्याख्यानेदोषः।शाकप्रियपार्थिवद्त्यादिवारणापतद्ग्रहनस्यावश्यकत्वेनकैयटोक्ततत्प्रत्याख्यानस्यासङ्गतत्वादितिभावः।तद्ध्वनयन्भाष्यकृदाह।एतच्चे
ति।भाष्यएवेति।तत्रहित्रैविद्यद्त्यर्थेत्रय्यवर्थेत्रैविद्यामधीतेद्तिविग्रहद्त्युक्तम्।एतेनेतिनवरसरुचिरामित्यस्यनवावयवकरससमूहेनरुचिरामित्यर्थद्तिभावः।एकापिसप्तमीति।एको
च्चारणविषयापिसप्तमीतन्त्रेणोच्चारणाद्द्वियतद्त्यर्थः।द्वन्द्वसाधुत्वंतुसौत्रत्वात्।स्पष्टंचेद्मादेशप्रत्यययोरितिसूत्रेमूले।विषयेद्ति।अतएवपौर्वशालद्त्यादौतद्धितोत्पत्तिः।
अन्यथाउक्तार्थानामप्रयोगद्तिनस्यादितिभावः।प्रतिपदोक्तित्वादिति।निरवकाशत्वाभावेपिप्रतिपदोक्तत्वेनशीघ्रोपस्थितिकत्वाद्न्याय्यमितिभावः।प्राचांग्रन्थमिति।भाष्यग्रन्थ
शाकपार्थिवादिः।एतच्चद्विगोर्लुगनपत्यद्तिसूत्रेभाष्यएवस्पष्टम्।एतेननवरसरुचिरामित्यादिव्याख्यातम्।नद्वितार्थो।एकासप्तमीविषयभेदाद्भिद्यतेद्त्याश
येनाह।तद्वितार्थेविषयेद्त्यादि।सर्वनाम्नंद्ति।एतच्चपूर्वापरोदाहरणान्वपि।यद्यपिस्त्रियाःपुंवदित्यनेनापिप्रकृतेर्निर्वाहःसिद्धस्तथापिदक्षिणपूर्वेत्यादिसि
त्यर्थंसर्वनाम्नद्त्यावश्यकंप्रतिपदोक्तत्वादिहापिन्याय्यमितिभावः।षण्मातुरद्ति।मातुरुत्संख्येत्युत्।अनपत्यद्त्युक्तेर्द्विगोर्लुगितिलुग्।विकल्पेप्राप्तद्ति
प्राचांग्रन्थमनुसृत्योक्तम्।वस्तुतस्तुत्रयाणांसमासेकृतेऽन्यपदार्थोपसंक्रमेणपरस्परसंबन्धाभावाद्द्वन्द्वतत्पुरुषयोरप्राप्तौसत्यांवचनमितिद्वैयम्।तत्रत्रद्वि
तार्थेतिसूत्रोणोत्तरपदेपरेनस्पुरुषोवचनसामर्थ्यात्सिद्धः।एकार्थीभावसत्त्वादेवनित्यतापिसिद्धा।नहिमहाविभाषापिसत्येकार्थीभावेसञ्ज्ञायाविकल्पिका।नच
सञ्ज्ञायाभावाभावाविष्येतेद्तिभाष्यविरोधात्किंतुवैकल्पिकेकार्थीभावविषयेनित्यैवतत्सञ्ज्ञा।दृढंतुवैकल्पिकत्वंशेषाधितः ॥ ७ ॥ मित्यर्थः।परस्परसंबन्धा
भावादिति।निरूप्यपञ्चगोपदमात्रयोः परस्परंसामानाधिकरण्याभावाच्चत्रोपानहस्चार्थमात्रेवृत्त्यसम्भवादित्यर्थः।अन्यथापञ्चगोधनपदानांपरस्परंविशेष्यविशेषणभावपूर्व
कमेवान्यपदार्थोपसंक्रमाच्चत्रोपानहप्रियद्त्यत्रसमूहबोधपूर्वकमेवतदपसंक्रमात्तदसङ्गतिःस्पष्टैव।वचनसामर्थ्यादिति।तत्सामर्थ्याद्भूतपूर्वसामानाधिकरण्यमाश्रित्ये
त्यर्थः। बाधितद्ति।त्रयाणामेकार्थीभावेद्वयोर्व्यपेक्षायादुर्लभत्वात्।महाविभाषद्त्यपेक्षायाएवपक्षेबोधिकेनिभावः ॥

ज्ञापकसिद्धेति।वचनसामर्थ्यसिद्धतत्पुरुषस्यन्यायसिद्धनित्यत्वरूपार्थस्यचानुवादमात्रमितिभावः।ज्ञापकशब्दोबोधकपरः।अतएवेति।वार्तिकस्थतत्पुरुषपदस्यसूत्रसिद्ध्यर्थानुवादकत्वादेवेत्यर्थः।त्रिपदेहिबहुव्रीहौखादिरीपदस्योत्तरपदत्वाभावात्पुवत्त्वंनस्यात्।वार्तिकस्यापूर्वत्वेहिश्म्यारूपेउत्तरपरेपूर्वयोस्तत्पुरुषेपुंवत्कर्मधारयेत्यनेनपुंवत्त्वंसिद्धमेवेतितदाश्रयणंव्यर्थस्यादितिभावः।पूर्वनिपातेति।त्रिपदेबहुव्रीहावितरशब्दस्यसर्वनामत्वात्पूर्वनिपातःस्यादितिभावः।नचैवंपूर्वनिपातव्यावृत्तयेतदाश्रयणस्यावश्यकत्वेकथंपूर्वकृतार्थसाधकत्वेनास्यकैयटस्योपन्यासइतिवाच्यम्।तपरइत्यादिनिर्देशेस्तत्पूर्वनिपातस्यानित्यत्वेनापितत्सिद्धिरितिपुंवत्त्वमेवमुख्यंफलमित्याशयात्।कर्मधारयपूर्वपदकबहुव्रीहौतुतस्यविशेषणत्वेनपूर्वनिपातापत्तेःसनकृतः।सूत्रार्थानुवादकत्वेतुनात्रनत्राप्तिः।दिक्संख्ययोरभावात्।अतएवेति।ज्ञापकसिद्ध्यर्थानुवादत्वादेवेत्यर्थः॥

एवंचवार्तिकेतत्पुरुषइत्यंशोज्ञापकसिद्ध्यर्थानुवादमात्रम्।अतएवखादिरेतरशब्दमितिकर्मधारयोत्तरपदोबहुव्रीहिर्नतुत्रिपदइतिसमर्थसूत्रेकैयटोक्तंसङ्गच्छतेपुंवद्भावंपूर्वनिपातयोःसिद्धयेहितथोक्तम्।अतएवचित्राजरद्गुरितिसङ्गच्छते।पूर्वकालैकेत्यादेर्जरद्गवादौकृतार्थतयाभूतपूर्वगत्याप्रवृत्तेरयोगादितिदिक् ॥

ॐ अन्यथाचित्राशब्देपुंवत्त्वापत्तिरितिभावः।ननुभौतपूर्विकंसामानाधिकरण्ययामादायद्विगुवत्पूर्वकालैकेत्यपिदुर्वारमितिचेदुर्वारोऽतआह।पूर्वकालैकेति।तस्यसामर्थ्यात्प्रवृत्तावप्यस्यप्रवृत्तौमानाभावः इतिभावः।दिगर्थस्तुयदिसामानाधिकरण्यमात्रेनियामकंनतुनिष्कृष्यतयोरेवेत्याग्रह एवमेकार्थीभावमात्रमपेक्षितंननुनिष्कृष्येत्याग्रहः।अतएवयेनविधिरितिसूत्रेभाष्येप्रसज्यग्रहणेयस्मात्सविहितदत्स्यपरमगार्ग्यायणसिद्धिः प्रयोजनमुक्तम्।किंचैवंप्राचीशालाप्रियायस्यप्राक्शालाप्रियइत्यादौसामानाधिकरण्यनिबन्धनपुंवत्त्वासिद्धिः।पुंवत्त्वेयथाकथंचित्सामानाधिकरण्येनिमित्तम्।कर्मधारयेतुनिष्कृष्येत्यत्रमानाभावात्।तथाचार्थवृत्तिताद्रूप्येनियामिकानतुतन्मात्रवृत्तिना।अतिप्रसङ्गस्त्वनभिधानाद्वारणीयः।अतएवभाष्येसंपूर्णवचनमेवप्रत्याख्यातमित्युक्तेतदामूलसम्मतमेवेति ॥

वाग्दृषदप्रियदृतिअत्रवाग्दृषदोःसामान्याधिकरण्याभावेपिप्रियशब्देनतयोः सामानाधिकरण्यात्बहुव्रीहिर्निर्बाधः।पूर्वनन्येजैमिनीयेबाधलक्षणेदशमाध्याये।षष्ठ्यः षडहोदादशा
हेउत्पन्नासत्राहः क्रमेणरथन्तरबृहद्रूपवैराजशाक्वरैवतानिसामानिगवामयनेषष्ठ्यः षडहदत्यादिवाक्यम्।द्वन्द्वैकत्वेति।बृहद्रथन्तरेसामनीयस्येत्यर्थः।नेहद्वन्द्वइति।किंतुत्रि
पदबहुव्रीहिरेवेत्यर्थः।स्वरेविशेषस्येति।त्रिपदबहुव्रीहौपूर्वपदप्रकृतिस्वरेणबृहत्सदस्वरः।उत्तरपदेपरतोद्वन्द्वेतुसतिशिष्टद्वन्द्वस्वरेणबृहद्रथन्तरेत्यन्तोदानमितिस्वरेविशेषः।स्व
रविशेषेप्यस्यप्रवृत्तिरितिसमर्थसूत्रशेषेभाष्येस्पष्टम्।तत्रैवहेतुमाह।नित्येतिचोहेतौ।संकोचेसमासान्तमात्रकृतविशेषविषयत्वे।नचात्रद्वन्द्वेपूर्वपदस्वरःसुउ
द्वन्द्वस्योदाहरणंवाक्यंचपत्रप्रियेअस्यवाग्दृषदप्रियः।कूपोपागृहप्रियः।दृहत्रिपदेबहुव्रीहौकृतेपूर्वपदान्तोदात्तनिमित्तंनास्तीतिनित्यद्वन्द्वः।तेनसमासान्तष्टजपिनित्यएवाय
नुपूर्वतन्त्रेबाधलक्षणेषष्ठस्ययुगपद्विधेरेकादयद्विमात्रमित्यधिकरणेषष्ठ्यः षडहोबृहद्रथन्तरसामाकार्यदृश्यदाहृत्यद्वन्द्वंकृत्वाबहुव्रीहिरितिपूर्वप
दस्वरंचपित्वातन्त्रोपस्थमकृतयाकात्यायनवचनमिदमुपन्यस्तम्।यच्चनेहद्वन्द्वइतिसिद्धान्तयित्वाकात्यायनवचनंतुसमासान्तकृतविशेषमात्रविषयमित्युक्त
म्।तदुभयमपिचिन्त्यम्।उत्तरपदेदृश्यंकेद्वन्द्वंकृत्वेत्यस्यासङ्गतेः।स्वरेविशेषस्यस्पष्टतयासमासान्तपर्यन्तमाग्रहेबीजाभावाच्च।नित्यसमासवचनमितिवा
र्तिकस्यसंकोचेप्रमाणाभावाच्च।संख्यापूर्वोद्विगुः।अत्रोक्तइति।अयंभावः।पूर्वसूत्रविषयएवेयंसंज्ञानन्तरस्येतिन्यायात् ॥
भयोरनुष्ठानापत्तिः।एकस्मिन्नेकमितरस्मिन्नितरदितिह्यनुष्ठानेसिद्धान्तेदृश्यतेइतिवाच्यम्।षडहोपेक्षयेतरेतरयोगोनतद्वयवापेक्षयेत्यदोषात्।केषुचिद्ग्रहःसुप्तेन
केषुचित्तैलेनभोजनेपिमासंधृततैलाभ्यांभोजयिष्यमितिवत्।यदिनुनौष्टत्यदस्वरस्यबृहद्रथन्तरसासेत्यत्रश्रूयते।तदाछान्दसत्वात्त्रिपदेबहुव्रीहौद्वन्द्वेनेति
कल्प्यम्।यदाचार्थीभावेणैकार्थीभावस्तदाहिद्वन्द्वस्यनित्यसमासार्थिकसंमता।यदातुतदनन्तर्भावेणैकार्थीभावस्तदाद्वन्द्वाप्राप्त्यात्रिपदोनिर्बाधएवेत्यन्ये ॥

स्वरेणसंभवतीति। तत्रदिक्संख्येसंज्ञायामितिसमासेनद्विगुत्वाभावादिनिभाक्। एवमेवेति। पूर्वनिपातार्थत्वमेवेत्यर्थः। शब्दप्रवृत्तिनिमित्तेनेति। वैयाकरणत्वादित्यर्थः। पापाणकेति। अत्रापिसूत्रेकुत्सितशब्दःकुत्स्यमानपरः। अतएव। पूर्वपदस्यसदृशत्वाल्लक्षणिकत्वादेव। नचदर्शनीयायामातादर्शनीयामातेत्यत्रापिद्वयोरेकविशेष्यकप्रतीतिजनक

एतदर्थमेवहितत्रयोगविभागः कृतः। अन्यथादिक्संख्येसंज्ञातद्धितार्थोतरपदसमाहारदत्येवब्रूयात्। तेनसप्तक्रुष्णयदत्यत्रद्गन्तकालेतिपूर्वपदप्रकृतिस्वरोन भवतिकिंतुसमासान्तोदात्तएव। तथाचलक्षंसप्तक्रुष्णयस्तपसेयेनिषेदुःसप्तक्रुष्णांसुकृतांयत्रलोकइत्यादि। सनपुंसकमिति। एतच्चमूलेएवव्याख्यास्यते। कुत्सि तानिकुत्सनैः। कुत्सअवक्षेपणे। मत्वादिसूत्रेचकारस्यानुक्तसमुच्चयार्थत्वात्वर्तमानेक्तदत्याशयेनाह। कुत्स्यमानानीति। तदर्थकानीत्यर्थः। वैयाकरणवस्तूचिमिति। सूचयतेरवद्यः। चःपूतःसन्प्रश्नविस्तारयितुंस्वंसूचयति। अहोनिर्मलंगगनमितिसएवमुच्यते। दुर्दुरूढदति। डुलउत्क्षेपे। दुःपूर्वः। औणादिकःकूटप्रत्ययः। बहुलमन्यत्रा पीतिणिलुक्। रलयोरेकविषयत्वस्मरणात्दुः। विशेष्यस्यपूर्वनिपातार्थसूत्रम्। प्रायेणायेप्येवमेवशब्दप्रवृत्तिनिमित्तकुत्सायामेवायम्। संनिधानात्तेनेहनासीमांसकोद रिदुः। पूर्वसूत्रेति। पापाणकशब्दोकुत्सनाभिधायिनातयोः पूर्वसूत्रेणससासेसतिपरनिपातःस्यात्। तस्मात्पूर्वनिपातार्थमिदंसूत्रमितिभावः। लाक्षणिकमिति। अतएवसामा नाधिकरण्यात्मृगीवचपलामृगचपलेत्यादौपुंवद्भावः। उत्तरपदोपस्थितस्यामत्वचापलादिद्वारकमेवेहसादृश्यंगृह्यतेसंनिधानात्। वागर्थाविवेत्यादावपिहिसंनिहितस ङ्कीदिद्वारकमेवसादृश्यंप्रतीयते। कथंतर्हिउपमानपरनेतिचेत्। भूतपूर्वमत्वाश्वकार्थमादायेत्यवेहि। सामान्यवचनत्वंचोपमानोपमेयसाधारणधर्मविशिष्टेएवमेव रूढंबोद्धव्यम् ॥ ५५ स्तेनसामानाधिकरण्यात्पुंवद्भावः। वृतौवृतेः प्राक्चसामानाधिकरण्यएवतत्प्रवृत्तेः। इवशब्दस्यद्योतकत्वाच्चवृत्तेः प्रागपिसामानाधिकर ण्यमत्रेतिबोद्धव्यम्। भूतपूर्वगवेति। घृनेनतुल्यःश्यामइतिवाक्येतच्छब्दकार्थस्यसादृश्येप्रतियोगित्वेनान्वयादुपमानत्वमस्तीतिभावः। उपमेयपरत्वमिति। नचश्यामा दिशब्दानांसदृशमेव ॥

खञ्जपाचक इति। खञ्जश्चेति गुणद्रव्यमात्रेनेदमनन्वयप्रधानमुपसर्जनमिति महासञ्ज्ञायानेकस्य प्रथमानिर्दिष्टस्येअप्रधानस्येत्रसञ्ज्ञाप्रधानस्येति शेषविधेर्पूर्वकस्यानुवृ
प्राधान्यकस्येत्यत्रास्यनियामकतेत्यरुचेराह। महेति। निरूढविशेषणेति। विषयताविशेषप्रकारतावदित्यर्थः। नदेवहिलोकस्यविशेषणतेनप्रसिद्धम्। उच्चैर्गुणसम्प
उपमितम। कथंभाष्याब्धिः कातिगम्भीरइतिकैयटः। सामान्यप्रयोगसत्वेनास्याप्रवृत्तेः। उच्यते। इहगाम्भीर्येणसादृश्यंनवेवक्षितंकिंतुवितनुदूरवगाहत्वादिनातस्यचा
प्रयोगरूपेवेतिनिर्बाधः समासः। विशेषणम्। ननुविशेषणविशेष्यभावेकामचाणस्याचकपाठकादाविवनीलोत्पलादावपिअव्ययस्थितः पूर्वनिपातः स्यादितिचेत्। अ
त्राहुः। जातिशब्दस्यगुणक्रियाशब्दयोःसमभिव्याहारेविशेष्यसमर्पकतैव। तेननीलोत्पलंपाचकब्राह्मणइत्यव्यवस्थितस्यप्रयोगः। गुणशब्दयोः क्रियाशब्दयोर्गुणक्रि
याशब्दयोश्चानियमएव। खञ्जकुब्जः कुब्जखञ्जः। पाचकपाठकः। पाठकपाचकः। खञ्जपाचकः। पाचकखञ्जइति। अत्रचभूतमुपसर्जनमितिमहासञ्ज्ञा। अप्रधानंहि
पसर्जनम्। गुणक्रियायोश्चद्रव्यंप्रत्यप्राधान्यंस्पष्टमेवेति। यद्वाविशेषणविशेष्ययोरसंबन्धिकतयाअन्यतरोपादानमात्रेणनराश्रेपसंभवेउभयोपादानेनिरूढविशेष
णविशेषपरिग्रहार्थम्। निरूढिश्चप्राग्युक्ताभाष्यकारादिव्यवहारादवसीयते। पूर्वापर। अपरसंतिएतच्चपश्चादितिसूत्रेभाष्येस्थितम्। बाहुलकादिति। एकेतुमुस्त्रेषुवी
रयतेपराकमतेइतिवाबोद्यम्। श्रेणिकृतादिति। एकेनशिल्पेनयुक्तायेजीवन्तितेषांसमूहः श्रेणिः। कृताकृतमिति। एकदेशकरणात्कृतम्। एकदेशान्तरस्याकरणान्नदेवा
कृतम्। सञ्चहत। गुणक्रियाशब्दैःसहसमासेस्त्रीणांपूर्वनिपातनियमार्थंसूत्रम्। तत्पुरुषः समानाधिकरणइत्यर्थेआद्यजन्तम्। औपचारिकंवा। समानाधिकरणपद
इत्यर्थः। भाषितपुंस्कादित्यादि। एतच्चस्त्रियाःपुंवदितिसूत्रेस्फुटीकरिष्यते ॥ ७ हारेकस्यतादृशविषयतात्वमनआह। रूढिश्चेति। रूढिविषयतादृशविषयतावत्त्वंनिश्चीयतइत्यर्थः। अवसीयतइति। गुणादेरेतादृशविषयतावत्त्वंनिश्चीयतइत्यर्थः। एकेनेति। अनेकशिल्पादिजीविनएकशिल्पादिजीविन
हरूपाःसमूहरूपाःकृतादतिवा। गुणक्रियेति। सत्पाठकः सच्छुक्लइत्यादौ ॥ कृतादसुदाहरणार्थः। असम्

रूढिशब्देति। तेचमतल्लिकामचर्चिकाप्रकाण्डमुद्धृतल्लजैः। प्रशस्तवाचकान्यमूनीतिकोशप्रसिद्धेर्मतल्लिकादयः। न्याय्यमिति। मचयुवत्वारोपवत्पुंस्त्वस्याप्यारोपेणसामा
नाधिकरण्यमुभयारोपापेक्षयालक्ष्यानुसारेणपरिभाषाज्ञापनस्यैवौचित्यात्। पूर्वान्तग्रहणेति। पूर्वान्ततयाग्रहणेत्यर्थः। क्वचित्तथैवपाठः। पूर्वनिपातेविशेषदृति। गुणवचनत्वात् ग
ननुनैवंकर्मधारयेसिद्धम्। जातीयदेशीययोश्चतसिलादिषितिसिद्धम्। तत्किमनेनसूत्रेणेत्यनआह। पूरणीत्यादि। तयेत्यादिचस्त्रीपुंसलक्षणेति। स्तनएवाद्यादियुक्ता
स्त्रीयोटेत्यगरुयास्यातारः। हरदत्तस्तुनपुंसकंयोटेत्याह। तत्रमूलंमृग्यम्। अमरेणनपुंसकपर्यायेभ्यः ष्यङेवास्यपाठात्। कठधूर्तेदृति। नात्रकठलंकृत्यतेऽनःकुत्सितानिकु
त्सनैरितिगतार्थतानशङ्क्या। प्रवृत्तिनिमित्तकृत्यामेवतत्प्रवृत्तेःकर्यंतर्हिजनयतिकुमुदभ्रान्तिंधूर्तवकोबालमत्यानामितिबकधूर्तदृतियुक्तम्। सत्यम्। प्रमादएवाय
मितिप्रामाणिकाः। प्रशंसावचनेश्वावचनग्रहणंरूढिशब्दपरिग्रहार्थम्। येतुयौगिकाः प्रशस्तशोभनरमणीयादयः येचविशेषवचनाः सुश्लिमृदादयः येचगौण्यास्त्रस्याप्रशं
सांगमयन्तिसिंहोमाणवकदृत्यादयस्तेसर्वेबुद्ध्यन्ते। कुमारः। एतदवेति। एवकारः स्फुटसिद्धद्योतनार्थः। ज्ञापकान्तरस्यापिसंभवात्। तथाहि। युवास्वलतीतिसूत्रेजर
तीग्रहणंलिङ्गमानहियुवन्शब्दस्यपुंस्त्वेजरतीसामानाधिकरण्येनन्याय्यम्। यत्वभ्वादिभ्यः फञ्विधौपुंसिजातदृतिमणसूत्रेपुंसीत्युक्तिरपीहज्ञापिकेति। तन्न। एकारे
ष्यपूर्वान्त ग्रहणेज्ञापकस्यमूलशैथिल्यात्। चतुष्पादोगर्भिण्या। मण्डूकप्लुत्याजातिरित्यनुवर्तते। तेनेहनाकालाद्गर्भिणी। चतुष्पात्किमब्राह्मणीगर्भिणी। प्रत्युदा
रणेतुविशेषणमितिसमासःस्यादेव। पूर्वनिपातेविशेषः। मयूरव्यंसकादयश्चावकोऽवधारणार्थः समासान्तरंव्यावर्तयति। धूर्तदृति। तथाचगुणवचनत्वात्पूर्वनि
पातेप्राप्तेदृदंवचनमितिभावः। अन्येत्वाहुः। मयूरइवव्यंसकोमयूरव्यंसकः। उपमानानिसामान्यवचनैरितिसिद्धेपुनर्विधानंतत्पुरुषेतुल्यार्थैतिसरोरुहादिषु। सत्यु
पमानशब्देनविहितेसमासेप्रवर्तते। अश्रीतपित्रतेतिदृहक्रियारूपस्यान्यपदार्थस्यप्राधान्यात्स्त्रीत्वाट्टाप् ॥
र्भिणीशब्दस्यपूर्वतिपातदृतिभावः। उपमानशब्देनेतिलक्षणप्रतिपदोक्तपरिभाषयेतिभावः। दृदंचमतंकैयटेस्थम्। क्रियारूपस्येति। क्रियापदवाच्यरूपस्येत्यर्थः ॥

भिन्नवाचीति। पूर्वपदार्थप्रधानमयम्। मिश्रेति। तेनतत्राभ्यांविग्रहेनउत्तरपदार्थेति। स्यादेतद्भाष्य। आरोपितत्वंनजाद्योत्यतेइति ——— आरोपितब्राह्मणत्ववाचिब्राह्मणपदप्रकृतिनिमित्तमित्यब्राह्मणशब्दत्वमत्रनजाद्योत्यतइत्यर्थः। एवमन्यत्रापिबोद्धव्यम्। एतदेवभाष्यसंमतम्। नञोवाचकत्वेआह। आरोपमात्रंवेति। दृढंनञ्वाच्यमेवेत्यत्र दृढार्थविशेषणं तदाह। विषयत्वंतुसंसर्गइति। तादात्म्यारोपश्चात्र। नामार्थयोरभेदान्वयस्तुनिपातातिरिक्तविषयेतिभावः। यत्तुअत्रापिपक्षेद्योनकतैवनञ्इति। तन्न। समभिव्याहृतपदशक्त्याद्योतकत्वस्यद्योतकत्वेविशिष्टस्यैवतच्छक्तिविषयतयाऽप्रयुक्तस्थितभावेनविषयत्वंतुसंसर्गइत्यस्यासंगतेः। अप्रयुक्तस्थितयोर्हिसंसर्गोभवतीत्याहुः। आरोपितोब्राह्मणइति। अत्रमन्येबोधाकारः। आद्येतुआरोपितब्राह्मणत्ववानितिप्रदर्शनीयम्। अत्रास्मिन्नेवयुक्तंनत्वत्यन्तस्वनञर्थत्वेपिब्राह्मणादिपदानांमुख्यसंबन्धेनब्राह्मणत्वादिमतिशक्तिग्रहात्तत्रारोपितत्वान्वयस्यदुर्घटत्वात्। न

एवमन्येपि। राजान्तरमिति। अन्तरशब्दोभिन्नवाची। मात्रंकार्त्स्न्येवधारणे। अन्तरमात्रशब्दाभ्यांसहनित्यसमासः। नञ्। उत्तरपदार्थप्रधानोयंसमासः। तथाहि। आरोपितत्वंन

ञ्द्योत्यते। आरोपमात्रंवा। विषयत्वंतुसंसर्गः। तथाचअब्राह्मणशब्दादारोपितोब्राह्मणइतिबोधेअर्थाद्ब्राह्मणभिन्नइतिपर्यवस्यति। अतएवानुपसर्जनत्वाद्ब्राह्मणेत्यादौसवैनामकार्यंसिद्ध्यति ॥ ७७ ॥ नञ्समभिव्याहारात्तदर्थत्यागः। शब्दार्थसंबन्धस्यानित्यत्वापत्तेः। ममतुनदोषः। मुख्यसंबन्धेनब्राह्मणत्ववतद्द्वारोपितसंबन्धेनब्राह्मणत्ववतोपितदर्थत्वात्। नञ्तुस्वविशिष्टस्यतदर्थकतात्पर्यनिर्णायकः। इदमेवनञोद्योतकत्वंनामएतावतैवात्रैकार्थीभावव्यवहारोपिविशिष्टानुपूर्व्याद्योत्यार्थान्तर्भावेण शक्त्यवच्छेदकत्वादिशिष्टस्यार्थत्वम्। समासविधायकशास्त्रबलादत्रैवमेवकल्पनोचिता। प्रज्ञयतीत्यादौतुनैवम्। अड्डादिव्यवस्थार्थमन्यथातत्रकल्पनात्। लोकस्तुतत्रापिविशिष्टशक्त्येवबोधः। अवयवशक्तिबोधनद्वाराविशिष्टस्यविशिष्टशक्तिबोधकमेवव्याकरणमितिदिक्। पर्यवस्यतीति। भेदेएवारोपस्यसंभवादितिभावः। अतएवोत्तरपदार्थप्रधानत्वादेव ॥

दृहलिङ्ग मिति। अन्यथोपसर्जनत्वाद्दृशेनापत्तौ हलन्त्यादिलोपस्य दुर्वारत्वेनतद्वैयर्थ्यस्पष्टमेव। नचवचनसामर्थ्यादुपसर्जनत्वेप्यत्वमितिवाच्यम्। लाघवेनोत्तरपदार्थप्राधान्यस्यैवज्ञापयितुं युक्तत्वात्। अब्राह्मणानश्वयोर्विशेषश्चिन्त्यः। आर्थिकार्थमिति। आरोपितत्वबोधोत्तरं प्रकरणादितात्पर्यग्राहकवशान्मानसस्तदर्थबोधइतिभावः। उत्तरपदप्राधान्यम्। तदर्थप्राधान्यम्। भाष्योक्तमित्यनेनकैयटानुपपादितपूर्वपदार्थप्राधान्यपक्षस्तदर्समस्मानुच्छ्वबोधितम्। तच्चान्यत्रप्रपञ्चितम्। वास्तवबहुत्वेति। नचैकत्वारोपेण

तत्पुरुषस्यौत्तर्गिकमुत्तरपदार्थप्राधान्यमप्येवंसतिनिर्बाधम्। एतत्तदोरितिसूत्रेनञ्समासग्रहणंचेहलिङ्गम्। मीमांसकादयस्तुब्राह्मणभिन्नदृत्यादिशब्दबोधएवेत्याहुः। तन्मतेऽसदृत्वादेः अनिसर्वदृत्यादिसमकक्षत्वात्सर्वनामसञ्ज्ञाकार्यगर्णकार्यंचनस्यात्। यत्तुतत्सादृश्यमभावश्चतद्भिन्नत्वंतदल्पता। अप्राशस्त्यंविरोधश्चनञर्थाः षट्प्रकीर्तिताइतिपठित्वाअब्राह्मणः। अपापम्। अनघः। अनुदरकन्या। अपशवोवाअन्येगोअश्वेभ्यः। अधर्मः। इत्युदाहरन्ति। तत्तुचिन्त्यंयथमार्थिकार्थमभिप्रेत्यकथंचिन्नेयम्। सर्वथापिनञ्समासस्योत्तरपदप्राधान्यंभाष्योक्तंनान्यथयितव्यम्। अतएवानेकमन्यपदार्थदृत्यत्रानेकशब्दादेकवचनंप्रयुक्तम्। माघेऽपि। सेव्यतेऽनेकयासत्तायाङ्गयेति। कथंतर्हिपतन्त्यनेकेजलधेरिवोर्मयइति। उच्यते। अङ्गारोपितैकत्वानांप्रकृत्यर्थतयातत्रबाह्यनबहुत्वापि प्रायंबहुवचनम्। यद्वासमुदायबहुत्वेबहुवचनम्। रथोऽश्वोराजश्वप्रत्येकमनेकस्ततः। अनेकश्चनिकश्चेत्येकशेषात्। यतुप्राचीनप्रक्रियायांव्याचक्षाणाआहुः। नञ्विशिष्टेनोत्तरपदेनसादृश्यादयोलक्ष्यन्तइति।

विषयेआरोपेतस्योत्तरत्वेनौत्तरसंख्यायाश्चपूर्वसंख्यान्यवहारप्रतिबन्धकत्वान्नतत्रबहुत्वभानम्। शब्देनैकत्वस्यैवोपस्थितेरित्यरुचेराह। यद्वेति। रथोगजदृत्युपलक्षणंसायकसमूहस्यापि। अनेकेदृत्यस्यपक्षभेदेनोभयविशेषणत्वात्। सादृश्यादयइति। तदुक्तंदृत्यर्थः। कारिकायांसदृशादीनामितिपाठदर्शनात् ॥

तत्त्वकौमुदीति। तद्ग्रन्थेपि पूर्वग्रन्थेषामार्थिकार्थत्वकथनात्। आकरविरुद्धमिति। विशिष्टेनलक्षितस्य प्राधान्येपि आकरोक्तोनरपदार्थप्राधान्यहानेरितिभावः। मासजातवदिति। तत्रयथाजातस्यप्राधान्यंतथाप्रकृतेब्राह्मणादेरुपनीतोब्राह्मणइतिबोधात्। नञर्थमिलितम्। नञर्थप्रकारेणजनितबोधम्। तत्समसंपदम्। आकृत्यासदृशादिलक्षकमित्यर्थः। तितद्धारस्मातारः। भाष्यविरुद्धमिति। तथाप्रकारस्यभाष्येऽनुक्तेः। अर्थतएवतद्बोधसंभवेनलक्षणायाःव्यर्थत्वाच्च। समर्थयितुमिति। मीमांसकाद्युक्तपूर्वपदार्थप्राधान्येतिशेषः। लक्षणीयेति। नञोभेदवत्त्यर्थेदृत्यर्थः। दृदनुपलक्षणम्। निपातानामनेकार्थत्वादित्यस्यापि। ज्ञापकादिति। नञ्समासेउत्तरपदार्थप्राधान्येसतियदुद्भवतितत्पूर्वपदार्थप्राधान्येपीतिसा

तत्त्वकौमुदीग्रन्थसंदर्भविरुद्धमाकरविरुद्धंच। यद्यपिविचारचिन्तामणावुक्तम्। समासेत्तरपदप्राधान्यंमासजातवत्। नञर्थमिलितंतच्चसदृशादीनिलक्षयेदिति। तदयुक्तरीत्याभाष्यविरुद्धमितिस्पष्टमेव। यदितुस्यात्तन्त्रंमेवावलम्बतेतर्हिकथंचित्समर्थयितुंशक्यम्। तथाहि। अस्तुलक्षणैव। तथापिनञ्समासेउत्तरपदप्राधान्यप्रयुक्तकार्याणिनप्यन्ति। अनञ्समासइतिज्ञापकात्। उपेयुषइतिप्रत्ययोउपायाभ्यवस्थितादितिन्यायात्। समासेत्विति वदन्वाक्येनञोऽसमस्तत्वात्क्रियायेवान्वयंदृतिध्वनयति ॥

॥ मान्यापेक्षज्ञापकादनेकमित्यादावेकवचनस्यापिसिद्धिः। एवमाश्रयणेतिगौरवेलाघवाद्उत्तरपदार्थप्राधान्यंज्ञापकमेवोचितम्। एतदेवध्वनयतोक्तम्। कथंचिदिति। यत्तुदृदंसमर्थंविचारचिन्तामणिश्लोकोत्तरार्द्धीयस्येति। तन्नातत्रोत्तरपदस्यतदर्थलाक्षणिकस्यतद्विशेष्यकबोधेचोपसर्जनत्वासंभवेनात्रादिसिद्धयेज्ञापकोपन्यासवैयर्थ्यापत्तेः। लाक्षणिकतामात्रेणोपसर्जनत्वाभावाद्विशिष्टस्यलाक्षणिकस्वेतूत्तरपदप्राधान्यमितितदुक्तिविरोधादित्यूह्यम्। नन्विदंभाष्येनोक्तमतआह। उपेयेति। लप्स्यत्यर्थः। एवंसमर्थनेप्यत्रासाधुत्वमेवमुनित्रयसंमतेर्थेएवशब्दानांसाधुत्वस्यसर्वसंमतत्वादितिबोध्यम्। वदन्नि

ति। विचारचिन्तामणिकृदितिभावः ॥

यतद्इति।यतोवधारितंततोध्वनयतीत्यन्वयः।संबोधनान्तम्।अत्रसंबोधनपदंयत्तत्क्रियायाविशेषणमितिहयुक्तं प्रमाणम्।रुत्वोथौ क्रियाजन्यगणनेनद्विधानात्।कारकं
म्।कर्त्रादिषट्कम्।क्रियाजनकस्येवकारकाधिकारेणकर्त्रादिसञ्ज्ञाविधानात्।प्रथमोवतिः।तेनतुल्यंक्रियाचेदितिविहितः।असममसनञ्।प्रसज्यप्रतिषेधार्थकद्इतिशेषः।
अतएवप्रसज्यप्रतिषेधेःसमर्थसमासद्इतितत्रतत्रभाष्यकृत्।एतत्।असममसनञः क्रियान्वयित्वम्।वचनपुरुषव्यवस्थेति।घटाभावोमद्भावद्इत्यर्थेएकवचनप्रथमपुरु
षतः।संबोधनान्तंरुत्वोथौःकारकंप्रंथभेवतिः।धातुसंबन्धाधिकारनिष्पन्नमसममसनञ्।१।तत्रायस्यचभावेनषष्ठीचेत्युदितेदूयम्।साधुत्वमष्टकस्यास्यक्रियये
वान्वधार्यताम्।२।युक्तंचैतत्त्वंपचसि।युवांपचथ।द्त्यादौनञ्समभिव्याहारेक्रियायाएवनिषेधप्रतीतेरनुभवसिद्धत्वात्।भवतिप्रयोगेःपितथैवन्याय्यत्वात्।घ
टोनास्तिपटोनस्तः।अहंतत्रनास्मीत्यादौवचनपुरुषव्यवस्थादर्शनाच्च।अन्यथार्थीभावेऽव्ययीभावस्यदुर्वारत्वाच्च।यत्तुभूतलाधेयत्वाभावान्नघटद्इत्यर्थेवर्णनञ्क्रि
यानन्वयेकारकविभक्तेर्दुर्लभत्वात्।तस्मात्कारकविशिष्टक्रियायानञर्थेःन्वयःशब्दद्इत्येवतत्त्वम्।भाष्यवार्तिकेत्वपलक्षणम्।सांप्रदायिकरीत्यापूर्वपदार्थप्राधा
न्येऽव्ययीभावः।उत्तरपदार्थप्राधान्येतत्पुरुषद्इतिविषयविवेकस्यसुलभत्वात्।यत्तुवदन्ति।यदाःभावसामान्येनञ्वर्ततेतेतदाव्ययीभावः।अभावविशेषविवक्षा
यांतत्पुरुषएव।तस्यनञर्थत्वाभावेनपूर्वपदार्थप्राधान्यासंभवादिति।तन्न।पापाभावोःपापमितित्वोक्ततत्पुरुषोदाहरणेःपिअभावत्वेनैवाभावभानेनाव्ययीभाव
स्यदुर्वारत्वात्।यदपिविशेषस्यनञर्थत्वंनास्तीति।तदपिनाविर्विशेषस्यसामान्यस्याभावात्।विशेषणरूपेणवाच्यत्वंनास्तीतिचेत् ॥
षयोरेवापत्तिरितिभावः।अन्यथा।घटाभावबोधे।वचनपुरुषव्यवस्थावदित्यपिदूषणमित्यर्थः।कारकविशिष्टक्रियायाद्इति।भूतलेघटोनास्तीत्यादौभूतलाधिकरणकघ
टकर्तृकसत्ताभावद्इतिबोधद्इतिभावः।पूर्वपदार्थप्राधान्येद्इति।असंहितमित्यस्यसंहिताभावद्इत्यर्थात्।असंदेहद्इत्यत्रारोपितसंदेहोनिश्चयद्इत्यर्थः।इतिबोधेनद्भावप्रती
तिरर्थीभेदेनधर्मिणआरोपात्।एवमनुपलब्धिपदेपिबोद्धम्।न्यायसिद्धेएवंचलिङ्दर्शनंमूलोक्तमितितत्त्वम्।अभावसामान्यद्इतिअत्यन्ताभावत्वादिनाबोधाविषयीभावत्वे
नबोधविषयत्वसामान्यमित्यभिमानस्तेषाम्।अव्ययीभावद्इतिनात्यन्ताभावत्वेनैवबोधाद्इतिभावः।नशब्देनेतीति।निषेधार्थनाशब्देनेत्यपिबोद्धम् ॥

इत्येवेति। अत्रनञ्जानशब्देनचैकशब्दस्यसमासस्तोधा प्रकारेनकसंख्यालप्रतीतेः। एकप्रकारेणनञर्थान्वयानुभवाच्च। एवमेवनैकरूपोरुद्रानुरितिविष्णुसहस्रनामस्थ
ऽनेकरूपदत्यर्थेनैकशब्देनरूपशब्दस्यबहुव्रीहिर्बोद्धः। गतिसंज्ञाविकल्पदृति। तत्फलंसमासविकल्पः। कथमिति। गतिस्त्वेतेप्राप्तातोरितिधातोः प्रतिषेधयोगः स्यादिति
तर्हिअविघ्नमित्यादिरव्ययीभावोत्तजलाञ्जलिरेवस्यादितिनकिंचिदेतत्। नञोनलोपदृति। तिङन्तेनसमासाभावादप्राप्तेरेवचनम्। अपचसीति। कुत्सितंपचसीत्यर्थः।
नशब्देनेति। नञासमासेत्वनेकथेत्येवभवतीतिभावः। ऊर्यादिच्विडाचश्च। च्विडाचौकृभ्वस्तियोगेविहितौऊर्यादयोऽपिस्वभावात् तत्रैवप्रयुज्यन्ते। तत्रापिआविः प्रादुःश
ब्दौमुक्त्वाऽन्येषांकरोतिनैवयोगदृतिमाधवादिग्रन्थेस्थितम्। तथैवोदाहरति। ऊरीकृत्येति। आविःशब्दस्यतुसाक्षात्प्रभृतिषुपाठात् कृजोयोगेगतिसंज्ञाविकल्पः। भ्व
स्तियोगेतुअनेननित्यमितिविशेषः। कथंतर्हिवारुणीमदविह्वलाक्षीमधाविध्वसुषोभवदस्तावितरागदृतिमाघः। अभवद्युगपद्विलोलजिह्वायुगलीटोभयसंकृभा
वमाविरितिच। निरुङ्निरः कवयदृतिहरदतः। वस्तुतस्तुतेप्राप्तातोरितिसूत्रस्यप्रयोगनियमार्थत्वेप्रकृतेःनुपपत्तावपिसंज्ञानियमार्थत्वपक्षेदोषतेशोऽपिना
स्तीतिप्रपञ्चितंशब्दकौस्तुभे। एतेनपुरोरामस्यजुहवांचकारज्वलनेवपुरितिभट्टिर्व्याख्यातः। हतंपरिगतेयेति। हत्वागमनंहिधात्वर्थःहतंत्यक्त्वापरिरंस्यतेति। आ
द्यमुदाहरणंद्वितीयंप्रत्युदाहरणम्। अपरिग्रहेदृतिचप्रयोगोपाधिर्नतुवाच्यकोटिनिविष्टमितिभावः। कणेहत्येति। अतिशयेनाभिलष्यनञिवृत्तिपर्यन्तंवि
वक्षितमित्यर्थः। ततश्चश्रद्धायाअवागमात्तत्प्रतिघातोगम्यते। प्रत्युदाहरणंतुकणेहत्वागतः। सूक्ष्मस्तण्डुलावयवः कणस्तस्मिन्हतेत्यर्थः। पुरस्कृत्येति। नमस्तु
रस्तोरितिसत्वम्। कथंतर्हिअग्रंपुरःपश्यसिदेवदारुमिति। स्थितमित्यद्याहारेणदृशिंप्रत्यगतित्वात् ॥

भावः। प्रयोगनियमेति। गत्युपसर्गसञ्ज्ञाधातोः प्रागेवप्रयोक्तव्यादृतितत्पर्यः। सञ्ज्ञानियमेति। धातोः प्राक्प्रयुक्तानामेवगत्यादिसंज्ञानांचेतिततर्थः। अथमेवपक्षेपुनः
स्तथवादितिभाष्येस्पष्टम्। प्रयोगोपाधिरितिः। त्यबन्तप्रयोगयोत्यंपक्षान्मानसबोधविषयमित्यर्थः। श्रद्धा। अभिलाषातिशयः ॥

एतेनेति। पुरद्रुतिकौतुके द्रुत्यनेनान्वेति। तस्यचनक्रियावाचकत्वम्। तस्येत्यस्यसमीपद्रुतिशेषद्रुतिभावः। सञ्ज्ञानियमपक्षेतुषाड्ढ्येनेतिभावः। माधवद्रुति। विभाषेतिसूत्रेऽन्तर्भाव्यित्यस्यनिवृत्त्यापितस्यिद्धिस्यन्योद्रुहेति। तेननिवचनेकृत्वेतिसिद्धम्। गतार्थैरतिमितिप्रशब्दादेरितिभावः। नित्यसमासतामिति। तेनान्तोदात्तादुत्तरपदादनित्य

एतेनतस्यस्थित्वाकथमपिपुरः कौतुकाधानहेतोरितिव्याख्यातम्। अस्तंचाभ्ययमितिकिम्। अस्तंकांण्डंप्रक्षिप्तमित्यर्थः। अदः कृत्वेति। यदास्वयमेवपर्यालोचयतितदेदमुदाहरणम्। तिरोन्तर्द्धौ। अन्तर्द्धौकिम्। तिरोभूत्वास्थितः। पार्श्वतोभूत्वेत्यर्थः। विभाषाकृञि। तिरःकृत्वेति। गतित्वाभावपक्षेसत्वमपिन। तिरसोऽन्यतरस्यामितिसत्वविधौगतिग्रहणानुवृत्तेः। केचित्तुपराभवेतिरस्कारशब्दप्रयोगमनुरुध्यानाः सत्वविधौगतिग्रहणंनिवर्तयन्तीतिमाधवः। वाचंनियम्येति। निवचनहिंवचनाभावः। अर्थाभावेऽव्ययीभावः। द्रुतंविशेषेणएदन्ततानिपात्यतेनतुसञ्ज्ञासंनियोगेन। प्रगतआचार्यद्रुति। अनेनगतार्थैरतिमस्यपदविग्रहेणनित्यसमासतांचदर्शयति। अतिमालद्रुति। एवमभिगतोमुखमभिमुखः। उद्गतोवेलामुद्वेलः। प्रतिगतोऽक्षंप्रत्यक्षः। उपपदमतिङ्। अंतिडितिनोपपदस्यविशेषणंकिंतुसमासस्य। एतच्चअनवक्लृप्त्यधिकारेभाष्येएवस्थितम्। तत्रहिकिंवृत्तग्रहणानधिकारादकिंवृत्तग्रहणानर्थक्यमित्युक्त्वाउपपदसञ्ज्ञार्थंतर्हीत्याशङ्क्याति ङितिसमासप्रतिषेधात्तज्ज्ञानर्थक्यमितिसिद्धान्तितम्। तदेतदभिप्रेत्याह। अतिङन्तेति। ननुसुपेत्यधिकारात्तिङन्तेननभविष्यतितत्राह। अतिङ्ग्रहणमिति। पूर्वसूत्रद्वितीयकृद्ग्रहणाद्यः सुबन्तः सुबन्तेनसमस्यतेतत्तः गतिः। गतिः सुबन्तोऽतिङन्तेनसमस्यतेइतिव्याख्येयमित्यर्थः। तथाचेति। यद्यप्युक्तरीत्यागत्युपपदयोरेवज्ञापकस्यापित्रियविषयिणीज्ञापरिभाषाएकदेशानुमतिन्यायादहापिस्याप्यतदृतिभावः ॥

समासेद्रुत्यनेनानित्यसमासेपदुत्तरपदंसावेकाजन्तोदात्तंततः परातृतीयादिर्विभक्तिरुदात्तेत्यर्थकेननविभक्त्युदात्तत्वम्। एतेनशकपार्थिवादित्वादिदंसिद्धमित्यवास्तमितिभावः। ज्ञाप्यतेद्रुति। अतिङ्ग्रहणकरणेनतदर्थस्यस्पष्टंबोद्धतेद्रुत्यर्थः ॥

उक्तार्थसाधकमिति। सुब्युत्पत्तेः पूर्वसमासोबहुलग्रहणादिति भावः। सुब्युत्पत्तेरित्युपलक्षणम्। स्त्रीप्रत्ययोत्पत्तेः प्रागित्यपि बोद्धव्यम्। अनुवर्त्तनदृति। उपरञ्जकतयान्वयसंभवा
द्विरोधाभावाच्चेति भावः। उपपदमिति महासञ्ज्ञयासुबन्तस्यैवोपपदत्वात्। अतएवेति। सुब्युत्पत्त्यनन्तरमेवतेनसमासादेवेत्यर्थः। व्याङ्ङेरिति। व्याङ्ङेर्मद्ध्ये विशब्दस्यप्रशब्देनतद्
न्तेनप्रशब्देनगतिसमासस्यार्थः। आङ्ङातूपपदसमासएव। आतश्चोपसर्गेदृतिसप्तमीनिर्देशात्। उपसर्गत्वपर्यायाधिकरणस्यैकस्यैवोपपदत्वादिति कश्चित्। तन्नागतिसमासेनसि

यङ्काराद्यंशेकर्तृकरणेकृतेतिसूत्रस्थंबहुलग्रहणमुक्तार्थेसाधकंबोद्धव्यम्। प्रागिति। कृदन्तादुत्तरपदात्सुब्युत्पत्तेः प्रागित्यर्थः। प्रथमान्तंसुब्ग्रहणमिहानु
वर्त्तनएव। अतएवराजदर्शीत्यादौपूर्वपदेनलोपादिपदकार्यंसिद्धयति। परिभाषायाः फलंदर्शयन्गतिमुदाहरति। व्याघ्रीति। व्याजिघ्रतीतिव्याघ्री। आतश्चोप
सर्गेदृतिकः। घ्राघ्मेतिशप्रत्ययस्तुसञ्ज्ञायांनेतिवक्ष्यते। व्याङोर्प्रशब्देनगतिसमासः सयदिप्रशब्दस्यसुबन्तताम पेक्षेततर्हिसुब्युत्पत्तयेसंख्याद्यपेक्षमान
तः प्रागेवलिङ्गयोगः लिङ्गनिमित्तश्चप्रत्ययश्चावेवस्यान्नतुङीष्। घ्रशब्दमात्रस्यजातिवाचित्वाभावात्। ततोघ्राशब्देनसमासेसतिअदन्तत्वाभावाज्जातिलक्ष
णोङीष्नस्यादितिभावः। उपपदमुदाहरति। कच्छपीति। कच्छेनपिबतीतिकच्छपी। व्याघ्रीवत्सुपीतियोगविभागात्कः। यत्तुप्राचाउपपदमतिङन्तमि
तिव्याख्यातंतन्न। तथासतिप्रथमान्तसुब्ग्रहणनिवृत्त्याबहुविप्रतिपत्तेः। तथाहि। निर्गतदृत्यत्रनिसोरुत्वंसंयोगेत्यत्रमोनुस्वारः राजदर्शीत्यादौनलोपश्च
नस्यात् ॥

ङीत्वान्नोपपदसञ्ज्ञायाएवफलाभावेनाभावात्। अतएवकर्मण्यणितिसूत्रेनुपपदत्वेनायंव्यवहृतोभाष्ये। व्याङेश्चक्रमेणप्रशब्देनतदन्तेनचगतिस
मासदृत्यक्षराभ्यः। कच्छेनेति। अधिकरणस्यकरणत्वविवक्षयातृतीया। नचकारकत्वात्सिद्धम्। कारकत्वेप्युपपदत्वाद्धान्यापरत्वादुपपदसमाससैवप्रवृत्तेः। उपपदमितिमहास
ञ्ज्ञामाश्रित्यप्रथमान्तस्यनिवृत्तिरुच्यते उतनदन्नाश्रित्य। नाद्यः। तदाश्रयणेऽत्रतन्निवृत्त्याग्रेमण्डूकानुवृत्त्याश्रमणेगौरवात्। नान्त्यदृत्याह। तथासतीत्यादि ॥

प्रादितेति।गतिरितिसूत्रेपितदसंबन्धेऽयंदोषः।एवंनिर्गतःसंपन्नेरितिचाप्रत्युक्तमिति।सुबित्येतत्संबन्धेनैवतद्व्यावृत्तावतिङ्-पदस्यवैयर्थ्यापत्तेरित्यभिमानः।शे
षीकृतेनेति।भाष्यकृतेतिशेषः।कथमिति।संहितायानित्यत्वादितिभावः।दिगितिदिगर्थस्तुयदिसुबित्यनुवृत्त्यैवएधानाहरकोव्रजतीत्यस्यव्यावृत्तिसिद्धावतिङ्-ग्रह
णमेवोभयोर्निवृत्तौज्ञापकम्।महासञ्ज्ञाकरणाच्चराजदर्शीत्यादौनदोषः।सुप्यजात्ताविति णिनेः सुबुत्पत्तिंविनाऽसंभवेनतंविनोपपदत्वाभावेनदोषाच्च।निर्गतदूत्या
दौशब्दान्तरसंबन्धात्पूर्वंसुबुत्पत्तौलुकिचपदत्वोत्तरंपदान्तरसंबन्धेनसमासेनस्तिः।माङि-लुङि-त्यादेःसनिसप्तमीतिनोपपदत्वम्।फलाभावाच्च।प्रथमार्थेसौत्री

प्रादितेत्यादौअनोगुणदृतिपररूपंचस्यात्।एनेनातिङ्।एधानाहरकोव्रजतीतिप्रत्युदाहरणमपिप्रत्युक्तम्।यदपिकुगतीतिसूत्रेउक्तम्।अत्र
सुप्सुपेत्यनुवृत्तेरितिङाविसमासःदुरीकरोतीत्यादितदप्यसत्।तत्रशेषीकृतेनातिङ्-ग्रहणेनैवविरोधात्।तिङ्-समासस्तुसहेतियोगविभागव
लल्भ्यस्कान्दस्येतिप्रागेवोक्तम्।लोकेतुप्रभवतीत्यादौउपसर्गःपृथक्पदमेव।काव्यादिपाठिनामेकपदभ्रमेतुधातूपसर्गयोःसंहितायानित्यत्वंमूल
म्।कथंतर्हिअग्नआयाहीत्यादौपदपाठेउपसर्गेषवसानमितिचेत्।पदपाठस्यापिव्याख्याविशेषतयातत्रानुकरणशब्देनोपसर्गत्वाभावात्प्रकृति
वदनुकरणमित्यतिदेशस्यवैकल्पिकत्वाद्यादेतेभ्यदृतिसूत्रेत्यदायत्वंकुर्वताएकश्रेषंचाकुर्वतासूत्रकृतैवतथाज्ञापितत्वादितिदिक्।अमैकवचयेना
तुल्यविधानमितिं।एतच्चाद्याद्वारेणलभ्यमितरैरिति ॥

सप्तम्येवहितन्निमित्तम्।अतएवपशावित्यादीनांनोपपदत्वम्।एधानाहरकइत्यादौतुक्रियार्थोपपदस्ये
तिकार्यार्थंमुपपदसञ्ज्ञावश्यकलेनतत्रास्यप्रवृत्तिव्यावृत्त्यर्थंतच्चरितार्थंध्वनितंचेदंभाष्येदृश्यते।तदास्तुउभयोर्निवृत्तिः।अतिङ्-नञ्रेत्यस्यतिङ्-न्तापटि
तदृत्यर्थः।एवंनोपपदमतिङ्-न्तमितिव्याचक्षाणस्यानवक्लृप्तसमर्थयोरितिसूत्रस्यभाष्यविरोधोदूषणमिति ॥

उक्तार्थसाधकमिति। सुनुत्यतेः पूर्वसमासोबहुलग्रहणादितिभावः। सुनुत्यतेरित्युपलक्षणम्। स्त्रीप्रत्ययोत्पत्तेः प्रागित्यपिबोद्धव्यम्। अनुवर्त्ततइति। उपरञ्जकतयान्वयसंभवाद्विरोधाभावाच्चेतिभावः। उपपदमितिमहासञ्ज्ञयासुबन्तस्यैवोपपदत्वात्। अतएवेति। सुनुत्यस्यानन्तरमेवतेनसमासादेवेत्यर्थः। व्याङोरितिः। व्याङोर्मद्धेविशब्दस्यप्रशब्देनतद्भेनप्रशब्देनगतिसमासस्यार्थः। आङःस्तूपपदसमासएव। आतश्चोपसर्गेइतिसप्तमीनिर्देशात्। उपसर्गत्वपर्यायप्यधिकरणस्यैकस्यैवोपपदत्वादितिकश्चित्। तन्नागतिसमासेनसि

यङ्काराकांक्षेकर्तृकरणेकृतेतिसूत्रस्थंबहुलग्रहणमुक्तार्थेसाधकंबोद्धव्यम्। प्रागिति। कृदन्तादुत्तरपदात्सुनुत्यतेः प्रागित्यर्थः। प्रथमान्तंसुबग्रहणमिहानुवर्तनएव। अतएवराजदर्शीत्यादौपूर्वपदेनलोपादिपदकार्यंसिद्धयति। परिभाषायाः फलंदर्शयन्गतिमुदाहरति। व्याघ्रीति। व्याजिघ्रतीतिव्याघ्री। आतश्चोपसर्गेइतिकः। घ्राघ्मेतिशप्रत्ययस्तुसञ्ज्ञायांनेतिवक्ष्यते। व्याङोर्घ्रशब्देनगतिसमासः सयदिघ्रशब्दस्यसुबन्तताभवेत्तेतर्हिसुनुत्यत्तयेसंस्कार्यत्वेसमानतः प्रागेवसिद्ध्यतियोगः सिद्ध्यनिमित्तश्चप्रत्ययश्चवेवक्ष्यान्नतुङीष्। घ्रशब्दमात्रस्यजातिवाचित्वाभावात्। ततोघ्राशब्देनसमासेसतिअदन्तत्वाभावाज्जातिलक्षणोङीष्नस्यादितिभावः। उपपदमुदाहरति। कच्छपीति। कच्छेनपिबतीतिकच्छपी। व्याघ्रीवत्सुपीतियोगविभागात्कः। यत्तुप्राचाउपपदमतिङन्तमितिव्याख्यातंतन्न। तथासतिप्रथमान्तसुबग्रहणनिवृत्त्याबहुविप्रतिपत्तेः। तथाहि। निर्गतदन्त्यत्रनिसोरुत्वंसंयोगेतेत्यत्रमोनुस्वारः राजदर्शीत्यादौनलोपश्चनस्यात् ॥

ॐ दत्वात्तत्रोपपदसञ्ज्ञायाएवफलाभावेनाभावात्। अतएवकर्मण्यणितिसूत्रेनुपपदत्वेनायंव्यवहृतोभाष्ये। व्याङोश्चक्रमेणघ्रशब्देनतदन्तेनचगतिसमासदृत्यक्षरार्थः। कच्छेनेति। अधिकरणस्यकरणत्वविवक्षयातृतीया। नचकारकत्वात्सिद्धम्। कारकत्वेप्युपपदत्वाद्धान्यापरत्वादुपपदसमाससैवप्रवृत्तेः। उपपदमितिमहासञ्ज्ञामाश्रित्यप्रथमान्तस्यनिवृत्तिरुच्यते उतनदन्नाश्रित्य। नाद्यः। तदाश्रयणेऽत्रतन्निवृत्त्याग्रेमण्डूकानुवृत्त्याश्रयणेगौरवात्। नान्त्यइत्याह। तथासतीत्यादि ॥

तिनुमागमःकृन्दसिदृष्टस्यनुटःसिद्धेःअभावस्यचापादपितुमशक्यत्वात्।तस्माद्व्यर्थमेवेतितत्त्वम्।स्तोतासुनोतेःस्तुतावृदिर्यस्येतिविग्रहः।तनूरिरितिनरतेःकिनुःउत्वम्।
तेनकोपलक्षकारः।खवानिति।अवतेरसुनसनुअवौयस्येतिविग्रहः।नुधातुःसौचोरद्व्यर्थः।तन्नोसुनासुतावृदिर्यस्येतिविग्रहः।तनूरिरितिनरतेःकिनुःउत्वम्।
तःसादिर्वनेचीतिस्थानिवद्भावात्तृदत्यस्यहलन्तम्।उरत्वम्।हुहूरेःआगमनुनाद्कारेणगुणेनचनिर्देशईत्येतद्।अतएवज्ञापकान्धानुनिर्देशेकिरिकारइत्यपिसुवच
म्।सोमोदृणाविनिहुदृत्यादेशस्याभावोपिबोद्धव्यः।अष्टादशेति।समिनेःपाठपक्षेतुएकोनविंशतिःचत्वारोदृतिचतच्छब्दादृापिउजासहआदुणःनिपातेनसहदीर्घो
भूयामोदृतिमन्त्रेभूयामोदृतियथा।अश्वस्यावित्रस्तेति।अन्येषामपीतिदीर्घः।बभूथाकृञःक्रादिसूत्रेणेडभावेसिद्धेनिगम
कृत्यच्छेदस्तुपदकारेणसंप्रदायसिद्धःभूयामोदृतिमन्त्रेभूयामोदृतियथा।अश्वस्यावित्रस्तेति।अन्येषामपीतिदीर्घः।बभूथाकृञःक्रादिसूत्रेणेडभावेसिद्धेनिगम
एवेतिनियमार्थेनिपातनम्।तदेतदाह।भाषायांसवयरिवेति।सर्वमादृति।अस्तेर्लङ्तिप्।ईडभावेअस्तलङ्।आदिलोपः।रुत्वविसर्गौ।संहितायान्तुभो
भगोरितियत्वम्।लोपःशाकल्यस्येतियलोपः।नकृन्दसिहलन्तर्पादीर्घस्तमान्नप्रतिषिद्धेतत्रहिअकृत्सार्वेतिदीर्घःस्यात्।अपवादाभावेपुनरुत्सर्गस्थितेः।
अतआह।ईत्वदीर्घेणेति।क्वचियदुक्तन्तत्रेतिव्याख्यानादितिभावः।अत्रचज्ञापकमनुपदमेववक्ष्यतिदुष्टीयतीति।प्रकृतिमात्रेनात्पर्यम्।उपत्ययसमानार्थेनतृना
दुष्टीपितेत्यादिवाबोद्धव्यम्।देवसुम्नयोः ॥ ७ ॥ पादान्तदृतिसूत्रेकृक्वादृस्येवग्रहणार्थमावश्यकमितिबोद्धव्यम्।किन्त्रत्ययस्येति।त्यदादिषुदृश्यदृतिकिन्।भू

यामोदृतियत्रेति।तत्रापिभूयामेत्यस्योत्रआदुणःहलन्ताद्यादिलोपदृतिशयस्तुलुक् ॥

टी०। शाखान्तरमानेत्यपपाठः। इतिसप्तमः ॥ मू०॥ ननुदेवाज्जिगातीतिप्रत्युदाहरणमङ्गेऽयविकल्पयजुषिकाठकेत्यशब्दयस्याश्रुत
त्राभावादित्याशङ्क्याह। बह्वृचानामसीति। तत्रेदंदृष्टमितिभावः। काठकेतिकिम्। यजुर्वेदेपिशाखान्तरमात्रेमाभूत्। अत्रसुम्नयुरित्यस्ति। कव्यध्वरः। कविअध्वर
मृडीकाएषामस्त्यलोपः स्यात्यपिपरेऽत्रचिविषयेऽगन्त्यादिगणेप्यधर्युशब्दःपठ्यतेतद्युत्पत्यन्तरंबोद्यम्। वसुधितमिति। वसूनाधातारंप्रदातारमित्य
र्थइतिवेदभाष्ये। समुषद्भिरिति। वसतीत्युषसः। सहवासिनः। तैःसंभूयेत्यर्थः। वैदभाष्येतुउषद्भिर्ज्वलद्भिरग्निभिः। उषदाहेः। लटः शत्रादेशेशपिप्राप्तेश्लयेनश
दसुक्तम्। बहुपायान्तरंबोद्यम्। नकवतेरिति। अनुवृत्त्यर्थउपन्यासः। कृपेश्छन्दसि। लोकेतुवरीकृष्यतेकृषीवलः। आद्यास्त्रयइति। धृङ्। शषः क्षुः। अभ्यासस्यदीर्घः
परस्मैपदञ्चनिपात्यते। तस्मैवयङ्लुकिरुगभावमात्रमितिवा। तच्चपक्षेमाभूदित्येतदर्थंदर्दुर्णीतिरुक्तनिपातितः। दर्दुर्णीत्यत्रतुयङ्लुकपक्षेनमकिंचिन्निपात्यम्।
किंतुस्वरेणाधारयतेस्तुणिलुक्सुः आद्येअभ्यासदीर्घः। इतरत्ररुगागमश्चनिपात्यते। इतिसप्तमः। प्रसमुपोदः। पादपूरणेकिम्। प्रदेवद्वेष्याधिया। छन्दसीरः। कथन्त
र्हिणुतनोअध्वरंस्रुष्टिमन्तम्। योअद्रिभाउदनिमाद्यन्नीति। छन्दसिसर्वेविधयोविकल्प्यन्तेइत्यदोषः। अक्षण्वन्तइति। अक्षिशब्दात्मतुप्। छन्दस्यपिदृश्यतइत्यन
ह्निणुतोःसिद्धत्वात्पूर्वेनलोपःभूतपूर्वगत्वान्नुरनुनासिकः। वत्वंप्रत्यसिद्धत्वात्यदिपूर्वान्नोऽङ्गकियेतणत्वंनस्यात्। तस्मान्नुडेवोचितः। नन्वेवंअवग्रहे
दोषःस्यात्। अक्षणिद्विर्णान्तंह्यवगृह्णन्ति। अत्रेयङ्कारान्नुंअवग्रहीतुमुचितमितिचेत्सत्यम्। नलक्षणेनपदकाराअनुवर्त्याः। पदकारैर्नामलक्षणमनुवर्त्तनीयम्। त
स्यात्यथालक्षणंपदंकर्त्तव्यमितिमहाभाष्येस्थितम्। किंचदेवयन्तःईयिवांसमित्यादौपदत्वंविनापिबहुलमवग्रहःक्रियतेनेत्यादौसत्यपिपदत्वेनक्रियतद्
तिप्रागेवोक्तम्। भूरिदावत्तरइति। आतोमनिन्क्विनिव्वनिप्। अत्राप्यवग्रहःप्राग्वत्। रथीतरइति। रथशब्दान्मत्वर्थेदनिः। तदन्तात्तरप्। नकारलोपेकृतेईकारः। यदितुनलो
पमयाहेनकारस्यस्थानेर्हिधीयेततदातस्मिन्सिद्धत्वात्सवर्णदीर्घोनलभ्येत। एतेननकारस्यइकारादेशेसतिसवर्णदीर्घत्वमितिन्यासग्रन्थःप्रयुक्तः। रथीतममिति। इहतु
पदकाराःनुरित्यवगृह्णन्ति। अन्येषामपीतिसंहितायांदीर्घइतितदाशयः ॥

टी०। समर्थनीयत्वादिति। त्वयापीति शेषः। उत्वमिति। निपातनादिति शेषः। अम्बरस्तमिति दृति। दृतिप्रयोगादिति शेषः। कथं सङ्गच्छन्त दृति। एवञ्च तेचिन्त्या दृतिभागः। चिन्त्यमि
तिचिन्तावीजनुहश्च्वीहिकालयोरित्यत्रसामान्यग्रहणार्थङ्कृत्वमिति। प्राचीनग्रन्थैरिति दीर्घोकितदृतिसूत्रस्थभाष्यादिग्रन्थैरित्यर्थः। ववस्थितत्वयेति छन्दसि सर्वविधीनांवैकल्पि
उदेर्नञ्पूर्वस्येतियद्यपिनदविदोन्दत्रेतिमत्रेणेतत्सिद्धं नचछन्दसिपाणिकमपिनत्वंमाभूदितिनिपातनाश्रयणमासर्वविकल्पानांछन्दसिव्यवस्थितत्वाविपरीतापादनस्यासम्भव
वात्। अनुत्तमसौसत्रेविश्वाप्युविश्वादन्द्रायतविपीरित्यादिमन्त्रेषुनत्वाभावस्यैवदृश्यमानत्वात्। यदितुकचित्तत्वमपिदृश्यतेतर्हितस्यबाहुलकादिनापिसमर्थनीयत्वात्। तथापिभाष्यस्य
नुन्नमितिनत्वस्यनित्यत्वंनिपातनस्यफलमित्याहुः। अनुत्तमितियत्तच्छन्दस्येवेतिव्याख्यानादितिभावः। त्वरतेरिति। ऊर्ध्वत्वरेत्यूतुदीत्यस्येति। राल्लोपः। सदत्यस्येति। उत्तरपरत्वन्नूणप्परत्वे
वसिद्धे। कार्यकालपक्षाश्रयणेनपरिभाषाणामसिद्धत्वप्रकरणेपिप्रवृत्तेः। उभययेतियाचष्टे। रूवैतिनित्येरुत्वेप्रत्ये परेरकार्यमिदम्। अम्बरः शब्दईषदर्थे। अम्बरस्तमितः। सुयज्ञ महाब्राह्मणेतिवद्
णंत्वप्रतिषेधोक्तपरिभाषायाअनित्यत्वज्ञापनार्थन्तेनक्रापपतीत्यादोपकृसिद्ध्यति मतुवाअनुबन्धपरित्यागेनसकारान्तस्यवस्दृत्यस्यसमुनासहछन्दः। अस्यावरस्यापिसौत्रःपरनिपातः।
त्रेपित्समान्यग्रहणमुक्तमाद्दन्तुचिन्त्यम्। उक्तरीत्याहश्च्वीहिकालयोरितिसूत्रेसामान्यग्रहणस्यनिर्बाधत्वेजहातेःककारःसामान्यग्रहणनिर्वाहार्थदृतिप्राचाङ्ग्याःकथंसङ्गच्छन्त दृति।
किंचककारस्यफलमपिचिन्त्यम्। यद्यपियङ्लुकिदीर्घोकितदृतिदीर्घस्याप्रवृत्तिः किन्तुसामर्थ्यादित्युत्रेशासम्भवतितथापिप्राचीनग्रन्थैःसहलक्ष्येविसंवादोदुर्वार दृतिदिक्। देवोअच्छे
तिअनुपदंवक्ष्यमाणेनाद्योटीतिसूत्रेणानुनासिकः। तत्फलमस्यानपसेतअत्रानुनासिकदृतिसूत्रेणेतिविवेकः। नेहेति। एतेनमहान्हिसदृतिवहृधानांपाठोव्याख्यातः। अकरेतुमहांहीत्युत्त
दृतैम्। तच्छासान्तरेअन्वेषणीयम्। एकञ्चेतिविकल्पस्येवव्यवस्थितत्वाप्रकृतसूत्रत्यागेनमहल्लाघवम्। सूत्रारम्भेतुमत्वयोपिशरणीकरणीमदृतिमहाक्लेशदृतिभावः। छन्दसिविकल्प
व्यवस्थयेतिसिद्धेत्रेत्यादिकंस्पष्टार्थमितितत्त्वम्। एवमुत्तरसूत्राण्यपिदिक्प्रदर्शनमात्रादृति। अत्रपरिःसर्वतोभावेसहेः चकारोनुक्तसमुच्चयार्थदृत्याशयेनाह। वसिति क्रतीषांहमिति। क्रतिशब्द
स्यान्येषांमतीतिदीर्घेः। दृत्यष्टमः ॥ ७ ॥ कत्वादितिभावः। विकल्पव्यवस्थयेति। व्यवस्थितविकल्पेनेतियावत्। दृत्यष्टमः ॥ इतिश्रीमदीक्षितभट्टो। जीपोत्रदीक्षितवीरेश्वरपुत्र
दीक्षितहरिविरचितेनघुशब्देन्दुशेखरेसमाप्तः ॥ श्रीगङ्गाविघ्नेश्वराभ्यांनमः ग्रन्थसङ्ख्याशंवत् १९३२ मितीफाल्गुणसुदी ७ अधिगच्छति शास्त्रार्थः स्मरति श्रद्धधातिच। य
त्कृपावशतस्तस्मैनमोस्तुगुरवेसदा ॥ १॥ गुरुचरणसरोजाभ्यांनमः ॥ संकष्टनाशिनीविजयतेतराम् ॥

साधारणप्रकृतिप्रत्ययसमासतद्धितविषयकृतयापञ्चभिः प्रकरणैरुदात्तादिस्वरान्व्युत्पादयितुं साधारणस्वरांस्तावदाह।अनुदात्त
मिति।एकवर्जमिति।द्वितीयायांचेतिणमुलानन्तरंतत्रपरीप्सायामित्यनुवर्त्तनदृनिचेत्सत्यम्।इहाप्यस्तिपरीप्सातथाहि।अन्नोदात्तादि
र्विधीयते।तत्रतत्समकालमेवशिष्टमनुदात्तंकर्त्तव्यंनविलंबितव्यमिति।एतच्चद्वितीयायाञ्चेतिसूत्रेहरदत्तादिभिरुक्तम्।यद्वापरीप्सायामि
तिप्राप्तिकमाश्रित्यचात्रैवसूत्रेहरदत्तादिग्रन्थेस्पष्टमापरिभाषेयमिति।अधिकारत्वेतुयद्यपिषाष्ठस्वरेनकश्चिद्दोषः तथापिस्थलान्तरवर्ति
दोषएव।अनुदात्तञ्चेत्येवमादिषुहिअस्यानुपस्थानाच्छेषनिघातोनलभ्येत।किंचएकवर्जमितिव्यर्थंस्यात्।तत्तत्सूत्रविधेयानांवचनसाम
र्थ्यादेवनिघातोत्रसूत्रेरितिभावः।परिभाषायालिङ्गंपेक्षायामाह।स्वरविधीति।एकवर्जमित्यनेनहिअनुदात्तस्यवर्जनंव्यर्थम्।अतःपरिशे
षादुदात्तस्वरितावेववर्ज्येतेइतितद्विधावेवास्योपस्थानमितिभावः।तृमेकमचमिति।एकग्रहणन्तत्रविधीयमानस्योपलक्षणम्।तेनतवैवान्तस्य
सुप्रपरित्यादेर्हयोर्वर्जनमाद्द्वारहस्तीत्यत्रदेवतायांहस्तेचेतिसूत्रेणपदद्वयस्यापिप्रकृतिस्वरविधेयेत्रयाणांवर्जनम्।हस्तिशब्दोहि त्र
नपत्योदित्वादुदात्तःहतिर्वोद्यम्।गोपायतमितिगुपूरक्षणेधातोरित्त्वोदात्तःतत्आत्मनेपदेयःप्रत्ययस्वरेणाप्युदात्तः ततोधातुस्वरेयकारोदात्त
नःसचप्राग्रूपोरुदात्तयोःसतोःपश्चात्परत्वात्सतिशिष्टःअतोबलवानातस्यशबकारेणोदात्तादनुदात्तस्येतिस्वरितः।स्यादेतत्।तमित्यस्वि
रितमाश्रित्यशेषनिघातोस्तुनचसन्निपातपरिभाषायानिर्वाहः।तस्माःअनित्यत्वेनस्वरविधावप्रवृत्तेः।अन्यथाचोदात्तादुत्तरपदादन्यतरस्यांकृतद्धि
तसमासेष्वपिनिघातोनप्रवर्त्तेतेतिचहव्याकुलीस्यात्।किंचअग्नेभईकरिष्यसीत्यादौस्यप्रत्ययादीनांनिघातःकेनवार्यतेनहि
तत्रसन्निपातपरिभाषायाउक्तिसंभवोस्तिअपिचसदेवाएहवसतीत्यत्रएकादेशउदात्तेनोदात्तइतिकृतेहकाराकारोनिहन्येतएवमुदात्तस्वरित

योर्यण इतिस्वरितेकृतेन्याग्निज्ञातवेदसमित्यत्राग्निशब्दस्थेवाग्नेरिहन्येतिचेत्। अत्रोच्यते। यथोद्देशपक्षाश्रयणेनेयंपरिभाषानित्याचानप्रव
र्तते। तत्रतस्मिंस्तथोनावदितिसूत्रंज्ञापकम्। परिभाषान्तराणि तुकार्यकालपक्षाश्रयात्प्रवर्त्तन्तएव। अतोनकश्चित्पूर्वोक्तदोषः। सतिशि
ष्टेति। एतच्चन्यायसिद्धन्तथाहि। यथोद्देशपक्षमवलंब्यप्रवृत्तायाअप्यस्याः उदात्तस्वरितेविधिभिःसहवाक्यैकवाक्यतास्थेव। उत्सर्गस्यापवादस्य
वायसैवयत्रचरमाप्राप्तिस्तदेकवाक्यतापन्नयानयालस्यंव्यवस्थाप्यते। अतएवौपगवलमित्यत्राण्प्रत्ययेचआवृत्त्याद्युदात्तश्चेतिप्रवर्त्तमानं
सुबेवप्रथमप्रवृत्तिबाधेनद्वितीयप्रवृत्तास्तंपरिनिष्ठापयतिइतिदिक्। अन्यत्रेति। अत्रज्ञापकन्नासेः परस्यलसार्वधातुकस्यनिघातविधा
नम्। अन्यथालकारमात्रापेक्षत्वादन्तरङ्गत्वेनपरत्वेनचतिबादिषुकृतेषुक्रियमाणस्यतेर्लोपस्यसतिशिष्टत्वाच्छेषनिघातेनैवसिद्धेरनर्थक
त्वात्। गृणीतइति। अन्तोदात्तंपदम्। अत्रलसार्वधातुकनिघातोनास्ति। अदुपदेशेइति। तपरकरणात्। आप्रत्ययस्यान्तत्वाभावात्। तिङः इ
तिनिघातस्तुनेभवति। पहस्तान्नित्यमितिनिषेधात्। सहिव्यवहितेपिप्रवर्त्ततइतिवक्ष्यतेऽहचसहोतायस्मरोदसीइतिपूर्वचरणेयहत्तम
सीतिस्त्रियांदेवीमिति। पचादिषुदेवडितिटिलोपः। चौउदात्तनिवृत्तीति। कुदुत्तरपदप्रकृतिस्वरेणउदात्तस्याञ्चमकारस्यच द्
तिलोपेसतीति। अनुदात्तस्यचेतिसूत्रेणोदात्तः प्राप्तः तस्यायमपवादइत्यर्थः। इममदितिमेदशब्दात्परत्वमाश्रित्यगङ्गे प्रभृतीनान्नद्यादीनामनुदा
त्तः। सचपदपाठेस्पष्टएव। संहितायान्तुस्वरितात्संहितायामितिवक्ष्यमाणाप्रचयापरनामधेयाएकश्रुतिः प्रवर्त्तते। नामन्निति। सामान्यवचन
पदंव्याचष्टे। विशेष्यमिति। विशेष्यसमर्पकमित्यर्थः। अग्नेत्रातरिति। अग्निरिहविशेष्यः। त्राणकर्त्तेतितुविशेषणम्। अग्नेर्भ्रातः सहस्कर्त्तेतिमन्त्रे
तुशुचिव्रतेतिविशेष्यत्वेनविवक्षितम्। अतोऽग्नेरित्यस्यअविद्यमानवद्भावान्भ्रातरित्यस्य निघातः। एवन्ततउत्तरेषामितिबोध्यम्। देवीःषडि

ति।अत्रदेवीरित्यामन्त्रितन्नाविद्यमानवत्तेनषडित्यस्यनिघातः।अव्ययीभावस्यत्विति।एतच्चअव्ययीभावश्चेतिसञ्ज्ञासूत्रेभाष्येस्पष्टम्।अ
भ्यर्हीति॥उपसर्गाश्चाभिवर्जमित्युक्तेरभिशब्दोन्नोदात्तः।तस्यनित्यवीप्सयोरितिद्वित्वम्।अनुदात्तंचेतिपरस्यानुदात्तत्वंयणिकृतेउदात्तयणः
परत्वात्स्वरितः खलपूशब्दःकृदुत्तरपदप्रकृतिस्वरेणान्नोदात्तःततःसप्तम्येकवचनस्यउदात्तयणोहल्पूर्वादितिप्राप्तस्योदात्तस्यनोङ्धात्वो
रितिनिषेधःततोनेनस्वरितः।तस्ययणितनः परस्याशाशब्दाकारस्थानेनैवस्वरितःआशाशब्दोप्यन्नोदात्तः।आशायाअदिभाव्याचेदिति
फिट्सूत्रात्।अस्येति।आशाशब्दप्रथमाकारस्थानिकस्येत्यर्थः।शेषेति।शाशब्दस्यनिघातोनेत्यर्थः।स्यादेतत्।यणादेशंप्रतिस्वरितस्यासिद्ध
त्वात्स्थानिन्येवयणप्रवृत्तः।तथाचौजदृदित्यत्रहृत्शब्देद्वित्वंप्रवर्त्ततेनतुदृशब्देनचस्वरितयणःपरस्येत्याश्रयणात्सिद्धत्वंशङ्क्यअतिप्रस
ङ्गात्।उदात्तादनुदात्तस्यस्वरितइत्यनेनयत्रक्रियतेनत्रापिह्यसिद्धत्वंनस्यात्।नचेष्टापत्तिः।लस्यविरोधात्।प्रत्यग्निरुषसामग्रमख्य-दित्या
दौस्वरितादर्शनात्।नचनोदात्तस्वरितोदयमितिनिषेधःशङ्क्यः।अनन्तरस्येतिन्यायेनोदात्तस्येतियत्रप्राप्तिःतत्रैवस्वरितस्यनिषेधात्।
अन्यथाखलआशा।न्याआग्निमःपाह्यास्मान्।इत्यादावपिनिषेधापत्तेः।तस्मादिहसमाधानान्तरमेववाच्यमितिचेत्।अत्राहुर्भाष्यकाराः॥योग
विभागकर्त्तव्यः।उदात्तयणःपरस्यानुदात्तस्यस्वरितःस्यात्।ततःस्वरितयणः।इहपूर्वमनुवर्त्तते।उदात्तयणहल्पूर्वोभिनिर्वृत्तस्वरितस्तद्यणः
परस्येत्यर्थः।एवञ्चास्यैवआश्रयात्सिद्धत्वंनान्यस्य।यद्यस्वरितग्रहणन्नकरिष्यतेखलआशेत्यादावपिउदात्तयणःपरत्वादेवसिद्धत्वात्।नच
स्वरितयणाव्यवधानंशङ्क्यम्।स्वरविधौव्यञ्जनमविद्यमानवदितिवादितियत्तुकाशिकायामुक्तंव्यञ्जनमह्यविद्यमानवद्भवतीतत्वचदृहतु
स्थानिवद्भावादेवनचंस्वरविधौतन्निषेधः।स्वरदीर्घयलोपेषुलोपानादेशएवेतिसिद्धान्तात्।तस्मात्स्वरितग्रहणन्नकरिष्यतदित्यसङ्गतम्।

योगविभागपक्षः परमवशिष्यते। सोपिनउदात्तादनुदात्तस्येतियः स्वरितः तत्स्थानिकायणः परस्यापिस्वरितत्वदर्शनात्। पठन्तेहितैत्तिरीयेः। पास्ते
निधाः समिधः सन्त्वग्नेइति। तस्माद्वाष्यस्यपक्षद्वयमपिनसङ्गच्छतइति। सोयंहस्तिकृतोमहान्मोहः। भाष्योक्तपक्षद्वयस्यापिदोषसत्वात्
तथाहियोगविभागपक्षेसन्त्यग्रहणंव्यर्थमनुपपत्तिः। सकारोकारमाश्रित्यउदात्तादनुदात्तस्येत्येवाग्निशब्दाकारस्यस्वरितसिद्धेः। नचस्थानिव
द्भावाव्यवधानंपूर्वस्माद्धिधावितिपक्षमीमांसमानंस्वप्रत्याख्यानात्वीकारेपिवानिशब्दाकारेसेधतिज्ञापकान्नित्यत्वात्। सार्वत्रिकत्वाभ्युपग
मेपिपूर्वस्मात्सिद्धेयेतदभावात्। अतएवप्रत्ययग्रहणंस्वरितत्वेनप्रवर्त्ततेनोदात्तस्वरितेत्यादिनानिषेधात्। यदिहिसंलग्नद्रुत्वंप्रकृतसूत्रे
प्रकृत्यैवनेहिनिरर्थकंवादत्वात्प्रत्ययग्रहणंस्थानिवत्त्वेनैवप्रत्ययनिमित्तस्यप्रवृत्तिर्ज्ञापनार्थंस्वरितग्रहणप्रत्याख्यानपक्षोपिसाधुरेवपूर्वंत्रा
ह्मणेनस्थानिवदित्यस्यजागरूकत्वेनहरिकारोक्तदोषस्यनिरवकाशत्वादिनिमात्तर्यमुत्तार्यसुधीभिरालोकनीयम्। एतेनदद्याद्यमिति द्र
ह्याहदतिस्वरितपक्षः स्वरितत्वेउदाहरणंद्वयंवदन्यथाश्रुतंवृत्तिग्रन्थेचाग्नेडयन्त्वरमाङ्करीकारःप्रत्युक्तोपाजादेशएवनस्थानिवदि
तिनियमोहिंस्वरविधौनेतिप्रतिषेधोक्तस्यैवनिषेधस्यनतुपूर्वत्रासिद्धीयत्वप्रयुक्तस्यापिएकादेशउदात्तेनोदात्तःउदात्तयोरेवस्थानित्वेआ
त्मनेपदंस्थादेर्वासिद्धमाअन्यतरस्यअनुदात्तत्वेस्वरितत्वेवासिद्धत्वंभाष्यान्तर्यादितिन्यायेनान्तरतम्यात्स्वरितेप्राप्तेविधिरयमितिध्वनन्नु
दाहरणद्वयमाह। वीड्वादृत्यादि। अत्रवृत्यनुदात्तम। बहुवचनस्यवस्नसावित्यत्रानुदात्तंसर्वमपादावित्यधिकारात्। अश्वशब्दआद्यु
दात्तः। अर्शेःकनिन्युदादित्वात्। केतिकिमोनंतित्वरितमाअवरशब्दस्वाङ्गशिटामित्याद्युदात्तः। स्यादेतत्। काचरमित्युदाहरणमयुक्तम्।
एकादशउदात्तेनोदात्तइतिसूत्रेपूर्वसूत्रादनुदात्तस्येत्यस्यानुवृत्तेःकाशिकायांउक्तत्वात्। तस्मादितइतिसूत्रेस्वरितोहीत्यर्थश्चेतिवार्त्तिकस्यत

त्रभाष्यकैयटादीनाञ्चतथैवस्वरसादिति चेत्सत्यम्।दृहसर्वेप्राचाङ्ग्याःअभ्युच्चयमात्रपरतयाकथञ्चिन्नेयाः।वस्तुतस्तुअनुदात्तग्रहणंत्रा
नुवर्त्ततएवनिष्फलत्वात्।लस्यविरोधाच्चकावरमित्यादौबहूचानांउदात्तपाठस्यनिर्वादत्वात्।तैत्तिरीयाणामपि।याज्ञैवेनमेतमाप्यापय
तीत्यत्राङ्ग्रहणेहितीयास्वरस्योदात्तत्वात्।अतएवबहूचप्रातिशाख्यउदात्तवत्येकीभावउदात्तसंद्यमक्षरम्।अनुदात्तोदयेपुनःस्वरितं
स्वरितोपचेदितिश्लोकेपूर्वार्द्धेअनुदात्तग्रहणंनकृतम्।किंतूत्तरत्रवृत्तस्यपूर्वान्वयभ्रमंवारयितुंपुनःशब्दःप्रयुक्तः।शौनकीयेस्वरशेषेपिएका
दिष्टमुदात्तेनतुल्यमेवनवेत्यवरमित्युक्तमितिदिक्।।इकारयोरिसि।दृस्वयोरेवेत्यर्थः।अस्मश्लोकइत्यत्रतुर्दीयतइतिदीर्घस्यप्रदेशान्स्वरितः।
इयञ्चबहूचानांव्यवस्योक्ता।अन्येषामपितदीयप्रातिशाख्यानुसारेणबोद्व्या।नोदात्तः।उदयशब्दःपरशब्देनसमानार्थः प्रातिशाख्येषुप्रसिद्धः।
लाघवादपरशब्देप्रयोक्तव्येमङ्गलार्थमुदयशब्दप्रयुक्तः।तथाचभाष्यम्।मंगलादीनिमङ्गलमध्यानिमङ्गलान्तानिचशास्त्राणिप्रथन्तइत्यादि
।स्वयञ्चतद्विरित्यादौशिवशमितिमध्येस्वरितोदयमितिचान्येषामपिदृश्यतेयेमङ्गलंकृतम्।यद्यपिउच्चैरुदात्तस्तत्कागार्ग्यादीनामेवेतिविपरीतनिय
मश्चकृतोवारयितुंनशक्यइत्यान्नभावः।आगच्छभोइतिअत्रमाणवकशब्दस्यटेःप्लुतोवैकल्पिकत्वान्नकृतः।पक्षेसोपिबोद्व्यः।सचोदात्तः।प्लुतउदा
त्तइत्यधिकारात्एकश्रुतिप्लुताभ्यांअवयवभेदेनवाक्येसमुच्चिताभ्यांदात्तंबोधनंबोत्यते।विभाषाकुन्दसि।अत्रतन्त्रेणआवृत्त्यावाअकुन्दसी
तिनजंप्रश्लिष्यभाषायामपिरेच्छिकोविकल्पोबोद्व्यः।तथाचदाण्डिनायनादिसूत्रेभाष्यम्।एकश्रुतिर्हिस्वरसर्वनामेत्यादिअतएवाभियुक्तानां
निरुढास्वरकतत्वरुषबहुव्रीह्याद्याश्रयणेनश्लिष्टकाण्डादिनिर्माणंसङ्गच्छते।पस्यशान्तेश्चेतोधावतिअलंबुद्धसानांपानेतिह्यर्थवाक्यमिति
भाष्यञ्चातथाचकाव्यप्रकाशेवेदइवलोकेस्वरेनविशेषाद्यवसायहेतुरित्युक्तम्।एकश्रुत्यामवहारादितितस्याशयः।किमर्थन्तर्हिह्रस्वप्लो

त्तममितिप्रक्रम्यविभाषाभाषायामितिसूत्रितमितिचेत्तत्रैवार्थेणप्रक्रमेपाणिनीयानुदात्तलाभायेतिगृह्यताम्। वेतिप्रकृतेविभाषाग्रहणङ्कुर्वन्सूत्रकारोपितन्त्रादिकमभिप्रैति।एवेनभाषायांस्वरानुरोधोनास्तीतिभ्राम्यन्तःपरास्ताः।स्वरविधिषूक्तन्दोधिकारभावात्।ए ए स्यचावाभाषायाम्।इतिफिट्सूत्रस्थभाष्योत्तमम्।विभाषाभाषायामितिषाष्ठस्यैवंविधानामन्येषामपिनिर्विषयत्वापत्तेश्चाकिमर्थन्तर्हिवैदिकप्रक्रियायांस्वरप्रक्रियादर्शनंप्रक्रान्तमितिचेत्वेदेतस्यावश्यकत्वात्।नतुलोकेसर्वथानुपयोगादितिगृह्यताम्। इममेइतिननुमेइतिस्वरितस्यविधायकन्त्रिपादीस्यस्यादसिद्धंस्यात्।नचस्वरितादित्याश्रयात्तसिद्धत्वम्।कवःसुमेत्यादौचरितार्थत्वादूइतिचेत्।नतस्यादितदित्यारभ्यनवसूत्र्याःस्वस्थानादुल्कृष्टशास्त्रान्तेभाष्यवार्तिकयोर्निवेशितत्वात्।नसुब्रह्मण्यायामितिसूत्रेस्वरितस्यतूदात्तइतिवदनन्तरकाण्डोत्कर्षस्यज्ञापितत्वाच्च।नचसुब्रह्मण्योमितिसिद्धःस्वरितोस्तीतिवाच्यम्।तत्रैकादशउदात्तेनेतिसूत्रप्रवृत्तेरावश्यकत्वात्।तत्रह्यनुदात्तग्रहणंनानुवर्त्ततइत्यवोचाम॥प्राचांरीत्यानुदेवब्रह्मणोरनुदात्तइतिसूत्रंज्ञापकमितिदिक्।सन्नन्तरइति।सन्नोनुदात्तःतदाह।अनुदात्तनन्तरःस्यादिति।इतिसाधारणस्वरप्रकरणंप्रथमम्।प्रकृतिर्द्विधांधातुःप्रातिपदिकञ्च।तत्रधातुस्वरमाह।धातोरिति।अदाद्यन्तर्गणइति।आगणान्तादितिभावः।अभ्यस्तानामादिरित्यनुवर्त्तमानेपुनरादिग्रहणंनित्यार्थम्।अचीतिकिम्।इद्धातु।अनिरिकिंजसिषुअनुदात्तेच।बहुव्रीहिरयम्।तेनमाहिस्मदधातु।दधात्यत्रइत्यादौलोपयणादेशयोःकृतयोरपिआद्युदात्तःसिद्ध्यतीत्याशयेनाह।अविद्यमानेनिभीहीति।प्रत्ययेइत्येवनक्तेपूर्वग्रहणंज्ञापयति।सोऽर्थःसप्तम्यस्तदन्तसप्तम्यइति।ज्ञापकेचमतद्वयम्।सामान्यापेक्षंविशेषापेक्षञ्चेति।आद्येत्रित्यादिर्नित्यमित्यादावपितदन्तसप्तम्येव।द्वितीयेतुयत्रतदन्तग्रहणंसत्याभ्यांफलभेदःतत्रैवतदन्तसप्तमी।भीह्रीत्यत्रहिपूर्वग्रहणाभावेतदन्ततस्यकार्यिलेप्रत्ययान्तानांभ्यादीनामलोन्त्यस्यभवनुदात्तःप्र

त्ययान्तस्यस्यात्।सप्तम्यर्थपुरस्कारेतुपेतमपहायभ्यादीनामेवउदात्तःस्यादितिस्पष्टफलभेदः।उपोत्तमंरितिचङन्यतरस्यामित्यत्राप्येवमेव।स्त्रियादिर्नित्यंपथिमथोःसर्वनामस्थानेइत्यादौतुनास्तिफलभेदः।तदन्तग्रहणेसत्यसतिचप्रकृतेरादेरेवउदात्तत्वात्।अतस्तत्रपरसप्तम्येवेतिदिक्।लोलूयन्तोलूपमिति।लोइत्युदात्तःलूइतिस्वरितःततश्चत्वारःप्रचयाः।लित्स्वरइति।अत्रामेडितान्तर्गतस्यलूशब्दस्योदात्तःनत्वतस्मिन्कर्तव्येऽल्लोपस्यस्थानिवद्भावःशङ्ग्वःस्वरितविधौतन्निषेधात्।शेषनिघातः।अचःकर्तव्यकिंहकीर्षतइत्यादौदूलेरपरत्वेचसतिअयंस्वरइष्टःन्निर्वाहार्थन्तास्यनुदात्तेतिसूत्रेसमासैकदेशोप्युपदेशशब्दहानुवर्त्यते।सप्तम्याचविपरिणम्यतेनेतदाह।उपदेशेजन्तानामितिनन्वेवंएवन्द्वादशधाजस्रेरित्यादावित्यन्तर्भूतण्यर्थात्कर्तृकर्मविषयात्जनेर्लटिजायतेस्वयमेवेत्यत्रएषस्वरोनस्यादितिचेन्नैवम्।यदितिविषयसप्तमीमाश्रित्यप्रत्ययोत्पत्तेःप्रागेवआत्वप्रवृत्तेरित्याहुः।लूयतइति।आदिमद्भोपर्यायेणोदात्तो।माहिंसीकरतामिति।अनुपदेशात्परत्वेनलसार्वधातुकानुदात्तत्वेकृतेचङएवस्वरेप्राप्तेपक्षेधात्वकारउदात्तःउपोत्तमग्रहणानुवर्तनात्दूयोर्नेति।माहिंसधातुःइनिधातुस्वराः।तेचप्रायेणकृत्तद्धितबलेनैवज्ञेयाः।उणादिषुतुउणादिप्रत्ययैःअव्युत्पन्नेपक्षेपिफिट्सूत्रैः।क्वचित्तुविशिष्यविधानादितिविवेकःअतएवकर्मण्यणितिसूत्रेमांसशब्दस्यनविषयस्येतिफिट्स्वरमाशङ्क्यमनेर्दीर्घश्चेत्यौणादिकसप्रत्ययान्तत्वादन्तोदात्तताकैयटेनोक्ता।मांसमेकःपिंशतीत्यादौतल्लभ्यमपितथैव।यत्तुआज्यशब्दस्युत्पादनावसरेकैयटेननविषयस्येतिसञ्ज्ञारिनन्तत्वोढिवादमात्रम्।स्वरनिर्वाहस्तुण्यत्यङंपरित्यज्यआङ्पूर्वाक्यनिपक्षस्यसिद्धान्तितत्वादेवेतिदिक्।कर्षात्वतःस्त्रियादिर्नित्यमिलस्यापवादःस्थानिवत्वादिति।स्वरविधौनेतिनिषेधस्तुनास्ति।लोपाजादेशएवेतिनियमात्।झल्युपोत्तमम्।षढ्भ्योहलादिरित्यस्यापवादः।सर्वस्यसुपि।सर्वशब्दउच्चादिषुन्तोदात्तोनिपातितः।सर्वस्यविकारःसार्वइत्यत्रअ

नुदात्तादिप्रकृतिकसुबन्तलक्षणोऽजयधास्यादिति ङ्याप्सूत्रेभाष्येस्थितम्।अवणन्तसर्वनैवआद्युदात्तस्यैव।प्रत्ययलक्षणेनापिसर्वस्वरस्येष्यमा
णत्वात्।पश्चिमयोः।पश्चिमशब्दोऽउणादिषुइनिप्रत्ययान्तोऽमुत्यादितो॥गमेरिनिरित्यधिकारेमन्यः।पतस्थचेतिसूत्रितत्वात्।तत्रप्रत्ययस्वरेणा
न्तोदात्तेप्राप्तेविपरियम्।स्वेक्षयदृति।क्षिनिवासगत्योः।अस्मादधिकरणेघः।निवासेकिम्।व्याधेःसमः।क्षिरुग्ये।एरजन्तः।जयोऽयइति।जयतेर्घः
करणेकिम्।जयोब्राह्मणानाम्।भावेएरच्।वृषादीनाञ्चवृषसेचनेदृगुपधलक्षणःकआकृतिगणइति।किदितिसूत्रेणग्रामादीनाञ्चेतिसूत्रितम्।
ग्रामादिरप्याकृतिगणः।एवञ्चअविहितलक्षणस्यायुदात्तस्यवृषादित्वङ्गामादित्वाच्चोद्यम्।अन्तोदात्तत्वस्यतुउल्कादित्वंघृतादित्वञ्चेतिदि
क्।एवञ्चाभ्यामेवसूत्राभ्यांसर्वसिद्धेदृतरसूत्रदूषंप्रणयनम्।कर्त्तृभेदान्नदोषयेतिबोद्धव्यम्।आशितःकर्त्ताकर्त्तृवाचीतिसकर्मकादप्यशेः
कर्त्तरिक्तःउपधादीर्घश्चानेनैवसूत्रेणनिपात्यतदृतिभाष्येस्थितम्।अतएवकृषविंतिमन्त्रस्यवेदभाष्येकृषत्कृष्टिङुर्वन्फालःकृषीवलश्चोक्तार
ङुरोतीतिव्याख्यातम्।वृत्तिकारस्तुअशेरङ्पूर्वादविवक्षितकर्मत्वेनाकर्मकत्वात्कर्त्तरिक्तः।तत्रयाचयत्रिति प्राप्तःस्वरोऽनेनबाध्यतइत्याहात
क्तिष्टम्।अविवक्षितकर्मकेभ्योपिकर्त्तरिक्तेदत्तवान्पक्कवानित्यर्थेदत्तःपक्वइत्यापत्तेः।आशितइत्यवग्रहापत्तेश्च।अपरआहाकर्मत्यनेनभूत
पूर्वगत्याअणोकर्त्तणोकर्मीभूतएवविवक्षितः।तथाचण्यन्तात्कर्मण्येवायङ्ङितिजुष्टार्षितेजुषीप्रीतिसेवनयोः।श्वीदितोनिष्ठायामितिइट्
प्रतिषेधः।अर्त्तेर्णिच्।अर्तिह्वीतिपुकानकेवलङ्तार्थत्वमात्रंकिंतुआरभ्यमाणेसूत्रेदोषोप्यस्तीत्याह।अर्पिताषष्टिरित्यादिनायुष्मदस्मदोङसि।
ङयिचाष्टयग्योगकरणंयथासंख्यशङ्कानिरासार्थम्॥ईडवन्दपूर्वसूत्रेह्यनुबन्धकस्याग्रहणात्ण्यदन्तेषुनित्स्वरएवप्राप्तेवचनम्।विभाषा
वेःवेणुशब्दोनित्स्वरेणनित्यमाद्यदात्तःप्राप्तःस्योःणुरित्यनुवर्त्तमानेअजिरशिभ्योनित्त्वेनिल्युत्यादितत्वात्।इध्मानशब्दोयदिचानश्चन्तःतदाचित्वा

दन्तोदात्तः।अथणनजन्तः।तर्हिलसावृधातुकानुदात्तत्वेकृतेउदात्तनिवृत्तिस्वरेणमद्धोदात्तः।अशोरल्लोपदतिअमोकारस्यउदात्तस्यलोपात्।सर्व
धापिअप्राप्तमाद्युदात्तत्वंपसेविधीयते।त्रयःपचाद्यजन्तादति।कुहविस्मापने।स्वढअसम्यग्भाषणे।चौरादिकावदन्तौ।कथहिंसायाम्।मतोःपू
र्वमिति।शब्दरूपापेक्षयानपुंसकस्यआदित्यस्यविशेषणम्।केचित्तुसूत्रेपूर्वशब्दंपलिङ्गमेवपठन्ति।उदाहरणेचातुरर्थिकोनद्यामत्वम्।मतौब
हूचोनजिरादीनांशरादीनाञ्चेतिदीर्घः।अहीवतीति।सञ्ज्ञायामितिवत्वम्।उत्तरोग्रन्थःस्पष्टार्थः।कचित्तुविशेषउच्यते।द्वितीययादेतृणधा
न्यानाम्।तिलादति।यत्तुअलाबूतिलोमेतिरजसिकटञ्चिधौहरदत्तेनोक्तन्तिलशब्दोघतादित्वादन्तोदात्तइतितच्चिन्त्यम्।तिलाश्चमेदत्व
त्रआद्युदात्तस्यैवपठ्यमानत्वात्।घ्राणिनम्।कुपूर्वम्।यत्तुकुपूर्वाणामितिपाठमुपन्यस्यकवर्गात्येपूर्वैतन्मद्धेआदिरितिन्यासकारहरद
त्तौतस्यसमूढदतिसूत्रेप्रोचतुःतच्चिन्त्यम्।सर्वनामत्वेनसुदिसतिकुपूर्वेषामितिप्रयोगायत्नेः।सौत्रत्वेवाशरणीकर्त्तव्यम्।लघावन्तेदू
ढ्।दृहआदिशब्देनसंबध्यते।तेनादेरपिगुरोरुदात्तःअतएववृषाकपीतिशब्दस्यगुरुरुदात्तइतिवृषाकप्यग्नीतिसूत्रेस्त्र्यादिग्रन्थेषुवि
भाविकेनचगुरूणांमद्धेयआदिःइत्यर्थोस्तिवाच्यम्।अन्यतोङीषितिसूत्रेसारङ्गकल्माषशब्दोलघावन्तइत्यादिनामद्धोदात्तावितिहर
दत्तादिग्रन्थविरोधात्।कल्याणइति।पर्यायेणआदिमद्धावुदात्तौ॥चतुर्थपादे॥उपसर्गाश्चाभिवर्जम्।दहानाभिरित्येवसुवचम्।इतरेषांपूर्वेण
सिद्धत्वात्।वस्तुतस्तुतदपिमास्तु।एवमादिषुअभेःसुपठत्वात्।आत्वेतिमन्त्रेउपसर्गाश्चाभिवर्जमितिवचनात्प्रातिपदिकान्तोदात्तत्वमित्युक्त्वा
मानोमर्त्ताअभिदुहन्निति मन्त्रेएवमादीनामन्तइतिवदंता ——— वेदभाष्यकृताध्वनितमेतत्।यथेतिपदान्ते।यत्तुस्वरमञ्जरीकृतापुराजीवगृभो
यमाभाजन्नोअग्नयोयेसुपन्यस्मलित्वरमाशङ्क्यआव्यधिकप्रसिद्धिमात्रेणात्रसर्वानुदात्तत्वमित्युक्तम्।फिट्सूत्रेषुतुरीयःपादः।इतिप्रकृति

स्वरविषमकंद्वितीयंप्रकरणम्।अथप्रत्ययस्वराः कर्त्तव्य मिति।तत्रत्ययः तस्तुतिलात्त्वरितोचस्यतेननुतव्यस्यापिआद्युदात्तेशेषनिघातेकृते उदात्तादनुदात्तस्येतिस्वरितोभवत्येवेतिचेत्सत्यङ्ग्यनसिद्धः नित्त्वरस्तसिद्धइतिशेषनिघातप्रवृत्यप्रवृत्तिभ्यांमहान्कालेविशेषः।तव्यतस्ति लमेवशेषनिघातपरिभाषायायथोद्देशंप्रवृत्तौज्ञापकमितिद्वेयम्।युच्छतीतियुच्छप्रमादे।अन्यकेइति।अकच्ततः परश्चिरुदात्तः एवंयकेत कदित्यत्रापि।अकचश्चित्वमेवचिंतः प्रकृतेरित्युक्तेर्थेलिङ्गम्।अन्यथातस्यैकाचत्वादनर्थकन्तत्स्यात्।कौञ्जायनादिति।कुंजस्यापत्यानिबहूनि।गो त्रेकुञ्जादिभ्यश्फञ्।व्रातच्फञोरस्त्रियामितिञ्यः।ञ्यादयस्तद्राजाः।बहुत्वेलुक्।इहश्फञश्चकारोव्रातच्फञोरितिविशेषणेचरितार्थः।ञका रोवृद्ध्यै।ततश्चित्त्वंबाधित्वापरत्वात्त्रित्स्वरःप्राप्तःतेनेनबाध्यतेतिसभ्योजसः।अर्थगतंबहुत्वंशब्देआरोप्यबहुवचननिर्देशः।अन्तोदात्तस्य त्रिशब्दस्यआदेशस्तिसृशब्दोपितथातस्यअचिरक्रतइतिकृतेउदात्तस्वरितयोर्यणइतिजसःस्वरितत्वंप्राप्तम् अनेनबाध्यते।अन्तोदात्तात्तिस्व शब्दःस्वर्यतेतेनाधिकारगतिर्भवतीत्यार्शयेनाहनित्याधिकारेति।अनित्यसमासेकिम्।अग्निचिता।उपपदसमासः।कृदुत्तरपदप्रकृतिस्वरेण चिच्छब्दउदात्तः।अधिकारग्रहणंकिम्।विग्रहाभावमात्रेणयोनित्यसमासस्तत्रपर्युदासोमाभूत्।अवाचाब्राह्मणेन।बहुव्रीहौसंज्ञायांसुभ्यामित्युत्त रपदान्तोदात्तत्वम्।अत्रविभक्तेर्वैकल्पिकउदात्तोभवत्येवादधीवइति।दद्धंचतिदद्धङ्।तस्यक्वलिगादिनाकिनाशसः।परिग्रहार्थमिति।शणादिरि लेवतुनोक्तम्।नपुंसकेशसिमाभूत्।सुटिचयथास्यादिति।ऊठीतिउपधाभूतऊठ्ग्रहणेनखन्यदित्यर्थः।पञ्चमीनिर्देशादन्तस्येवग्रहणेप्राप्तेवच नम्।माभ्यामिति।पूर्वार्द्धेचबभ्रुशब्देनोक्तयोरिहद्वद्———————मापरामर्शेप्यन्वादेशोस्त्येव।अन्वादेशश्चकथितानुकथनमात्र म्।नचिदमाकथितस्येदमेवानुकथनमितिभाष्योक्तेः।नन्वेवमपिसावेकाचइतिस्वरः प्राप्नोति।नचेहान्तोदात्तादित्यस्यानुवृत्तिसामर्थ्यात्सोपिनप्र

वर्त्तनदृतिवाच्यम्। एसोभ्यारुत्यासामर्थ्योपिपक्षयात्। नहिशसिसावेकाचदृतिप्राप्नोति। दृष्यतेचतत्रानुदात्तएवयदीमेनांउषतोअभ्यवर्षीत्। ह
नामैनाँदृतित्वशपदब्रवीत्। अन्यैरेवान्कन्यानामभिःस्परत्। इत्यादौतथैवपाठात्। तस्मादाभ्यामित्यादेरन्वादेशेकृयंसर्वानुदात्तेतिचेत्। उच्च
तेऽडिदमितिसूत्रेएकाचदृत्यनुवर्त्ततेपदादिविशेषणार्थम्। अतएवनिष्पर्यन्ताःषडेवगृह्यन्तेनतुततःपरेपि। तेषामनेकाच्त्वात्तेन
ग्रीवायांबद्धो पिकक्षआसनिमत्यनदीनउदनिसियन्तमित्यत्रआसन्युदतीतिमद्धोदात्तस्यात्। नचान्तोदात्तात्परत्वमेवेहविभक्तेर्दुर्लभमि
तिवाच्यम्। स्थान्तरतम्येनादेशानामप्यन्तोदात्तत्वात्। आस्यशब्दस्यण्यदन्ततयातित्वरेणखरितान्तत्वेपिपदान्तोमासित्यादिसूत्रेपदाद्यादेशाना
मन्तोदात्ततानिपातनाश्रयणात्। एवंस्थितेशसिएनादेशस्यापिएकाज्ग्रहणेनैववारितत्वादन्तोदात्तग्रहणस्यसामर्थ्यंनिर्बाधम्। तेनाभ्यामित्या
दौसर्वानुदात्तत्वासुस्थेति। यद्वासावेकाचदृतिसूत्रेअन्तोदात्तादित्यपकृष्यताम्। तथाचअशादेशेकृतेप्रसङ्गएवनास्तीतिदिक्। अष्टनोदीर्घात्।
अष्टन्शब्दोऽन्तादित्वादन्तोदात्तः। तेनोत्तरार्थतयानुवर्त्तमानस्यान्तोदात्तादित्यस्येहापिनान्वयः मण्डूकप्लुतिवीस्तु। दीर्घात्किंअष्टभिः। दृहभल्लु
पोत्तमस्मिन्निस्वरःशतुरनुमोनद्यजादीअशसंत्वाविदुषीरस्मिन्नहन्यस्यैवंविदुषोग्निहोत्रंजुह्वतिअत्रवस्वादेशस्यस्थानिवद्भावेनशतृत्वा
त्ततःपरयोर्नदीविभक्त्योरुदात्तःप्राप्तःसनेष्यतेनतथाचस्थानिवत्सूत्रेवार्त्तिककृतास्मरेचवस्वादेशेदृतिनिषेधःपठितः। उदात्तयणोहल्पूर्वा
त्। उदात्तस्वरितयोरितिस्वरितेप्राप्तेआरम्भः। हृस्वनुड्भ्याम्। अक्षण्वन्तदृति। छन्दस्यपिदृश्यतइत्यनड्। अतोनुडितिनुट्। पूर्वनकारस्लो
पःनेष्यतदृति। हल्स्वरप्राप्ताविति भाष्योक्तेरितिभावः। रेवानिति। रयिरस्यास्तीतिमतुप्। रयेर्मतौबहुलमितिसंप्रसारणंपूर्वत्वम्। आदृणः
नतोहृस्वाभावाद्वचनम्। नामन्यः। अग्नीनामित्यादौ। परत्वान्नित्यत्वाच्चदीर्घेकृतेहृस्वाभावान्नेदंस्यात्। वचनन्तुतिसृणांचतसृणामित्यादौ

सावकाशम्।अतआह मतुपीति।प्रथमान्तमनुवृत्तम्।सप्तम्यापरिणम्यतइतिभावः।षट्त्रि।हलादिःकिंचतस्रःपश्यानगोश्वन्।इह्यन्तरस्यप्रतिषेधासंभवात्सर्वस्यैवषाष्टिकस्वरस्यायंप्रतिषेधइत्याह।प्रागुक्तमिति।एवञ्चवीरवत्तममित्यत्रह्रस्वनुड्भ्यांमतुबितिनभवति। यत्तुस्वरमञ्जर्यान्तीयादिविभक्तेरुदात्तत्वन्नभवतीतिनगोश्वन्सूत्रंविवृतन्वदनेनप्रत्युक्तंलक्ष्यविरोधात्।उदात्तनिवृत्तिस्वरस्यतुप्रतिषेधोज्ञेष्यते।देवी कुमारीत्यादिनामन्तोदात्तत्वस्यभाष्येतत्रतत्रदर्शितत्वात्।वेदेपिदर्शनाच्च।तन्निर्वाहार्थन्नगोश्वन्निति सूत्रेअनुदात्तस्यचेत्येतदितरेषामेषानुवृत्त्यानिषेद्धुसङ्गोवाक्यभेदेनपुनर्विधानार्थइतिव्याख्येयम्।शुनश्चिच्छेपमिति।अत्रचिदितिपदंसंहितापाठेबाहुलकान्शुनःशेपशब्दस्यमध्येप्रक्षिप्यते।उक्तञ्चप्रातिशाख्ये।शुनश्चिच्छेपंनिदिवेन्नरावांसम्पूर्णम्।नरावंसनैरंचेत्यानुपूर्व्यसंहितादृति।पदकालेतुशुनःशेपंचिदृतिपठ्यते।शेपपुच्छलाङ्गूलेषुशुनदृत्यलुक्।वनस्पत्यादिलादुभयपदप्रकृतिस्वरः।प्रथमैकेति।नचिहसावेकाचदृत्यत्रेवसुपोग्रहणम्।तत्रयत्तदोस्त्रियामवर्णान्तत्वेपिलिङ्गान्तरेएकाचान्तत्वादितिभावः।एदृराजा।यरमराजा।अडिङन्तस्यतेःकिबन्तस्यसनकारस्यग्रहणंविषयावधारणार्थम्।यत्रनलोपोनास्तितत्रैवप्रतिषेधोयथास्यात्।प्राचाप्राङ्भ्याम्।गतौतुविभक्त्युदात्तःस्यादेव।।प्राचाप्राचे।कुङ्किन्नन्तएवाकृञ्चापरमकृञ्चा।कृत्।कृरोतिः।कृन्तिर्वाकिबन्तः।यत्विहकाशिकायांसुनासुगुभ्यामित्युदाहृत्यअन्तोदात्तादुत्तरपदादितिप्राप्तःप्रतिषिद्धनदृत्युक्तंतद्वाष्यवार्तिकविरुद्धंस्यानिवत्सूत्रशेषेहिगोःपूर्वणित्वात्तत्रस्वरेषितिवार्त्तिकेनद्वाभ्येवस्वरेकर्त्तव्येनिषेद्धुमेवागोशब्दस्यादेशोनस्थानिवदितिनिर्णीतम्।द्युभिरितिसावेकाचदृतिझडितिवाप्राप्तःस्वरोनिषिद्ध्यते।नृचाअत्रद्यूलादिरितिप्राचांरीत्याद्यूलदृत्यस्यानुवृत्तिमाश्रित्योक्तम्।वस्तुतस्तुझलितिनानुवर्त्ततेतेनयएकदृन्नयःपोसीत्यत्रनरीत्यस्याद्युदात्तत्वं

त इकारोप्युदात्तः। चित्रैति। श्रूयतइति श्रवः कीर्तिः। चित्रं श्रवो यस्य चित्रश्रवाः। ततस्तमपासमपादइति समशब्दः त्वत्समसिमेत्यनुच्चानीति फि
दृसूत्रेणानुदात्तः हरदत्तस्त्वाह। सुजोडमिति। पादशब्दोदृष्टादिलादनुदात्तः। मन्दयतेस्त्वमिति। मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु। ण्यन्तात्लेट्।
ण्णादेशः तस्यङ्कित्त्वस्सुभश्चेत्यार्द्धधातुकत्वेनशबभावादनुपदेशादितिनिघातोनेति। अतः प्रत्ययादुदात्तत्वमेवणेरनिटीतिणिलोपस्तुनतंप्र
तिसार्द्धधातुकत्वाश्रयणात्। नचवैयरीत्यमापादनीयम्। छन्दसिदृष्टानुविधानात्। पूर्वमेवकल्पोनोदात्तः। तत्पुरुषइति। स्यादेतत्। परमश्चा
सौकंपरमकोरकेणपरमकारकेइत्यत्रातिप्रसङ्गः। द्वितीयातृतीयासप्तम्यन्तपूर्वपदत्वात्। नहिविशेषणसमासः। प्रथमान्तानामेवेतिनिय
मोस्तीत्यसकृदुक्तत्वात्। सत्यन्तलक्षणप्रतिषेधोक्तपरिभाषयातृतीयादिशब्दोच्चारणपूर्वकंविहितस्यैवसमासस्येहग्रहणान्नोक्तदोषः। अ
व्ययेइति। निपातत्वादेवसिद्धेनञ्ग्रहणंपरेष्वपिबाधनार्थम्। तेनअकरणिरित्यादौकृत्वरोनञ्स्वरेणबाध्यते। अपिचाचत्वारः। अनड्वाहःइत्यत्रसतिशिष्टेपिआमुदात्तोबाध्यतइतिबोध्यम्। कुग्र
हणन्तुवादिषुपाठाभावाद्दृस्तुस्तुवादिष्वेवकुःपाठ्यः दृहस्तुनपाठ्यः। एवञ्चाव्ययत्वमपितस्यसिद्धति। स्त्रीलेति। मयूरव्यंसकादिरयम्। न
त्वेवन्तत्रेत्यनोदात्तत्वंनिपात्यतामितिचेन्नैवम्। साभिकृतंस्वयंधौतमित्यादिवारणायेहपरिगणनस्यावश्यकत्वात्। सदृशप्रतिरूपयोः। न
नुपित्रासदृशइतिविग्रहेतृतीयान्तंपूर्वपदन्तत्रतत्पुरुषेतुल्यार्थलेवसिद्धम्। नचतुल्यार्थयोगेषष्ठ्याअपिविहितत्वेनषष्ठीसमासार्थमिद
मितिवाच्यम्। तत्रानभिधानात्षष्ठीसमासोनेत्यपिसुबचत्वादितिचेन्नैवम्। अनुक्तसमासानुरोधेनषष्ठीसमासस्वीकारावश्यकत्वात्। तद्यथा।
दास्याःसदृशःवृषल्याःसदृशःवृषल्याआकृतेर्द्रव्यलुक्। दासीवृषलीशब्दयोरन्तोदात्तयोरुदात्तयणोहलपूर्वादितिविभक्तिरुदात्ता। नसादृश्य

मिनि।यत्रहि प्रतियोगिविशेषसमर्पणार्थम्पूर्वपदम्।तेत्रेवसादृश्यस्यसमासार्थतेतिसादृश्यग्रहणसामर्थ्यादाश्रीयतदितिभावः।गृहपतिरिति।गे
हेकदितिकप्रत्ययस्वरेणगृहशब्दोन्तोदात्तः।पञ्चारत्निरिति।पञ्चअरत्नयःप्रमाणमस्येतितद्धितार्थेद्विगुः।प्रामाणेलोद्विगोर्नित्यमितिमात्रचोलो
पः।संख्यादेराजन्यबहुवचनेतिपूर्वसूत्रात्तद्धइत्यनुवर्त्तते।कार्ष्ण।कुर्भूमिःतत्रजाताःकुजाःतान्यातिकुजपः।कृतस्यकुजयस्यचअपत्यमित्य
र्थेऋष्यणञावेतौ।कुरुगार्हपतेति।दृहपण्यकंबलात्नाःसप्तसमासाः।तत्रआदितोद्वयोःषष्ठ्याःसौत्रोलुक्।इतरेषांपञ्चानांषष्ठ्यास्थानेप्रथमैक
वचनम्।दासीभारणामितिबहुवचननिर्देशादाद्यर्थावगम्यतेतदाह।एषामिति।कुरुणाङ्गार्हपतम्।कुरुशब्दोन्तोदात्तः।कुरोरुञ्चेत्युप्रत्यया
न्तात्तीर्थकुर्वादित्वात्कर्मधारयाःश्रीर्यस्यास्तितत्श्रीलम्।सिध्मादेराकृतिगणत्वाल्लच्।कपोतलइत्यत्रकपिलकादीनामुपसंख्यानाल्लत्वम्।
नश्रीलेतिनञ्समासेओदुपधाल्लोश्रीलशब्दः।अश्रीलाचासौदृढरूपाचलायण्यरहितापिकुजत्वादिरहित्वात्संस्थानमात्रेणदृढेत्यर्थः।पारेव
डवेवानिपातनादित्यर्थसमासः।विभक्तेर्लोपश्च।पारशब्दोएतादिः।तिलशब्दान्मत्वर्थीयइति।एषोदरादित्वात्तिशब्दस्यद्विर्वचनम्।तितिलिनो
ऽपत्यम्।अण्।नस्तद्धितइतिटिलोपः।तैतिलानांकण्डूः।पण्यशब्दोअवद्यपण्येतिनदन्तत्वादाद्युदात्तः।नचद्वितीयोकृत्योदित्यवसिद्धमिति
वाच्यम्।प्रतिषेधोक्तेरुत्तरत्रानुवृत्त्याअजात्येतिसमासेतत्प्रवृत्तेः।दृहतुविशेषणंविशेष्येणेतिसमासः।ननुअजात्येतिप्रतिषेधसामर्थ्यादेहुलभो
सीतिचेत्।अत्राहुः।अजात्येतिनजातिप्रतिषेधार्थंकिंतुन्यायसिद्धार्थानुवादमात्रम्।नचानुवादस्यसर्वथानेष्फल्यंगुणक्रियावाचिनामसति
समेनपूर्वनिपातप्रसङ्गेकृत्यानांपूर्वनिपातार्थंसूत्रमिति।सुत्यादनेनचरितार्थत्वात्।दास्याभारोदासीभारः।यूपदार्वितिः।यूपशब्दआद्यु
दात्तः।कुसुभ्यांवेत्यत्रनिदित्यनुवृत्तेः।त्वोतासइति।त्वयाऊतारक्षिताःत्वोतासः।प्रत्ययोत्तरपदयोश्चेतिमपर्यन्तस्यत्वादेशेदकारलोपश्चान्दे

तः अवतेः क्तः। ज्वरत्वरेत्यूठ्योरिडागमस्याभावश्छान्दसः। पूर्वपदप्रकृतिस्वरेकतेरेकादेशउदात्तेनोदात्तः। ततः स्वरितप्र
त्ययोगतिरनन्तरः। गतिशब्दः क्तिजन्तः नतुक्तिन्नन्तः। अनन्तरदृतिपुल्लिङ्गनिर्देशस्तुनिपातनाच्चानुनासिकलोपः। पुरोहितमिति। अत्रसमासान्तो
दात्तत्वंअमयपूर्वपदप्रकृतिस्वरत्वंकृत्स्वरः षाष्पादिस्वरःदृत्येतेषु प्राप्तेषु पूर्वपदप्रकृतिस्वरोनेनविधीयते। पूर्वपदञ्चेहान्तोदात्तत्वम्। पूर्वाधरावर
णामसीतिअसिप्रत्ययस्वरेण। अनन्तरदृतिकिम्। अभ्युद्धृतः। दृहद्भृतशब्दस्योच्चैर्नसमासेपुरोहितमित्यत्रेवगतिस्वरेणआद्युदात्तः। उद्धृतश
ब्दःतस्यपुनर्हणिशब्देनसमासः। तत्रचरुद्धृहणेगतिकारकपूर्वस्यापिग्रहणमितिपरिभाषयोद्धृतशब्दःक्तान्तउत्तरपदम्। एवंस्थितेसमासेऽन्तोदा
त्तत्वेप्राप्तेनदपधारेफक्वरेतदपवादस्याद्यादिस्वरः प्राप्नोतमपोपाभेगतिस्वरःस्यात्तोनेनन्तरग्रहणेनवार्यते। नन्वनन्तरग्रहणेऽपिदुर्वारोऽसौ।
कुद्धृहणपरिभाषयाउद्धृतशब्दस्यक्तान्तत्वेअभेस्तदानन्तर्यस्यसत्वादिति चेन्नैवम्। अनन्तरग्रहणसामर्थ्याद्धिधातोरनन्तरोगतिराश्रीयते। अ
भिन्नन्तथेति। नन्वेवमभूदभे स्वरःदृष्टसिद्धिस्तुकथम्। अभ्युद्धृतशब्देहिउच्चैर्नसस्वरदृष्यते। संसृष्टन्धनभुभयंसमाकृतम्। इतिमन्त्रेसमा
सेकृतशब्देऽडःस्वरदर्शनात्। नचासौप्रकृतसूत्रेणसिद्ध्यति। प्रथमसमासेतत्प्रवृत्तावपिद्वितीयसमासेथाद्यादिस्वरस्यप्राप्तेरुक्तत्वात्। नचतं
बाधित्वागतिस्वरःप्रवर्त्ततेदृतिवाच्यम्। द्वितीयसमासेउदःपूर्वपदत्वाभावात्। अत्रोच्यते। धातोरनन्तरदृतिव्याख्यानादेवपूर्वपदत्वंविनापिस्वरे
प्रवर्त्ततेनहिनामप्रकृतिर्धातुंप्रतिपूर्वपदत्वङ्गतेःसंभवति। तस्माद्भ्युद्धृतंसमाकृतमित्यादितावत्सुस्थम्। इदंत्ववक्ष्यते। उक्तरीत्यादूरा
दागतइत्यादौकारकपूर्वेपिगतिस्वरःस्यात्। दृश्यतेतुथाद्यादिस्वरःतदर्थंकारकादत्रश्रुतयोरितिसूत्रेकारकादितियोगोविभज्यते। तत्रग्रहणङ्ग ति
ग्रहणञ्चानुवर्त्तते। कारकात्परंक्तान्तंसगतिकमुत्तरपदंअन्तोदात्तंस्यादित्यर्थः। तत्रदूरादुद्धृतइत्यादौथाद्यादिसूत्रेणैवसिद्धत्वात्। दूरादागतइत्यादौ

गतिरनन्तरदत्वस्यबाधनार्थमेवेदंसूत्रमितिदिक्।तादौचाननुकृतीतिव्यर्थम्।तथाहि।गतेरयंस्वरोविधीयते।गतिसञ्ज्ञाचधातुमात्रेप्रतिप
त्ययविशिष्टएवप्रयोगार्हः।प्रत्ययश्चेहपरिशेषात्कृत्एवेति।चेत्सत्यम्।कृद्ग्रहणङ्गत्वञ्चाप्रकृतिकालोपलक्षणम्।तेनकृदुपदेशेतादि
त्वलाभात्प्रलपितादित्यादिसिद्धति।स्वरप्रकृतिवेलायान्तादित्वाभावेपिपूर्वन्तत्वात्।आदिग्रहणन्तुशक्यमकर्त्तुम्।यस्मिन्विधिरित्यत्रहि
।अताविति किम्।आगन्तुःस्यादेतत्।अताविति पर्युदासःक्तिनएवोचितःनबिन्येअस्यसुष्टुतिम्।सुहवासुष्टुतीहुवे॥ऋणोचोदस्यसुष्टुतिम्।या
सेराकेसुमतयःइत्यादौगतिस्वरादर्शनादिति चेत्।मैवम्।उदाहृतःप्रयोगेषुउपायान्तरस्यैवानुसर्त्तव्यत्वात्।नह्यताविति पर्युदासमात्रेणतन्नि
र्वाहःकृदुत्तरपदप्रकृतिस्वरेणधातोरुत्तत्तापत्तेः।अन्तोदात्तताया श्चतत्रेष्टत्वात्किंच।अताविति क्तिनःपर्युदासेप्रभूतोसङ्गतिमित्यादौगतिस्व
रोनसिद्ध्येत्।तस्मान्नुनएवायंपर्युदासःइतिस्थितम्।कातर्हिसुष्टुतेर्गतिरितिचेत्शृणु।स्तोत्रकरणीभूतायाश्चःसाधुसिच्छिनत्तीतिवक्तव्यत्वेवि
षयेयाक्तिजन्तमिदन्नतुक्तिन्नन्तम्।यत्तुकेचित्।मन्क्तिन्नित्यत्रेत्यादिनाअन्तोदात्तमित्याहुस्तन्न।तत्रैकारेऽस्मिन्स्वरेकृतेनुव
र्त्तितत्वात्।प्रभूताविति सिद्ध्येतदनुवृत्तेर्न्याय्यत्वाच्चेतिदिक्।तवैवाकृत्स्वरापवादोयम्।अन्तउदात्तइतियद्यपिउदात्तग्रहणंनानुवर्त्तते।त
थापिगतिःप्रकृत्याभवतीत्युक्तेउदात्तोवृद्धिमारोहतिसएवान्तस्यभवतीतिभावः।प्रत्यक्षइति।कृदुत्तरपदप्रकृतिस्वरःपरत्वादिति।उत्तर
स्यावकाशःसाकट्रीचीअस्यावकाशः।नेपराङ्।उभयप्रसङ्गेपरत्वादयमित्यर्थः।ननुचुस्वरःसतिशिष्टःभसञ्ज्ञायामल्लोपेचतेप्राक्तत्स्यात्
वानायञ्निप्रतिषेधःकिंतर्हिदृष्टिरेवेतिहरदत्तः।चोरनिगतौऋतावप्रथमइतिवार्त्तिकग्रन्थोपिदृष्टिपरतयैवव्याख्येयइतितदाशयः।हलादिशे
षेपरत्वादित्यस्यदृष्टत्वादित्यर्थः।यङ्डिति।उदात्तस्वरितयोर्यणइतिखल्लिः।दिवोदासायेति।दिवश्चदासेइतिषष्ट्याअलुक्।नजोजरमरमित्रमृ

ता:। नञ्सुभ्यामित्यस्यापवाद:। जरणज्जर:। ऋदोरप्। मरणंमर:। अस्मादेवनिपातनादप्। अमिमि द्रोसेहने। त्र:। मित्रम्। मृङ:क्यप्। पुंसकेभवित्र:। सूत्रेतुशब्दपरत्वात्पुंस्त्वम्। अमित्रमिति। मद्योदात्तोयम्। एतेनअमित्रस्यमर्षयामस्मुमिन्द्रइत्यादिव्याख्यातम्। अमेर्दिषतीतिदित्रम्। अत्यपेतुअ
न्तोदात्तउक्त:। नञ्तत्पुरुषेलाद्युदात्तोपि। नचतत्सपरवल्लिङ्ग-तापत्ति:। भत्रामित्रसूत्रमेष्ट्रा:। पुंसीतिलिङ्गानुशासनसूत्रात्स्वञ्जेर्ष्वरीश्वर
वादिशब्दवदमित्रशब्दोपित्रिविध:। यत्तुदिषोऽमित्रइतिसूत्रेहरदत्तेनदोषद्वयमुक्तंक्लीबत्वमाद्युदात्तत्वञ्चस्यादिति। तदपास्तम्। तत्रैत्यवधेय
म्। सोर्मनसीति। सुकर्माणइत्यादि। यद्यपिआद्युदात्तंद्यच्छन्दसीत्यनेनसिद्धमिदम्। तथापिसुप्रथिमेत्यादिबहूजर्थमत्रोच्यमानंसूत्रमितिवोद्यम्। ग
तिकारकोपपदात्कृत्। दृहशिनेर्नित्यबहुव्रीहावभसूत्। इतिपूर्वसूत्रस्थंबहुव्रीहिग्रहणंनानुवर्त्ततेस्वरितत्वात्। किंतुअवहितमपित
त्कृष्टग्रहणन्तत्पुरुषेशालायान्नपुंसकइतिसूत्रादनुवर्त्ततइत्याह। तत्पुरुषइति। प्रकारकइति। कुगतीतिसमास:। लित्स्वरेणोत्तरपदमाद्यु
दात्तम्। नृवाहसेति। नृनवहत:इतिविग्रह:। वसेर्णिदितिसूत्राण्णिदित्यनुवृत्ते:अमुनोणित्वादुपधावृद्धि:। णित्स्वरेणोत्तरपदमाद्युदात्तम्।
उच्चैःकारमिति। णमुल्विधावुच्चैरित्युपपदम्। दृहकृदृहणमाकरेप्रत्याख्यातम्। तथाचवार्त्तिकम्। गत्यादिभ्यःप्रकृतिस्वरत्वेकृदृहणान
र्थक्यमन्यस्योत्तरपदस्याभावादिति। तत्रेदंविचार्यते। तिङन्तसमासेअयंस्वरोभवतिनचेतिआद्योयःशंनरम्। शरद्यन्वविन्दतयोजातःप
र्यभूषणतदित्यादि। प्रयोगाणांसौष्ठवेपि। यत्रानरोदेवयन्तोयुगानिवितन्वतेदित्यत्रश्रूयमाणमन्तोदात्तत्वन्नसङ्गच्छतेकृदृहणङ्कर्तासूत्रकृ
ताविरोधश्चासहेतियोगंविभज्यतत्पुरुषसञ्ज्ञात:। प्रागेवतिङ्समासंकृतवतोभाष्यकृतोपिप्रतिकूलमिदमिति। दोषत्रयम्। द्वितीयेतुसमा
सान्तोदात्तत्वेनवितन्वतइत्यस्यसिद्धावपि। अन्वविन्दत्। पर्यभूषतइत्यादौउत्तरपदाद्युदात्तत्वमसिद्धेता। कृदृहणंप्रत्याचक्षाणेनतत्पुरुषाधिका

रितिङ्समासंविदधताकात्यायनेनविरोधश्चेतिद्वौदोषौकिंचकैयटहरदत्तादयोप्यत्रउत्तरपदप्रकृतिस्वरस्यवार्त्तामप्यकृत्वासमासान्तोदात्तत्व
मात्रंभवतिनवेतिसंदिग्धमेवभाष्यकैजहुः।तथाचसहसुपेत्यत्रकैयटः।अनुव्यचलदित्यत्रसमासमुक्त्वाशाकलप्रतिग्रेपंतत्फलमभिधायसमा
सान्तोदात्तत्वमुनभवतितिङ्तिङ इतिनिघातेनबाधितत्वादितिकेचिदाहुरित्युक्त्वा।एवंसतिअनुप्राविशदित्युदाहरणंभाष्योक्तंनिष्फलं
स्यात्।तस्मात्सतिशिष्टत्वात्समासान्तोदात्तत्वेनभाव्यमित्यपरेदूषयित्वाकात्यत्रतिङन्तकलस्योक्तत्वात्प्रातिपदिकत्वेपिसुबनुत्पत्तिरित्युक्त्वाअन्ये
त्विदमुपक्रम्यवचनग्रहणादुक्तेप्येकत्वेसोरुत्पत्तिंहलङ्यादिलोपंचाविधायतदुपष्टंभार्थम्।अतएवैकपद्यादामनुप्राविशदेवदत्तेत्यामए
कत्वेरमामन्त्रितमितिनिघातप्रतिषेधःसञ्ज्ञायाःप्रयोजनमस्त्येवेतितिङन्तनिघातवादिनआहुरित्युपसञ्जहार।हरदत्तोप्येवंकैयटोक्ति
मात्रमन्ववादीत्।एवंहिवदताकिंपरत्वान्निघातःउतसतिशिष्टत्वात्समासान्तोदात्तइतिनावधारितम्।तदापिअनुव्यचलदित्यादौयथातथा
सुयोजातदित्यादौनुयद्दत्तान्नित्यमितिनिघातेनिषिद्धेसमासान्तोदात्तत्वंकेनवार्यताम्।किंचद्वितीयपक्षेअस्मायाहिशप्यनोवयत्रेदित्यत्रआ
ङ्।उच्चैस्तरांवषट्कारनिर्वाह्यः।अपिचसुधेयदिण्णानआयुधान्यघायमाणोनिरिणातीत्यत्रनिशब्दोनिहन्यतेवितन्वतइत्यत्रविशब्दश्चेतिताव
न्निर्विवादम्।समासान्तोदात्तत्वन्तुरिणातीत्यत्रनातन्वतइत्यत्रतुभवतीतिवैषम्यन्दुरुपपादमितिमहत्साङ्कटम्।अत्रेदन्तत्वम्।वार्त्तिकमतेता
वदाचएवपक्षःकृद्ग्रहणस्यप्रत्याख्यानात्।तत्तुरुषत्वाभ्युपगमाच्चावितन्वतइत्यत्रतुत्रिचक्रादिवादन्तोदात्तत्वंकल्प्यम्।अस्मायाहीत्यत्र
तुतिङ्तिङइतिनिघातेआङ्ःसमासःउत्तरपदस्योदात्तश्रुत्यतयागतिस्वराभावादव्ययपूर्वपदप्रकृतिस्वरेणआङ्दात्तः।ततोअनिशब्देन
समासेकृतेकृद्ग्रहणप्रत्याख्यानात्उत्तरपदप्रकृतिस्वरेणेष्टसिद्धिःनिरिणातीत्यत्रतुयच्छब्दयोगेनिघातनिषेधात्पूर्ववदेवेष्टसिद्धम्।भाष्यम

तेनुतत्पुरुषत्वाभावात्गतिस्वरस्यान्त्यपूर्वपदप्रकृतिस्वरस्यचाभावेसमासान्तोदात्तत्वेनैववितन्वतइतिसिद्धम्।अन्वविन्दत्निरिणातीत्या स्वर
दौउत्तरपदप्रकृतिस्वरत्वंबाहुलकात्लमाधेयम्।नित्यक्रीडेत्यत्रनित्यमितियोगंविभज्यलस्यानुरोधेनकचित्तत्पुरुषतावास्वीकर्त्तव्या।अतए
वोदात्तवतेत्यस्यभाष्येद्विपाठःसङ्गच्छते।अप्रसूतिराशर्वीभिः।उपप्रेतकुशिकादित्यादौतुसमासोनपुंसकः।गतिर्गतावितितुसर्वविधीवाकृन्दसिवि
कल्पान्नपुंसकम्।अपदादावित्यधिकारादितिदिक्।रहच्छब्दइति।अन्तोदात्तोह्यसौ।दृक्कृतर्हितेरहनइत्यादौतथादर्शनात्।तनूनपादितिननू
पच्छब्दोन्तोदात्तःतस्येहानुदात्तत्वंनिपात्यतेननूनपादुच्यते।गर्भआसुरइत्यादौतथादर्शनात्।तनूनपात्पथःकृतस्येत्यत्रतुपाठोऽसमन्नितस्व
रोबोद्धव्यः।नराशंसन्तीतिनराशंसः।नृनयेअस्मादप्रशंसतेर्घञ्।नोत्तरपदेऽहरादिपर्युदासोज्ञापयति।स्वरविधौव्यञ्जनमविद्य
मानवदिति।तेनाग्निमीळेइत्यादौस्वरितःसिद्ध्यति।धायधञ्।आवसथः प्रभेदः दूरादागतंः प्रत्ययः प्रबलः प्रलविभ्रम प्रहर्षः पुरुषिति।
तृतीयातत्पुरुषेतृतीयाकर्मणीतिसङ्ख्येणकर्मणिक्रान्तेउत्तरपदेतृतीयान्तस्वपूर्वपदस्यप्रकृतिस्वरःस्यादितिभावः। बहोर्नञ्वदुत्तरपदभा
ष्यःबहुजरः दृहनजोजरेत्येतदनिदिश्यते।बहादिभ्यश्छन्दसिबहुलम्।उरुणासंहनाङ्गौरसयोनिवासइत्यादावुदात्तःसयशब्दःसमा
सस्येत्यन्तोदात्तत्वंबाधित्वाकृदुत्तरपदप्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वंप्राप्तंतत्याधादिस्वरेणबाधितम्।अतोबाहुलकेनोत्तरपदाद्यु
दात्तमितिवेदभाष्येस्थितम्।एतच्चक्षिनिवासगत्योरितिधातोर्बाहुलकादधिकरणेएरजितिमाधवमतेनोक्तम्।वस्तुतस्तुघप्रत्ययान्तःसयश
ब्दइतिहरदत्तोक्तरीत्याधादिस्वरस्येहाप्राप्त्याकृदुत्तरपदप्रकृतिस्वरेणैवेदंसिद्धम्।पराद्यैत्यस्योदाहरणेसुचोदयित्रीसूनृतावामिति रामः
वोद्यम्।ऊनपरिहाणे।चुरादिषदन्तःणिच्।क्विप्।सुतरामूनयत्यप्रियमितिसूनृप्रियम्।तदेतन्नञ्सूनृतम्।अवस्यत्यादीनिदृतिभत्वाच्चलोपोनास्ति १०

ष्टिहत्यर्थेति।मुष्टिहत्याहननंमुष्टिहत्या।हनस्तचेतिसबन्तउपपदेक्यप्।कृदुत्तरपदस्वरेणान्तोदात्तः।क्विक्कदिति।बहुव्रीहिवात्पूर्वपदप्रकृतिस्वरःप्राप्तः।विश्वायुरिति।विश्वमायुर्यस्मिन्यज्ञेइतिबहुव्रीहिः।विश्वशब्दःकृत्स्नत्वयान्तः।पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमिहप्राप्तम्॥इतिसमासस्वरप्रकरणम्॥तिङ्।तिङः।अतिङःकिम्।पचतिभवतिपाकोभवतीत्यर्थः।वस्तुतस्तुअतिङ्ग्रहणंव्यर्थम्।समानाधिकारस्यवार्तिकोक्तस्यवरुक्तत्वात्।निपातैः।यदित्यादीनांयत्रेत्यन्तानांहन्देतृतीयायाःसौत्रोलुक्।ननुयुक्तशब्देनसमासः।निपातैरितिविशेषणस्यान्वयायोगे।यद्यपहेतौचविचारेयदिवेच्चणः।हन्तहर्षेनुकम्पायांवाक्यारम्भविषादयोः।क्वचित्प्रश्नेनिषेधेप्रशंसायाङ्गविस्मृतः।यत्रेत्याधारेतत्रमूलेकेदाहृताः।अन्येप्यूह्याः।यज्ञाहन्तकरोतिकथन्तर्हिहन्ताहं——पृथिवीमिमांनिदधानीहवेहवा।अत्रेदधानीतितिङन्तस्यनिपातनिषेधःप्राप्नोति।सत्यंबाहुलकान्निघातःएतेनहन्तोनुकिमाससेइतिव्याख्यातम्।हन्तोदित्यखण्डनिपातोवाक्यारम्भेद्यः।तथैवपदकारैःपाठात्।नेच्चेच्चदौतनिपातसमाहारात्मकौनेदेवमायुजन्नत्रदेवाः।अन्यथेन्नाभिगच्छतिअत्रनञ्द्वाभ्यांविच्छिद्यइच्चब्दस्यपदकालेपाठात्।चणिचेदर्थेवणिनासमुच्चयादौत्वणिन्।इन्द्राग्नेदस्मात्सुखयेदित्यर्थः।लक्ष्मेसेनोवशोजीवातुन्नमरांसहे।हेसोमत्वञ्चेनोजीवातुवशःवश्यःकामयेयाइत्यर्थः।निपातैःकिम्।यत्कूजतिशकटम्।एतीतियत्।दृणःशतृदृणोयणितियण्।ननुप्रतिपदोक्तत्वात्पदादिभिःसाहचर्याच्चनिपातएवग्रहीष्यतेसत्यम्।ज्ञापनार्थमिदम्।अत्रग्रकरणेउक्तरीत्यासङ्गोचोनेतितेनयावद्यथाभ्यामितिसूत्रेयत्तदेतेभ्यइतिवत्तन्नोपयावच्चब्दोगृह्यतेतथाचप्रयुज्यते।तावद्धोराधोअस्मभ्यंरास्वयावत्तोत्रिभ्योअरदोगृणानाअत्रारदृत्वटस्वरेणाद्युदात्तम्।यत्तुग्रहणङ्ज्ञापकम्।अन्यान्वितेमाभूत्।यत्रकचनेमनोदस्मद्धसउत्तरम्।दृहयत्रेत्यस्योत्तरमित्यनेनसाक्षात्संबन्धःदप्रधारणेअनुदात्तेत्।भोस्यसइति।अदुपदेशात्स

रत्वात्तेदित्यस्यानिघातः।मद्रोदात्तंपदमाकिंवृत्तञ्चादृहजात्वपूर्वमितिपूर्वसूत्रात्पूर्वग्रहणमनुवर्त्ततेतद्व्याचष्टेअविद्यमानेति।तेनेहनादेवदत्तः
किंचित्स्वरितीति।नान्येरितिं।यदिहनोत्यादिभिरित्यर्थः।उत्तरवाक्ययोरितिं।दिवोवापार्थिवाद्वाद्विन्द्रंमहोवाराजसः।इत्येतयोरित्यर्थः।इन्द्रंप्रतिसातिन्ध
नशानेअधीमहेआधिक्येनयावामहेवैदिकनिघण्टौयाञ्चाकर्मसुईमहेइतिपाठात्।कस्मालोकादित्याकाङ्क्षायामाह।इतोस्मात्पार्थिवात्वाद्विवो
वामहोमहतः।श्रीढाद्रजसोरञ्जकात्अन्तरिक्षलोकाद्देवेतिमन्त्रार्थः।ननुश्रुतस्यैवतिङोऽस्योत्तरत्रानुषङ्गःतत्कथंप्राग्भवतीतिचेत्अनुषक्तस्या
निघातस्यापिकर्मभेदंपुरस्कृत्यप्राप्तस्याश्रयणेननिघातनिषेधस्यछन्दसिबहुशोदृष्टत्वात्।एतच्चैवमन्त्रेनियमदृष्टिहित्यर्थेतिमन्त्रेचवेदभाष्येस्पष्ट
त्वात्।इन्द्रंवाजेषितिअवेतितिङन्तस्येहनिघातः।निघातभावस्यतूदाहरणान्तरंवोद्यमाग्रहन्तान्नित्यमाग्रहन्तात्परमितिअव्यवधानाभावस्तुनेहा
स्तेनेतयोर्जातएवपर्व्वभूयतइत्यादौनिघातनिषेधःसिध्यतिअत्रप्रमाणन्तुपूजनात्पूजितमितिसूत्रेपूजितग्रहणमातन्वाहि।पूजनात्पू
जितमनुदात्तमितिसूत्रेणकाशकृत्स्नाभ्यामुक्तःदाक्षिणाध्यापकःपरमाध्यापकइत्यादौअनुदात्ततांविधीयतेतत्रकाशादिभ्यइतिवार्त्तिकमाहवृत्तिकृता
सूत्रावयवबलेनपठितमुदाहरणेषुमयूरव्यंसकादिलक्षणमासइतिवृत्तिमतमसमासेएवक्रियाविशेषणीभूतानांदारुणमित्यहीनामलोपो
निपात्यतइतिभाष्यवार्त्तिकयोःस्वरसः। ——————— कैयटादयोप्येवमाउभयथापिपूजनादित्येवपूजितपरिग्रहेसिद्धेपूजितग्रहणम
नन्तरप्रतिपत्त्यर्थंसत्तज्ञापयति।इहप्रकरणेपञ्चमीनिर्देशेप्यानन्तर्येनाश्रीयतइति॥इतितिङन्तस्वरनिरूपणप्रकरणंपञ्चमम्॥संहितायामिति
तियोर्द्यावचिसंहितायामितिसूत्रेसंहिताग्रहणंस्वाश्रयस्यसमाप्तेरधिकृतत्वात्।स्वरितविधेस्तुतदन्तर्भूतत्वादितिभावः।नन्वसंहितायाङ्काल
मयायादेयस्वरितोनभविष्यतितत्किमुक्तेनसंहिताधिकारेणेतिचेत्।मैवमासंहिताधिकारबहिर्भूतानांकालव्यवायेपिप्रवृत्तिज्ञापनायतुन्तदार

भात्।तेनाग्नाविस्तूदस्यग्नाविस्तूदस्यादाववग्रहेपिआनङादयःपदविभागेवस्त्रसादयः।अग्निमीळेदस्यत्रपदविभागेपिनिघातश्चसिद्ध्यति।संहिताधिकारस्यनुपयोगादिकंस्वरितप्रचयादिकंनचेतिविवेकः।नन्वेवंपुरःअहितमितिविग्रहेहिशब्दस्यस्वरितत्वंदुर्वारंपरमानन्नसिद्ध्येदितिचेन्नैवम्।तदीयप्रातिशाख्येविशिष्यविधानात्।उक्तंहिमयासभीयमानानामनेकीभवतीस्वरः।उपदिश्यस्वयंविद्वद्भिरणाम विग्रहइति।नन्विवशब्दस्यनवैअन्वेतवादित्यादीनामवग्रहेउत्तरखण्डाद्यवर्णस्यप्रचयःस्यादितिचेन्नापद्यादींस्तुद्युदात्तानामसंहितवदुत्तरानितिविशेषवचनात्।स्वरितधातमम्।अलंलाभवतीरित्यादीनाक्रमकालेदतिशब्दोत्तरभागेप्रचयोनप्रवर्त्ततेपरिग्रहेत्वनाद्यन्तातेनचेकारीकृतात्परेस्मात्समाचारंव्यालिखेत्वरोपराविवचनात्।दृश्यमन्यत्रापिमुनित्रयवचांसितत्तत्प्रातिशाख्यानितर्ह्यस्यात्तृगिरेनिरुक्तादिग्रन्थाश्चपर्यालोच्यतत्त्वंनिर्णेयम्।तदाहयथाशास्त्रमुन्नेयमितिअखण्डमपियत्सर्वंडुनत्तदितपरंपरम्।अशेषशास्त्रसंवेद्यमस्मरन्गुरुपादमहे॥१॥सिद्धान्तकौमुदीव्याख्यासेयंप्रौढमनोरमा।भट्टोजीदीक्षितकृतिर्भूयादीश्वरतुष्टये॥२॥इतिपदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूनुभट्टोजिदीक्षितेनरचितायांप्रौढमनोरमायामुत्तरार्द्धंसमाप्तम्॥

॥ संवत् १९३१ ॥

॥विद्योदयोनिराकुर्यादविद्यातिमिरंसदा॥
॥सहस्रांशुरिवाब्जोत्थंमुद्राकिरणराजिभिः॥

॥ शुभंभूयात् ॥